राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला – ३२०

ISSN: 2231-0452

# महस्विनी

**षाण्मासिकी शोधपत्रिका**

**कुसुमम् :** एकादशमम् जानुवारी – जून २०१८ **सम्पुटम् :** १

**प्रधानसम्पादकः**
**आचार्यः वि.मुरलीधरशर्मा**
**कुलपतिः**

**सम्पादकः**
**आचार्यः कोराड सूर्यनारायणः**

**राष्ट्रियसंस्कृतविद्यापीठम्**

(विश्वविद्यालयानुदानायोगस्य १९५६ अधिनियमस्य
तृतीयधारया अनुमोदितः विश्वविद्यालयः)

**तिरुपतिः - ५१७५०७, आन्ध्रप्रदेशः**

**२०१८**

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला –३२०

# महस्विनी

(षाण्मासिकी शोधपत्रिका)

**ISSN : 2231-0452**

कुसुमम् : एकादशमम्
(जानुवारी – जून २०१८)
सम्पुटम् : १

प्रकाशनवर्षम् : २०१८
प्रतिकृतयः : ५००

© राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आन्ध्रप्रदेशः

प्रकाशकः
**कुलसचिवः**
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

संयोजकः
**अनुसन्धानप्रकाशनविभागः**
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

मूल्यम् : ₹ १६०/–

मुद्रकः : प्रजाशक्ति प्रिण्टर्स एण्ड पब्लिषर्स प्राइवेट लिमिटेड, तिरुपतिः।

Rashtriya Sanskrit Vidyapeetha Publication Series-320 **ISSN: 2231-0452**

# MAHASVINĪ

## ( Bi-annual Research Journal )

**VOL : 11** January - June 2018 **Part : I**

**General Editor**
**Prof. V. Muralidhara Sharma**
**Vice - Chancellor**

**Editor**
**Prof. Korada Suryanarayana**

**RASHTRIYA SANSKRIT VIDYAPEETHA**
**(University established under Section 3 of UGC Act, 1956)**
**TIRUPATI - 517 507 (A.P.)**
2018

Rashtriya Sanskrit Vidyapeetha Publication Series – 320

**MAHASVINĪ**
( Bi-annaual Research Journal)

ISSN : 2231-0452

Volume : Eleventh
(January - June 2018)
Part : I

Year of publication : 2018
Copies Printed : 500

© Rashtriya Sanskrit Vidyapeetha, Tirupati, (A.P.)

Publisher :

**REGISTRAR**
Rashtriya Sanskrit Vidyapeetha, Tirupati

Co-ordinator :

Department of Research and Publications
Rashtriya Sanskrit Vidyapeetha, Tirupati

Price : ₹ 160/-

Printed at: Prajasakti Printers & Publishers Pvt. Ltd., Tirupati

**Disclaimer:** The views expressed in the Research papers are those of the authors and not of the editors.

Grams: Vidyapeetha

**RASHTRIYA SANSKRIT VIDYAPEETHA**

(University established under sec.3 of UGC Act, 1956)

**TIRUPATI – 517 064 (A.P.)**

(Accredited at A+ Level by NAAC)

**Prof. V.MURALIDHARA SHARMA**

VICE - CHANCELLOR

Office: Ph.: 0877-2287680
Fax : 2287838
Residence : Ph.: 2287826
Fax : 2286349

# पुरोवाक्

भारतीयसंस्कृतिसंवर्धनसंरक्षणैकदीक्षं, सर्वजनवाञ्छापरिपूरणकामधेनु-सुरसरस्वती-समाराधनतत्परं, शास्त्रसंरक्षणदीक्षादक्षञ्च राष्ट्रियसंस्कृतविद्यापीठं संस्थापनमनु भारतीयविद्यानां शास्त्राणां विद्वत्प्रवचनानाञ्च अधीतिबोधाचरणप्रचारणरूपं ज्ञानयागं सम्यगनुतिष्ठदस्तीति विद्वत्तल्लजेषु विनिवेदयितुं नितरां हृष्यति नश्चेतः।

अमरवाणी वरिवस्याया अङ्गतया विद्यापीठेन अनुष्ठीयमानेषु नैकविधशिक्षण-प्रशिक्षण-गोष्ठी-कार्यशाला-ग्रन्थप्रकाशनकार्यक्रमेषु एतच्छोधपत्रिकायाः महस्विन्याख्यायाः प्रकाशनमप्यन्यतमम्।

नन्वियं शोधपत्रिका नैकशास्त्रविषयसुगुम्फिता सुसम्पादिता च सती राराज्यते। ये विद्वांसः ये च शोधच्छात्राः स्वीयशोधलेखैः सञ्चिकामिमां पर्यभूषयन् तेभ्यस्समेभ्योऽपि मदीयानि कार्तज्ञ्यानि समर्प्यन्ते। तथा च सञ्चिकामेनां सुसम्पादितवद्भ्यः विद्वद्भ्यः आचार्य कोराड सूर्यनारायणमहोदयेभ्यः हार्दाः धन्यवादाः वितीर्यन्ते।

**शोधच्छात्रार्थसम्माने सन्दृब्धा सञ्चिका शुभा।**
**महस्विन्याः विशिष्टैषा शिष्टानां मोदमावहेत्।।**

**(आचार्य विरिवेण्टि मुरलीधरशर्मा)**
**कुलपतिः**

## महस्विनीसम्पादकमण्डली

**प्रधानसम्पादक:**

**आचार्य: वि.मुरलीधरशर्मा**, कुलपति:

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:

**सम्पादक:**

**प्रो. कोराड सूर्यनारायण:**

विभागाध्यक्ष:, अनुसन्धानप्रकाशनविभाग:

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:

**सदस्या:**

***प्रो. सी.ए. सिन्दे***

निदेशक:, आड्यारमातृकागारस्तथा गवेषणागार:, चेन्नाई

***प्रो. राणी लक्ष्मीनरसिंहशास्त्री***

शैक्षिकसङ्कायप्रमुख:, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:

**प्रो.सिहेच्.पि.सत्यनारायण:**

साहित्यसंस्कृतिसङ्कायप्रमुख:, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:

**प्रो.जे.रामकृष्ण:**

वेदवेदाङ्गसङ्कायप्रमुख:, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:

*प्रो. विरूपाक्ष वि. जड्डीपाल:*

*डा. सोमनाथदाश:*

*डा.सीहेच्. नागराजु*

अनुसन्धानप्रकाशनविभागाध्यापका:

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:

# महस्विनी

**(तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठशोधपत्रिका)**

१. एषा षाण्मासिकी शोधपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं जनवरी–जुलाईमासयोः भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेरुद्बोधनं प्रोत्साहनं विविध-दृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च।

४. अस्यां तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादन–भावानुवाद–टिप्पण्यादिपुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. प्रकाशितनिबन्धस्य प्रतिमुद्रणानि पत्रिकायाश्च स एव अङ्कः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृतवाङ्मयसम्बद्धानां विविधासु भाषासु प्रणीतानां ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। तदर्थं द्वे प्रकाशितप्रतिकृती प्रेषयितव्ये। आलोच्यग्रन्थस्य समालोचना यस्मिन्नङ्के प्रकाशिता सोऽप्यङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते, समालोचना-पत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्या वार्षिकमूल्यं वार्षिकशुल्कं रू.२५५/–, द्विवार्षिकशुल्कं रू.४२५/–, त्रिवार्षिकशुल्कं रू.६८०/– सन्ति, इदं शुल्कं **कुलसचिवः, राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः–५१७५०७** इति सङ्केतेन बैंकड्राफ्ट द्वारा प्रेषणीयम्।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः **सम्पादकः, महस्विनी-शोधपत्रिका, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः–५१७५०७** इति सङ्केतेन विधेयः।

— **सम्पादकः**

**सू.** — शोधलेखप्रणेतारः यथाकालं स्वकीयान् संस्कृताङ्ग्लभाषाप्रणीतान् शास्त्रविषयकान् अनुसन्धानलेखान् प्रेषयन्तु, यथावसरं सम्पादकमण्डलस्यानुशंसानुरूपं लेखाः प्रकाशयिष्यन्ते।

# सम्पादकीयम्

गीर्वाणवाण्याः वरिवस्या तदीयशास्त्राणां गहनाध्ययनरूपा महती विहिता चिरन्तनैर्महर्षिभिः सामाजिकश्रेयोऽभिलाषिभिरनिशम्। तत्पथानुयायिभिः ईप्सितवास्तवतत्त्व-ज्ञानानुभूतिभिरपि तत्तदनुभवाः यथार्थाः निरूपिताः दरीदृश्यन्ते साम्प्रतिकैः गवेषकैः। सर्वेषामपि लक्ष्यमेकमेवासीत् यत् मानवानां तापत्रयनिवारणरूपं शुभम्। वेदवेदाङ्गवाङ्मयं विविधशास्त्रीयं वाङ्मयं सर्जनात्मकं काव्यदिवाङ्मयं क्रान्तदर्शिभिः समुपगुम्फितञ्चापि आनन्दस्य ब्रह्मप्राप्तिरूपस्य स्वसंवेद्यरूपस्य प्रकटनायैवेति निश्चप्रचम्।

समाजस्य पुरोगतौ समस्यानां परिष्कारे समाधानरूपनूतनाविष्करणरूपाणां नूतनावरणरूपाणाञ्च शोधकार्याणाम् अनुसन्धानात्मकानां वा विशेषप्रतिपत्तिलक्ष्यकाणां गवेषार्थम् अद्याप्यस्ति सदवकाशः। तन्मसिकृत्य विविधविशेषज्ञाः विशिष्टपरिश्रमिणश्च बहुधा तादृशकर्मरताः नैकशः आलोक्यन्ते सप्रमाणं विविधतथ्यानां निरूपणपराः। तेषां परिश्रमाणां लोकार्पणाय विविधशोधपत्रिकाः प्रयतन्ते, तासु "महस्विनी" विद्यापीठशोधपत्रिकान्यतमा सहृदयहृदयरञ्जनी, यस्यां नैके नूतनाः विषयाः प्रस्तूयन्ते जिज्ञासूनां मनः प्रीतये।

महार्घः ग्रन्थराशिः संस्कृतवाङ्मयस्य परिशोधनं मुद्रणञ्च प्रतीक्षमाणः मातृकामयः विविधग्रन्थालयेषु गृहेषु च परिदृश्यमाणः संसूचयति वाङ्मयस्यास्य विस्तृतिम्। लक्षशः मातृकाः प्रकाशमुपनेयाः न केवलं भारते प्रत्युत विदेशेष्वपि बहुषु सन्तीति जानीमो वयम्। यदि समग्रोऽपि तादृशग्रन्थराशिः प्रकाश्यते तर्हि महर्षिभिः अभिलषितं श्रेयः विश्वस्य सम्भवति नान्यथा। आचार्याणां श्रीपादभट्टानां लेखोऽस्यां सञ्चिकायां विषयममुं द्रढयति सम्प्रेरयति च यूनः संशोधकान्।

एवमेवाचार्यैः विष्णुभट्टाचार्यैः निर्मितः आगमविषयकः शुल्वसूत्रपरिचयात्मकः लेखः तद्विषयकानुसन्धातृणां प्रोत्साहकः साफल्यं भजते। डा. अमरेश्वरकुमारेण पर्यालोचितः विषयः ऐतिह्यानां नानाविधोपयोगितां प्रकाशयति। तथैव व्याकरण-मीमांसा-धर्मशास्त्र-अर्थशास्त्रीया अपि शोधलेखा अत्र प्रकाश्यन्ते।

सञ्चिकायाम् अस्याम् अन्यान्यपि शोधरत्नानि विलसन्ति "Atharvavedic References to Gems" इत्यादीनि संशोधनोत्सुकानां नूतनोत्तेजदायकानि। अलङ्कारशास्त्रादिषु निष्णातैः युवकैः विद्वद्भिः डा.सोमनाथ-डा.नागराजुमहोदयसदृशैः लिखिताः लेखाः विश्वव्यवहारसंसूचकास्सन्तः विराजन्ते।

सञ्चिकाया अस्या प्रकाशने निरन्तरं प्रोत्साहकेभ्यः विद्यापीठस्यास्य कुलपतिभ्यः **आचार्य वि.मुरलीधरशर्ममहाशयेभ्यः** अनुसन्धानप्रकाशनविभागः नितान्तमाधमर्ण्यं प्रकटयति। तथा कुलसचिवेभ्यः **आचार्य जि.एस्.आर्. कृष्णमूर्तिमहाभागेभ्यः** कार्तज्ञ्यं प्रकटयति। प्रकाशनेऽस्मिन् सम्पादकमण्डलिसदस्येभ्यः सहायकेभ्यश्चान्येभ्यः धन्यवादान् वितरणे मोमुद्यते मेऽन्तरङ्गम्।



**सम्पादकः**

# शोधलेखानुक्रमणी

कुसुमम् : एकादशमम् सम्पुटम् : 1


पुटसंख्या

१. **Acharya Kautilya on Corruption** 1
- Prof. P. Sasirekha

२. **The Kamadogdhree Commentary on Suryasiddhanta of Sri Tammayajvan** 5
- Prof. A. Sripada Bhat

३. **वैखानसशुल्बसूत्रम्** 19
- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्युलु

४. **प्राच्यविदुषां चिन्तनेषु मनोवैज्ञानिकतत्त्वानां विचार:** 27
- डा.राधागोविन्दत्रिपाठी

५. **श्रीमद्भगवद्गीता-आयुर्वेदशास्त्रयो: व्यक्तित्वप्रकारा:** 35
- डा.सिङ्गराजु दक्षिणामूर्तिशर्मा

६. **Atharvavedic References to Gems** 41
- Dr. G. Sudev Krishna Sharman

७. **अलङ्कारशास्त्रे लोकन्याया:** 53
- डॉ.सोमनाथदाश:

८. **औचित्यं विश्वव्यवहारहेतु:** 63
- डॉ.सी. हेच्. नागराजु

| | | |
|---|---|---|
| ९. | **समाजे आश्रमधर्मस्य प्रासङ्गिकता**<br>- डॉ.सुधांशुशेखरमहापात्र: | 71 |
| १०. | **'ककुद्मन्त:' इति पदविषयकसाध्वसाधुविचार:**<br>- डॉ.यदुवीरस्वरूपशास्त्री | 77 |
| ११. | **आरुण्यस्य क्रयसाधनत्वम्**<br>- डॉ. श्रीराम: ए.एस्. | 89 |
| १२. | **दिङ्निर्णयविमर्श:**<br>- डॉ. केशवमिश्र: | 95 |
| १३. | **अग्निपुराणे वृक्षचिकित्सा**<br>- जी.अमरेश्वरकुमार: | 105 |
| १४. | **नैषधीयचरिते राजनय:**<br>- जी.सुमेधा | 109 |
| १५. | **अधिकारिवाद:** (विवेकानन्दस्य नव्यवेदान्तानुसारम्)<br>- पलाश साँतरा | 117 |

ISSN: 2231-0452

# Acharya Kautilya on Corruption

***Prof. P. Sasirekha***

*(Retd. Sanskrit Professor, Osmania University, Hyderabad)*

**विष्णुगुप्तं नमस्कृत्य राजनीतिविशारदम्।**
**प्रस्तौमि किञ्चिदेवात्र तस्य शास्त्रार्थसौरभम्।।**

The very mention of the name "Acharya Kautilya" creates vibrations in Indian history. The philosophy of Indian scholars is not to bother about the time, place, race they belong to. They never had identity crisis because of which they have not left any clues about their history. Their main and sole aim was social welfare. One should keep in the mind that such lack of details of their personal life infact make them "सार्वजनीन", belonging to all.

According to Indian Epigraphical researches, Chandragupta was made king in 321 B.C., and Ashokavardhana ascended throne in 296 B.C. Therefore, it may be during this period that Acharya Kautilya had composed his magnum opus 'Arthasastra'.

The important system to be followed by each ruler is to keep a watch over the employees. Kautilya discusses in detail the way royal income is misappropriated. A few examples are given here to understand the सर्वतोमुखप्रतिभा of our author Kautilya. He describes the way royal income is misappropriated by the employees and also explains how to recover that misappropriated property from the employees. "All the undertakings are rooted in the treasury (Kosa), hence, one should look into the financial affairs" - says Kautilya. "**कोशपूर्वाः सर्वारम्भाः। तस्मात् पूर्वं कोशमवेक्षेत।**"(K.A. 2-8-1,2). He gives the list of

the ways of embezzlement. They are - entering the first received (revenue) as received afterwards, showing the revenue received late as received earlier, to be carried out as not carried out, already carried out as not carried out and vice-versa so on.

Shamasastry's translation for the offences is as follows -

1. What is realized earlier is entered later on.
2. What is realized later is entered earlier.
3. What ought to be realized is not realized.
4. What is hard to realize is shown as realized.
5. What is collected is shown as not collected.
6. What has not been collected is shown as collected.
7. What is collected in part is entered as collected in full.
8. What is collected in full is entered as collected in part.
9. What is collected is of one sort, while what is entered is of another sort.
10. What is realized from one source is shown as realized from another.
11. Payble is not paid.
12. Not payable is paid.
13. Not paid in time.
14. Paid untimely.
15. Small gifts made large gifts.
16. Large gifts made small gifts.
17. Gifted is of one sort, entered as of another.
18. The real done is one while the person entered (in the register) as done is another.
19. What has been taken into (treasury) is removed.
20. What has not been credited is shown as credited.
21. Raw materials (forest produce) that are not paid are entered.

22. Those (the above) paid are not entered.
23. An aggregate is scattered in pieces.
24. Scattered items are converted into an aggregate.
25. Commodities of greater value are bartered for those of small value.
26. What is smaller value is bartered for that of greater value.
27. Price of commodities enhanced.
28. Price of commodities lowered.
29. The year not in harmony with its months.
30. The months not in harmony with its days.
31. Inconsistency in the transactions.
32. Misrepresentation of the source of income.
33. Discrepancy regarding worksmen.
34. Discrepancy in representing the work turned out.
35. Inconsistency in dealing with fixed items.
36. Discrepancy in the quality of commodity.
37. Misrepresentation of prices of commodity.
38. Making use of false weights.
39. Making use of false measures.
40. Making use of false cubic measures (Bhajana). - (K.A. 2.8)

This description lays guide lines to check the concerned officers in various departments. The information is so relevant that these means of grabbing the revenue are found used in present day system also.

As stated by the author, the Arthasastra is composed not exclusively for Chandragupta Maurya but for the rulers in general. He has gone through all the sciences (related to the Administration) not only theoritically but also practically and then composed this treatise for the sake of Kings.

**सर्वशास्त्राण्यनुक्रम्य प्रयोगमुपलभ्य च।**
**कौटिल्येन नरेन्द्रार्थे शासनस्य विधिः कृतः।।** (K.A. 2-10-63)

Acharya Kautilya compares the employees dealing with money matters to fish in the water. He says that just as it is not possible to know the fish swallowing the water being under water, so is the position of the employees which is difficult to know how they eat the royal income.

**मत्स्याः यथान्तःसलिले चरन्तो ज्ञातुं न शक्याः सलिलं पिबन्तः।**
**युक्तास्तथा कार्यविधौ नियुक्ता ज्ञातुं न शक्या धनमाददानाः।।** (K.A. 2-9-33)

He also explains how it is impossible not to swallow the revenue even a little like a drop of honey or poision on the tip of the tongue which enters into mouth without any effort and cannot be stopped. Thus Acharya Kautilya is aware of the human weakness and has a soft corner for them. Hence, if the offence is minor the punishment is also mild. His statement regarding the Justice is "यथापराध दण्डः" - The punishment should be in accordance with the offences.

Kautilya's Arthasastra is a great treatise which shows a flowery path to human beings. It is indeed a sastra (शास्ति इति शास्त्रम्) which instructs the people.

The Kautilyan policy should be proclaimed by every ruler, as follows -

**प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।**
**नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्।।** (K.A. 1-19-33)

The happiness of the king lies in the happiness of the people, their welfare is his welfare and whatever is pleasing to the people it is good for him, not the things good that which pleases him.

### Bibliography

1. Kautilya's Arthasastra, 9th Edn., R.Shamashastry, Padam Printers, Mysore.
2. The Kautilya Arthasastra - Part I & II, R.P. Kangle, Motilal Banarasidas, Reprint, Delhi, 1986.

ISSN: 2231-0452

# The Kamadogdhree Commentary on Suryasiddhanta of Sri Tammayajvan

***Prof. A. Sripada Bhat***
*(Professor of Jyotisha, Rashtriya Sanskrit Vidyapeetha, Tirupati)*

We shall keep in mind that the literature now available in printed-form was written in the manuscripts earlier. These manuscripts have been preserved in different repositories of the country. The thousands of texts which have been preserved to us are not original copies of the texts but merely copies of copies to an undetermined degree. We are thus indebted to the ancient scribes for the great heritage preserved for us in the surviving or extant manuscripts.

Though part of manuscripts preserved in different repositories have been edited and published, a large number of manuscripts are still unedited waiting for the light of the day. These valuable manuscripts demand the concerted efforts of generation of scholars. If they are not edited they would remain unnoticed. It is unfortunate that we have irretrievably lost many numbers of manuscripts owing to different reasons. We have often references to the texts of known authors in existing manuscripts which are not discovered so far. It is needless to say that a large number of manuscripts pertaining to astronomy and mathematics have been lying in the libraries of the country.

In this article I shall discuss about an Ancient Astronomical text which is not yet published.

It is well known fact that the Suryasiddhanta is a basic primary text of Ancient Indian Astronomy. Popularity of this text can be known by the number of commentaries it has. Though more than 50 Sanskrit commentaries were written by different scholars, only a few are available now. The Kamadogdhree commentary of Tammayajwa is one among them. The uniqueness of this commentary is, this is a Sodaharanateeka (a commentary with examples). Since the Suryasiddhanta is a Siddhanta text where the astronomical computations are based on Kalpa and Yugas involving large numbers hence nobody ventures to give examples which are laborious and cumbersome. Of course there are commentaries on Karana texts with examples. These Karana texts are designed to lighten the work of calculations and produce quick and more accurate results. A contemporary date of the sunrise where a conjunction of the sun and the moon is chosen as the epoch and the longitude of the other planets were determined for this moment and computations were made with this epoch as the basis in these Karana texts.

Tammayajwa was the son of Venkatamba and Mallayajwa. He wrote Kamadogdhree commentary in the Saka year 421(1599 A.D) in the town of Srighanagiri. This town was located somewhere near Karnataka Andhra border.

As he himself mentions in his commentary ''भूमध्यरेखायाः प्राक्भागे दशयोजनान्तरिते लङ्कायाः उत्तरतः रामचन्द्रनयन(213)मितयोजनान्तरिते श्रीविद्यानगरस्य आग्नेयदिग्भागे श्रीशैलस्य नैर्ऋत्यभागे श्रीघनगिरिनगर्यां स्थितोऽहम्।'' In this commentary in Triprasnadhikara, he gives Palabha (Equinoctial shadow) of his place as 3-20 Angulas. So the latitude of the place is $15^{O}.31^{1}.54^{11}$.

Sri Tammayajwa clarifies the reason for writing this commentary. His father was in the court of Sri Venkatapatiraya. There was a chal-

lenge in the court that the scholar who can write a commentary to Suryasiddhanta with examples will be called great. Tammayajwa took the challenge as desired by his father and wrote this commentary named Kamadogdhree. The name of the commentary itself illustrates the profoundness of the commentary. According to epics, the heavenly cow which yields all desires is Kamadogdhree or Kamadhenu. The in-depth knowledge of the commentator can be gauged by his references pertaining to Vyakarana, Mimamsa, Nyaya and such other branches of Sanskrit literature. It is needless to say that his mathematical and astronomical excellence brightly reflects in the Kamadogdhri commentary.

Sri Tammayajwa begins his commentary with this Mangalacharana -

श्रीविद्यां हृदयस्थितां शिवमयीं श्रीमत्समाराधितां
कामाक्षीं करुणाकटाक्षकलितां कल्याणसन्दायिनीम्।
कोदण्डाङ्कुशपाशबाणविलसद्धस्तां प्रसन्नाननां
सिन्दूरारुणदेहकान्तिमनिशं श्रीहोन्नमाम्बां भजे।।[1]

While commenting on the Suryasiddhanta, Tammayajwa states-

"मदुक्तसोमनाथपद्धत्यां, मदुक्तसिद्धान्तसार्वभौमे, मदुक्तग्रहणगणितभास्करे, मदुक्तमौहूर्तिकमण्डने"

By these statements we can assume that Sri Tammayajwa might have written these texts apart from this commentary.

For all observational purposes determination of the Lagna or the ascendant is very important aspect in Ancient Indian Astronomy. The point of intersection of the ecliptic with the eastern horizon at a given point of time in a place is called Lagna. The importance of Lagna is

more in fixing Muhurtas and in astrology. To compute Lagna the rising time of the Rasis (Zodiac Signs) at a given place is very important factor. Because of the obliquity of the ecliptic the 12 Rasis (Zodiac Signs) never rise with equal time even at the equator though each consists 30 degrees. At the places other than equator they become more oblique hence rising time of Rasis (Zodiac Signs) differs.

Tammayajwa in his commentary has illustrated this subject at length with his own examples. He gave the methods of finding the rising times of the Rasis (Zodiac Signs) at the equator and at his own place with examples. Apart from this to get more accurate result he shows the computation method of finding the rising time of smaller areas like Hora (15º) and Drekkana(10º). These interesting and novel methods will be broadly discussed in the paper.

The ecliptic is measured along the Zodiac which is divided into twelve equal parts known as Rashis or signs. Signifying the shape of the constellations they are named as Mesha, Vrishbha etc..,. But these names are given when the star Ashwini was at the intersection point of the Ecliptic and the celestial equator. It is well known fact that at present the star Ashvini is not at the point of vernal equinox.

The vernal equinox is the beginning point of Mesha and its ending point is at a distance of 30º which is beginning point of Vrishabha and so on the other rasis. The signs appear as rising consecutively above the horizon and make a complete circle in about 24 hours. But because of the obliquity of the ecliptic, each sign does not rise equally by two hours. The sign which is oblique at the time of rising take shorter time and the rasis that are up right at the time of rising take more time to rise. Again the rising times of the rasis differ from place to place due to the latitudes.

As it is already mentioned, to compute the lagna at given place at desired time rising times of the rasis are to be ascertained first. In this Kamadogdhree commentary of Suryasiddhanta, the commentator illustrates the method to find out the rising time of the signs at the equatorial horizon and at his own place.

त्रिभद्युकर्णार्धगुणाः स्वाहोरात्रार्धभाजिताः।
स्वाधोऽधः परिशोध्याथ मेषाल्लङ्कोदयासवः।। (S.S. 42-43)

The commentator explains the formula of Surya Siddhanta as below.

I. $\dfrac{30^\circ \text{ ज्या x त्रिराशिद्युज्या}}{\text{एकराशिद्युज्या}} = \dfrac{\text{sine of } 30^\circ \text{ x Day radius of } 90^\circ}{\text{Day radius of } 30^\circ}$

II. $\dfrac{60^\circ \text{ ज्या x त्रिराशिद्युज्या}}{\text{द्विराशिद्युज्या}} = \dfrac{\text{sine of } 60^\circ \text{ x Day radius of } 90^\circ}{\text{Day radius of } 60^\circ}$

III. $\dfrac{90^\circ \text{ ज्या (त्रिज्या) x त्रिराशिद्युज्या}}{\text{त्रिराशिद्युज्या}} = \dfrac{\text{sine of } 90^\circ \text{ x Day radius of } 90^\circ}{\text{Day radius of } 90^\circ}$

I. $\dfrac{1719 \text{ x } 3139 - 48}{3365 - 36} = 1603 - 40 \text{ arc } 1699 - 36$

II. $\dfrac{2798 \text{ x } 3139 - 48}{3216 - 28} = 2907 - 1 \text{ arc } 3465 - 47$

III. $\dfrac{3438 \text{ x } 3139 - 48}{3139 – 48} = 3438 \text{ arc } = 5400$




abcdk = Ecliptic

agfek = Celestial Equator

p = Pole

ab = $30^0$ Mesha

bc = Vrushabha

cd = Mithuna

pb = $30^0$ Dyujya

pc = $60^0$ dyujya

pd = $90^0$ dyujya

ag = The rising time of mesha

gf = The rising time of Vrushabha

fe = The rising time of Mithuna

bg = $30^0$ declination

cf = $60^0$ declination

de = $90^0$ declination

The arc of I is the rising time of Mesha.

The arc of II is the rising time of Mesha and Vrishabha.

The arc of III is the rising time of Mesha, Vrishabha and Mithuna.

I = Rising time of Mesha = 1670

II - I = rising time of Vrishabha (3465- 47) – (1670) =1795

III – II = rising time of Mithuna (5400 – 3465 -47) = 1935

The rising times of next three signs Karka, Simha and Kanya can be found by reversing the order of the above signs as declinations at the beginning points of these signs are same as the declinations of the ending points of the first three signs in the reverse order. The rising timing of next six signs Tula to Meena are the same as that of First six signs.

खगाष्टयोऽर्थगोऽगैकाः शरत्र्यङ्कहिमांशवः।
स्वदेशचरखण्डोना भवन्तीष्टोदयासवः।।
व्यस्ता व्यस्तैर्युताः स्वैः स्वैः कर्कटाद्यास्ततस्त्रयः।
उत्क्रमेण षडेवैते भवन्तीष्टास्तुलादयः।। (S.S 03.44,45)

Next the commentator Sri Tammayajwa computes the rising times of the twelve signs at his place. First he computes the chara segments (Ascensional difference)of the signs. The पलभा (Equinoctial Shadow) of his place is 3 – 20 angulas.

क्रान्तिज्या विषुवद्भाघ्नी क्षितिज्या द्वादशोद्धृता।
त्रिज्या गुणाहोरात्रार्धकणाप्ता क्षितिज्या चरजासवः।।

According to the method mentioned above –

I $\frac{698 - 30 \text{ x } 3\text{-}20}{12} \text{ x } \frac{3438}{3365\text{-}36} = 198$

II $\frac{1210\text{-}5 \text{ x } 3\text{-}20}{12} \text{ x } \frac{3438}{3216} = 360$

III $\frac{1397 \text{ x } 3\text{-}20}{12} \text{ x } \frac{3438}{3319\text{-}48} = 426$

These chara segments are to be subtracted from the rising times of the respective signs at the equatorial horizon. The remainders are the rising times of three signs at the place of the commentator.

Mesha 1670 – 198 = 1472
Vrishabha 1795 – 162 = 1633
Mithuna 1935 – 66 = 1869

The rising times of next three signs Karka, Simha and Kanya are obtained by adding these chara segments in reverse order to the rising times of these three signs in the reverse order.

Karka 1935 + 66 = 2001
Simha 1795 + 162 = 1957
Kanya 1670 + 198 = 1868

The rising times of six signs beginning from Mesha to Kanya are to be reversed to get the rising times of six signs Tula to Meena. Thus the commentator has prepared the table showing the rising times of the twelve signs at his own place.

| Name of the Rasis (Zodiac Signs) | Mesha (Aries) | Vrishabha (Taurus) | Mithuna (Gemini) | Karka (Cancer) | Simha (Leo) | Kanya (Virgo) |
|---|---|---|---|---|---|---|
| Rising time at the equator | 1670 | 1795 | 1935 | 1935 | 1795 | 1670 |
| Rising time at the place of the commentator | 1472 | 1633 | 1869 | 2001 | 1957 | 1868 |

| Name of the Rasis (Zodiac Signs) | Tula (Libra) | Vrischika (Scorpio) | Dhanu (Sagi-ttarius) | Makara (Capri-corn) | Kumbha (Aqua-rius) | Meena (Pisces) |
|---|---|---|---|---|---|---|
| Rising time at the equator | 1670 | 1795 | 1935 | 1935 | 1795 | 1670 |
| Rising time at the place of the commentator | 1868 | 1957 | 2001 | 1869 | 1633 | 1472 |

The finding of rising times of big arcs of ecliptic like Rasis of $30^0$ is approximate, the commentator shows the method of finding the rising times of smaller areas like Horas ($15^0$) and Drekkanas ($10^0$) with own example and prepared a table in his commentary. This cannot be found in other commentaries of SuryaSiddhanta. With the help of this table one can find more accurate point of Lagna.

$$\frac{15^o \text{ ज्या} \times 90^o \text{ द्युज्या}}{15^o \text{ द्युज्या}} = \frac{790 \times 3140}{3418}$$

$$\frac{30^o \text{ ज्या} \times 90^o \text{ द्युज्या}}{30^o \text{ द्युज्या}} = \frac{1719 \times 3140}{3366}$$

$$\frac{45^o \text{ ज्या} \times 90^o \text{ द्युज्या}}{45^o \text{ द्युज्या}} = \frac{2431 \times 3140}{3292}$$

$$\frac{60^o \text{ ज्या} \times 90^o \text{ द्युज्या}}{60^o \text{ द्युज्या}} = \frac{2978 \times 3140}{3217}$$

$$\frac{75^o \text{ ज्या x } 90^o \text{ द्युज्या}}{75^o \text{ द्युज्या}} = \frac{3321 \text{ x } 3140}{3217}$$

$$\frac{90^o \text{ ज्या x } 90^o \text{ द्युज्या}}{90^o \text{ द्युज्या}} = \frac{3438 \text{ x } 3140}{3140}$$

The Arcs of above signs are as below.

| | | | | |
|---|---|---|---|---|
| I. | $15^0$ | = 825 – 37 | = | = 826 |
| II. | $30^0$ | = 1669 – 30 | = 1669.30 – 825.37 | = 844 |
| III. | $45^0$ | = 2545 – 50 | = 2545.58 – 1669.30 | = 877 |
| IV. | $60^0$ | = 3465 – 13 | = 3465.13 – 2545.58 | = 929 |
| V. | $75^0$ | = 4422 – 10 | = 4422.10 – 3465.13 | = 956 |
| VI. | $90^0$ | = 5400 – 00 | = 5400.00 – 4422.10 | = 978. |

These figures are the rising timings of the arcs of every $15^0$ from Mesha to the end of Mithuna. These are in verse in order 978, 956, 929, 877, 844 and 826 are the rising times of the Arcs of every $15^0$ from Karka to Kanya. It is needless to say the rising times of the arcs of every $15^0$ from Tula to Meena are the rising times of the arcs of every $15^0$ from Mesha to Kanya. This is already shown in the table of Hora ($15^0$) These rising times of every Hora of Rasis is only at the equatorial Horizon. To obtain the rising times of Horas (every $15^0$) at the commentators place chara segments of each $15^0$ are to be computed. They are to be subtracted from the risings times of the arcs of each $15^0$ beginning from Mesha and to be added to the rising times of the arcs of every $15^0$ beginning from Karka respectively. The rising times of the arcs of every $15^0$ beginning from Tula to Meena are as of Kanya to Mesha in reverse order. This has been already shown by the commentator in the table.

Table showing the rising times of **Hora** (15 Degrees)

| Name of the Rasis (Zodiac Signs) | Mesha (Aries) | | Vrishabha (Taurus) | | Mithuna (Gemini) | |
|---|---|---|---|---|---|---|
| | 1 | 2 | 3 | 4 | 5 | 6 |
| Rising time at the equator | 726 | 844 | 877 | 929 | 956 | 978 |
| Rising time at the place of the commentator | 735 | 756 | 798 | 853 | 913 | 963 |

| Name of the Rasis (Zodiac Signs) | Karka (Cancer) | | Simha (Leo) | | Kanya (Virgo) | |
|---|---|---|---|---|---|---|
| | 7 | 8 | 9 | 10 | 11 | 12 |
| Rising time at the equator | 978 | 956 | 919 | 877 | 844 | 826 |
| Rising time at the place of the commentator | 994 | 1000 | 984 | 956 | 932 | 917 |

| Name of the Rasis (Zodiac Signs) | Tula (Libra) | | Vrischika (Scorpio) | | Dhanu (Sagittarius) | |
|---|---|---|---|---|---|---|
| | 13 | 14 | 15 | 16 | 17 | 18 |
| Rising time at the equator | 826 | 844 | 877 | 919 | 956 | 978 |
| Rising time at the place of the commentator | 917 | 932 | 956 | 984 | 1000 | 994 |

| Name of the Rasis (Zodiac Signs) | Makara (Capricorn) | | Kumbha (Aquarius) | | Meena (Pisces) | |
|---|---|---|---|---|---|---|
| | 19 | 20 | 21 | 22 | 23 | 24 |
| Rising time at the equator | 978 | 956 | 929 | 877 | 844 | 726 |
| Rising time at the place of the commentator | 963 | 913 | 853 | 798 | 756 | 735 |

The commentator Sri Tammayajva similarly computed the rising times of the arcs of every $10^0$ from Mesha to Meena for equatorial horizon and for his own place and prepared table in his commentary.

Table showing the rising times of **Drekkana** (10 Degrees)

| Name of the Rasis (Zodiac Signs) | Mesha (Aries) | | | Vrishabha (Taurus) | | | Mithuna (Gemini) | | |
|---|---|---|---|---|---|---|---|---|---|
| | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 |
| Rising time at the equator | 549 | 554 | 567 | 576 | 599 | 620 | 625 | 647 | 663 |
| Rising time at the place of the commentator | 488 | 494 | 509 | 522 | 550 | 578 | 592 | 626 | 657 |

| Name of the Rasis (Zodiac Signs) | Karka (Cancer) | | | Simha (Leo) | | | Kanya (Virgo) | | |
|---|---|---|---|---|---|---|---|---|---|
| | 10 | 11 | 12 | 13 | 14 | 15 | 16 | 17 | 18 |
| Rising time at the equator | 663 | 647 | 625 | 620 | 599 | 576 | 567 | 554 | 549 |
| Rising time at the place of the commentator | 670 | 667 | 656 | 662 | 664 | 631 | 624 | 614 | 610 |

| Name of the Rasis (Zodiac Signs) | Tula (Libra) | | | Vrischika (Scorpio) | | | Dhanu (Sagittarius) | | |
|---|---|---|---|---|---|---|---|---|---|
| | 19 | 20 | 21 | 22 | 23 | 24 | 25 | 26 | 27 |
| Rising time at the equator | 549 | 554 | 567 | 576 | 599 | 620 | 625 | 647 | 663 |
| Rising time at the place of the commentator | 610 | 614 | 624 | 631 | 664 | 662 | 656 | 667 | 670 |

| Name of the Rasis (Zodiac Signs) | Makara (Capricorn) | | | Kumbha (Aquarius) | | | Meena (Pisces) | | |
|---|---|---|---|---|---|---|---|---|---|
| | 28 | 29 | 30 | 31 | 32 | 33 | 34 | 35 | 36 |
| Rising time at the equator | 663 | 647 | 625 | 620 | 599 | 576 | 567 | 554 | 549 |
| Rising time at the place of the commentator | 657 | 626 | 592 | 598 | 550 | 522 | 509 | 494 | 488 |

Sri Tammayajwa at number of places gives examples and clarifies the doubts of the reader and makes the subject clear. His profound knowledge in other disciplines of Sanskrit literature also gets reflected in his Commentary. I have no second thoughts to conclude that this Commentary named Kamadogdhree of Sri Tammayajwa is true to its name.

## Bibliography


1. ''Tammayajvaviracitayah kamadodhryakhyayah suryasiddhantatikayah sampadanam adhyayananca" by Dr.Gopalakrishna Hegde.
2. Sritatvamrutabhashya of Surya Siddhanta of Kapileswara Sastry published by Chowkamba Sanskrit Bhavan, Varanasi, 2011.
3. Sidhanta Siromani with Vasanabhasya of Bhaskaracharya Edited by Sri Bapudevasastri, published by Chowkamba Samkruta Samstan, 2005.
4. Facets of Indian Astronomy by Prof. K.V.Sarma, published by R.S.Vidyapeetha Tirupati. Series -200, Year – 2009.

ISSN: 2231-0452

# वैखानसशुल्बसूत्रम्

*आचार्य वेदान्तं श्रीविष्णुभट्टाचार्युलु*
*(आचार्यः, आगमविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

अपौरुषेयो हि वेदः पूर्वोत्तरभागात्मकत्वेन द्विधा विभक्तः। यज्ञकर्मानुष्ठानार्थं निर्दिष्टाः मन्त्राः पूर्वभागे ब्रह्मतत्त्वविचारार्थं निर्दिष्टाः मन्त्राः उत्तरभागे च विधीयन्ते। वेदस्य प्रधानोपदेशः अंशः कर्मणा ब्रह्मणः आराधनमेव। पूर्वभागस्य पूर्वमीमांसा उत्तरभागस्य उत्तरमीमांसा इति तयोर्नाम भवतः। हविर्यज्ञ-सोमयज्ञ-विशेषयागादीनां काल-आचरणविधानं तेषां भेदानां स्वरूपनिरूपणं साङ्गोपाङ्गं सविशदं समन्त्रकमुपदिश्यते पूर्वमीमांसायाम्।

शिक्षादिषु षट्सु वेदाङ्गेषु कल्पं हस्तसदृशं भवति। कल्पमिदं प्रत्येकवेदशाखा सम्बद्धं स्यात्। एकैकस्यां वेदशाखायां बहूनि कल्पसूत्राणि विद्यन्ते। शरीरसंस्कारान् यज्ञान् आश्रमधर्मान् तेषां भेदांश्च कल्पसूत्रमुपदिशति। सूत्रमिदं तावत् स्मार्त-धर्म-प्रवर-पितृमेध-श्रौत-शुल्ब इति विषयानुरोधेन भिद्यते। एतेषु शुल्बसूत्रं प्रति विचारयामः।

सम्प्रति बोधायन-कात्यायन-आपस्तम्ब-हिरण्यकेशि-मानव-मैत्रायणीय-वाराह-वाधूलेत्यष्टौ शुल्बसूत्राण्येव उपलब्धानि। सर्वासां वेदशाखानां शुल्बसूत्राणि अद्य नोपलभ्यन्ते च। अत्र कात्यायनशुल्बसूत्रं तावत् शुक्लयजुर्वेदसम्बद्धं बोधायन-आपस्तम्ब- मानव-मैत्रायणीय-वाराहशुल्बसूत्राणि कृष्णयजुर्वेदतैत्तिरीयशाखासम्बद्धानि च भवन्ति।

**सूत्राणां कालनिर्णयः**

कल्पसूत्राणां कालनिर्णयविषये प्राच्य-पाश्चात्य विदुषोः नैकमत्यमावहति। सृष्ट्यादौ चतुर्मुखब्रह्मणः सकाशात् बोधायन-आपस्तम्ब-वैखानसादयः महर्षयः सञ्जाताः वर्तन्ते इति हेतोः एतेषां कालः असौ इति वक्तुं नैव शक्यते इति प्राच्यविदुषामभिप्रायः। पाश्चात्यविद्वांसः अभिप्रयन्ति कांश्चनहेतून् मनसि निधाय

| | |
|---|---|
| बोधायनसूत्रम् | 500 B.C |
| मानवसूत्रम् | 450 B.C |
| आश्वलायनसूत्रम् | 430 B.C |
| सांख्यायनसूत्रम् | 430 B.C |
| भारद्वाजसूत्रम् | 420 B.C |
| आपस्तम्बसूत्रम् | 400 B.C |
| हिरण्यकेशीयसूत्रम् | 375 B.C |
| वैखानससूत्रम् | 350 B.C |
| कात्यायनसूत्रम् | 200 B.C इति (क्रिस्तोः प्राक्) एतानि सूत्राणि समुत्पादितानीति। |

**श्रौतसूत्राणि**

स्मार्तसूत्रेषु संस्काराः प्रवरसूत्रेषु गोत्रप्रवरविधानं धर्मसूत्रेषु आश्रमधर्माः तेषाम् आचरणविधानं च सम्यक् उपदिश्यन्ते। श्रौतसूत्रेषु तावत् अग्न्याधेयं-अग्निहोत्रं- दर्शपूर्णमासौ-आग्रयणेष्टिः-चातुर्मास्यः-निरूडपशुबन्धः-सौत्रामणीति सप्तहविर्यज्ञानां अग्निष्टोमः-अत्यग्निष्टोमः-उक्थ्यः-षोडशी-वाजपेयः-अतिरात्रः–अप्तोर्यामः इति सप्तहविर्यज्ञानामाचरण-काल-मन्त्र-प्रयोगविधानं सर्वं सुष्ठु विव्रियन्ते च।

**शुल्बसूत्राणि**

श्रौतसूत्राणां परिशिष्टरूपाणि शुल्बसूत्राणि। एतानि वेदी-सदः-कुण्ड-मण्डपादीनां सम्यक् साधनाय प्रवृत्तानि च। वेद्याद्याकारविशेषनिष्पादकघटना-विशेषादिनिरूपणपरमिदं सूत्रमिति अन्वर्थैव शुल्बसूत्रमिति संज्ञा प्रथते।

**सौरय्यविहिता वेदिः शुल्बविज्ञानसम्मिता[१]।।**

इति मैत्रायणीयशुल्बसूत्रवचनमाधारीकृत्य श्रौतसूत्रेषु ब्राह्मणग्रन्थानामुल्लेखेन ब्राह्मणग्रन्था एव श्रौतसूत्राणाम् आधारभूताः प्रमाणभूताः सन्तीति ज्ञायते। अत्र विज्ञानशब्देन ब्राह्मणमभिधीयते। अत्र शुल्बं नाम बर्हिसन्नहनम्। इध्मबन्धनार्थं इध्मसन्नहनमेव

शुल्बपदस्यार्थः। यज्ञकर्मणि कुण्डनिर्माणप्रसङ्गे मानार्थमुपयुज्यमाना रज्जुरेव शुल्बमिति फलितोऽर्थः। शुल्बपदं संनाहार्थकं स्यात्। यज्ञवेदीनामाकारस्वरूपयोर्निर्धारणाय प्राचीने भारते समधीतार्यैः ज्यामितिर्बीजगणितं शुल्बसूत्राणामनुशीलनेनैव साधितमभूत्।

**शुल्बसम्बद्धाः अंशाः**

रेखामानपरिभाषा समचतुरश्रकरणोपायः दीर्घचतुरश्रकरणोपायः समचतुरश्रयोः समसनप्रकारः दीर्घचतुरश्रस्य समचतुरश्रीकरणोपायः चतुरश्रस्य मण्डलकरणोपायः गार्हपत्यदक्षिणाहवनीयाग्नीनां स्थानानयनप्रकारः अग्निष्टोमवेदीविहरणोपायः प्रथमाग्निचयनेष्टकासंख्या इत्यादयः अंशाः शुल्बसम्बद्धाः भवन्ति।

संख्यानुरोधेन अङ्गुलानां नामानि नैकविधानि स्युः। तानि यथा -

१४ अणवः एकमङ्गुलम्

१० अङ्गुलानि एकं क्षुद्रपदम्

१२ अङ्गुलानि एकः प्रादेशः

१३ अङ्गुलानि एकं पृथोत्तरयुगम्

१५ अङ्गुलानि एकं पदम्

८८ अङ्गुलानि एका ईषा

१०४ अङ्गुलानि एकमक्षः

८६ अङ्गुलानि एकं युगम्

३२ अङ्गुलानि एका जानुः

३६ अङ्गुलानि एका शम्या

अरत्निः नाम द्वौ प्रादेशौ

पुरुषः नाम पञ्चारत्नयः (२४ x ५ = १२० अङ्गुलानि)

इति आपस्तम्बशुल्बसूत्रं[२] बोधायनशुल्बसूत्रं[३] च उपदिशति।

**अथ वै श्येनचितं चिन्वीति स्वर्गकाम इति**[४]।।

इत्युक्तरीत्या श्येनाख्यपक्ष्याकारेण स्वर्गकामः कुण्डं कृत्वा तस्मिन् यज्ञं कारयेदिति तत्रैव **श्येनेनाभिचरन् यजेत** इति श्रुतिसमन्वयरीत्या यज्ञविधानं सम्यगुपदिश्यते आपस्तम्बमुनिना स्वीयशुल्बसूत्रे।

**आयामतृतीयेन त्रीणि चतुरस्राणि अनुचीनानि कारयेत्**[५]।।

**अपरस्य उत्तरस्यां श्रोण्यां गार्हपत्यः**[६]।।

**तस्यैव दक्षिणेंऽसे अन्वाहार्यपचनः**[७]।।

**पूर्वस्योत्तरेंऽस आहवनीयः**[८]।।

इत्यादयः विशिष्टाः अंशाः शुल्बसूत्रेषु उपदिश्यन्ते। प्रासङ्गिकं परिसमाप्य तैत्तिरीयशाखासम्बद्धस्य वैखानससूत्रस्य समीक्षां पश्यामः।

**वैखानसकल्पसूत्रम्**

श्रौत-स्मार्त-धर्म-प्रवरविभागैः द्वात्रिंशत् प्रश्नात्मकैश्च संयुक्तं वैखानसकल्पसूत्रं विखनोमुनिना संदृब्धं वैखानसागमस्य मूलभूतं आपस्तम्ब-बोधायनादिभिः समादृतं दैविकं विष्णुपारम्यप्रतिपादकं अष्टादशसंस्कारैः संयुक्तं साङ्गक्रियाकलापसहितं श्रुतिमार्गोपेतं समन्त्रकसर्वक्रियाप्रतिपादकं च भवतीति ज्ञायते।

श्रौतसूत्रे तावत् हविर्यज्ञाः सोमयज्ञाश्च सम्यगुपदिष्टास्सन्ति तत्र। वैखानसागमोऽपि श्रौतक्रियासदृशः एव। वैखानसश्रौतसूत्रसम्बद्धं शुल्बं सर्वं प्रत्येकतया वैखानस-शुल्बसूत्ररूपेण नोपदिश्यते। वैखानसागम-वैखानसश्रौतयोः यत्र यत्र शुल्बं आवश्यकं तत्सर्वं तत्तत् प्रकरणोपादेशसन्दर्भे एव उपदिष्टं वर्तते न पृथक्तया। तत् संक्षेपेण पश्यामः

**वैखानसशुल्बसूत्रम्**

सर्वेषां शारीरककर्मणां निर्दिष्टः होमः अवश्यं सर्वैः अनुष्ठेयः। होमकर्मणि आदौ अग्निकुण्डं निर्मापणीयम्। तत् प्रसङ्गे अग्न्यायतनस्य औपासनाग्नेश्च स्थानानि कथं कल्पनीयानि इति वैखानसगृह्यसूत्रे स्पष्टम् उपदिश्यते। तत् पश्यामः -

**अग्न्यायतनलक्षणम्**

प्राक् पश्चिमं दक्षिणोत्तरं द्वात्रिंशदङ्गुलायतनं द्व्यङ्गुलोन्नतं भवत्विति अग्न्यायतन-लक्षणमुपदिश्यते[९]।

**औपासनाग्नेः लक्षणम्**

औपासनाग्निकुण्डं तावत् चतुर्दिशं द्वात्रिंशदङ्गुलायतां चतुरङ्गुलविस्तारां द्व्यङ्गुलोन्नताम् ऊर्ध्ववेदी तावत् चतुरङ्गुलविस्तारा भवतु इति वैखानसगृह्यसूत्रस्य[१०] उपदेशः।

नवग्रहयज्ञकर्मणि नवानां ग्रहाणां पीठानि परिकल्प्य तेषु तेषु पीठेषु तान् ग्रहान् आवाह्य अर्चनीयं भवेत्। तत्र तानि पीठानि यथा-

**नवग्रहपीठानि**

चतुरस्र-वृत्त-तुट्याकार-त्रिकोण-अष्टाश्र-अर्धचन्द्राकार-वज्राकार-दण्डाकृति-ध्वजाकृतीति नवानां पीठानां कल्पनं ग्रहाणामुद्दिश्य भवन्तु इति स्मार्तसूत्रोपदेशः।

वानप्रस्थाश्रमस्वीकारसन्दर्भे वनस्थः श्रामणकाग्निकुण्डं विनिर्मीय तस्मिन् विशेषहोमः अवश्यमनुष्ठेयः। तस्मिन् प्रकरणे श्रामणकाग्निकुण्डकल्पनं स्पष्टमुपदिश्यते वैखानसधर्मसूत्रे।

**श्रामणकाग्निकुण्डकल्पनम्**

श्रामणकाग्निकुण्डं तावत् ऊर्ध्ववेदिः द्वात्रिंशदङ्गुलायता चतुरङ्गुलविस्तारोन्नता मध्यमावेदिः तावत् पञ्चाङ्गुलविस्तारा चतुरङ्गुलोन्नता ऊर्ध्ववेदिविस्तारसमोन्नता अधोवेदिः भवत्विति[१२]।

श्रौतयागेषु नियमानुसारं तत्तदग्निकुण्डकल्पनं करणीयम्। तद्यथा -

**गार्हपत्य-अन्वाहार्य-सभ्य-आवसथ्यकुण्डनिर्माणप्रकारः**

रज्ज्वा अष्टादशाङ्गुलिभिः वृत्तभ्रमणेन गार्हपत्यायतनं पञ्चविंशत्यङ्गुलीभिः दक्षिणे अर्धचन्द्राकृतिभ्रमणेन अन्वाहार्यं, द्वादशाङ्गुलोन्नतेन चतुरश्राकृतिभ्रमणेन सभ्यं पश्चिम-

दक्षिणोत्तरेषु त्रिकोणाकृतिभ्रमणेन पञ्चचत्वारिंशदङ्गुलीभिः आवसथ्यकुण्डं च यथाक्रमं कल्पनीयं भवतीति वैखानसश्रौतसूत्रोपदेशः[१३]। क्रमेण भूलोक - भुवर्लोक - जनोलोक - महर्लोकाकारैः गार्हपत्यादीनां कुण्डकल्पनं विधीयते वैखानसागमेऽपि भृगुणा[१४]। श्रौतोक्तपरिमाणं भ्रमणम् आकृतिकल्पनं सर्वं शुल्बसाहाय्येन रज्जुभ्रमणेन सूत्रानुसारं च साधनीयं भवेदत्र।

सिकतराशिं द्विधा कृत्वा तयोः अर्धभागं पुनः द्विधा विभज्य पादभागेन गार्हपत्यायतनकुण्डं निर्मापणीयम्। इतरेण पादभागेन दक्षिणाग्निस्वरूपं साधनीयम्। अवशिष्टमर्धभागं त्रिधा विभज्य क्रमेण सभ्य-आवसथ्य-आहवनीयाग्निकुण्डानि निर्मापणीयानि स्युः[१५]।

होमोपकरणानां पात्राणां प्रमाणान्यपि सुष्ठु विव्रियन्ते वैखानसश्रौतसूत्रे। जुहू-उपजुहू-स्रुक्-स्रुवं-स्फ्य-मेक्षणं-इडा-उलूखलं-मुसलं-पेषणी- आज्यस्थाली-चरुस्थाली इत्येतेषां पात्राणां निर्माणविधिः तेषाम् आकृतयः आयामविशालं च सर्वं प्रमाणानुरोधेन साधनीयं भवेदिति वैखानसश्रौतसूत्रसन्दर्भः[१६]।

इत्थं वैखानसकल्पसूत्रे शुल्बनियमाः तत्तत् सन्दर्भानुसारं श्रौत-स्मार्त-धर्मसूत्रेषु नैके उपदिष्टाः वर्तन्ते। अत्र प्रसङ्गेऽस्मिन् केचनांशाः एव ग्राह्याः अभवन्।

**उपसंहारः**

वैखानसकल्पसूत्रे उपदिष्टं यत् शुल्बं तदेव वैखानसागमवाङ्मयस्यापि आधारभूतमभूत्। अग्निकुण्डनिर्माणानुसारमालयस्य स्वरूपं साधनीयम्। विमान- विमानाङ्ग-पात्रपरिच्छदादीनां निर्माणविधि-बेरकल्पन-बेरसंख्या-मण्डपादीनां कल्पनं, पृथगालयविधानं द्वारकल्पनम् एतानि सर्वाणि शुल्बनियमानुसारं संसाध्य यज्ञपुरुषं श्रीमन्नारायणं संपूज्य धन्याः पुनीताः पावनाः भवन्तु इति श्रीविखनोमुनेः उपदेशसर्वस्वः। एतद्वैखानससूत्रं वैखानसागमं च सम्यगधीत्य ऋषिऋणात् देवऋणात् च मुक्ताः भवन्तु **सर्वे सन्तु निरामयाः** इति च आशास्य विरमामि।

**नित्यकर्मभिः श्रेयः स्यात् श्रौतैः स्मार्तैश्च।**

## सन्दर्भाः

१. मैत्रायणीयशुल्बसूत्रम्.१,६
२. प्रथमोऽध्यायः
३. कपर्दिभाष्यम्
४. आपस्तम्बशुल्बसूत्रम्.३,१
५. तत्रैव.१,५२
६. तत्रैव. १,५३
७. तत्रैव. १.५४
८. तत्रैव. १,५५
९. प्राक् प्रवणेवोत्तरप्रवणे वा शुद्धे देशे गोमयेनोपलिप्ते शुद्धाभिस्सिकताभिः प्राक्पश्चिमं दक्षिणोत्तरं च द्वात्रिंशदङ्गुलायतं द्व्यङ्गुलोन्नतं यथालाभोन्नतं वा स्थण्डिलमग्न्यायतनं भवति।
- वैखानसस्मार्तसूत्रम्.१,८
१०. नित्यहोमेऽग्निशालायां मृदा चतुर्दिशं द्वात्रिंशदङ्गुलायतां चतुरङ्गुलविस्ताराद्व्यङ्गुलोन्नतामूर्ध्ववेदिं चतुरङ्गुलविस्तारोन्नतां तत् परिगतामधोवेदिं च मध्ये निम्नं षडङ्गुलमग्निकुण्डं कृत्वा अस्मिन् गृहस्थोऽग्निमौपासनमाधाय नित्यं जुहोति। - वैखानसस्मार्तसूत्रम्.१,८
११. तस्मिन् शुद्धे देशे मनोरमे गोमयेनोपलिप्ते स्वे स्वे स्थाने शालिव्रीहिभिः सिकताभिर्वा चतुरश्रं वृत्तं तुट्याकारं त्रिकोणमष्टाश्रमर्धचन्द्राकारं वज्राकारं दण्डाकृतिः ध्वजाकृतीति क्रमेण पीठान्युपकल्प्य........ अर्चयेत्। - वैखानसस्मार्तसूत्रम्.४,१३
१२. श्रामणकाग्नेश्चोर्ध्ववेदिर्द्वात्रिंशदङ्गुलायता चतुरङ्गुलविस्तारोन्नता मध्यमा तत्परिगता पञ्चाङ्गुलविस्तारा चतुरङ्गुलोत्सेधा अधस्तात् ऊर्ध्ववेदिविस्तारोन्नता तृतीयावेदिः द्वादशाङ्गुलं मध्ये निम्नं त्रिवेदिसहितं कुण्डं कृत्वा आधाय वनस्थो नित्यमौपासनवत् सायं प्रातराहुतीर्हुत्वा महाव्याहृतीभिः श्रामणकाग्निं जुहुयात्।
- वैखानसधर्मसूत्रम्.८,६
१३. वैखानसश्रौतसूत्रम् (प्रथमप्रश्ने द्वितीयतृतीयखण्डौ)
१४. क्रियाधिकारः ६ अध्यायः

१५. सिकातार्धं द्विधा कृत्वा अर्धं गार्हपत्यायतने निर्वपति। अर्धं दक्षिणाग्नेः इतरार्धं त्रिधा कृत्वा पूर्वेष्वायतनेषु सभ्यावसथ्ययोः अनारम्भे सर्वमाहवनीये। - वैखानसश्रौतसूत्रम्.१,९-१

१६. वैखानसश्रौतसूत्रम्.११,७ प्रभृति ९ खण्डाः

## आधारग्रन्थाः

१. आपस्तम्बशुल्बसूत्रम्, यूनिवर्सिटी आफ् मैसूर्, मैसूर् १९३१
२. बोधायनशुल्बसूत्रम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी १९७९
३. मैत्रायणीयशुल्बसूत्रम्, गीतम् नगर्, होशियारपुरम् २००१
४. वैखानसकल्पसूत्रम्, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः २००९
५. वैखानसश्रौतसूत्रम्, प्रसन्नलक्ष्मीपब्लिकेषन्स्, तिरुपतिः २००८

ISSN: 2231-0452

# प्राच्यविदुषां चिन्तनेषु मनोवैज्ञानिकतत्त्वानां विचारः

*डा. राधागोविन्दत्रिपाठी*
*(उपाचार्यः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

मनोऽधिकृत्य यद् विज्ञानं तन्मनोविज्ञानमिति। किन्तु अनेनैव मनोविज्ञानस्य व्याख्या न तावत् स्फुटीभवति यावद् वयं समस्तपदयोः मनोविज्ञानयोः पृथक् सविस्तरं विचारं न कुर्मः। प्राचीनदर्शनसाहित्ये विज्ञानशब्दो बहुषु अर्थेषु प्रयुक्तो दरीदृश्यते, यथा - आत्मज्ञानम्, बुद्धिः, क्षणिकचैतन्यसन्तानमित्यादयः। प्रथमार्थद्वये विज्ञानपदम् उपनिषत्सु प्रयुक्तं लभ्यते। तृतीयार्थे बौद्धदर्शने विज्ञानपदस्य प्रयोगः संलक्ष्यते, यथा हि - आलयविज्ञानम्, प्रवृत्तिविज्ञानम्, विज्ञानवाद इति (वसुबन्धुकृता विज्ञप्तिमात्रतासिद्धिः)। विशिष्टं ज्ञानं विज्ञानमिति निर्वचनम्। परिष्कृतं ज्ञानं विज्ञानम् इति। अस्ति हि विज्ञानस्य स्वकीया विशिष्टा परिष्कारशैली। तया यः सुपरिष्कृतो ज्ञानराशिः, स विज्ञानपदेन संसूच्यते। विज्ञानस्य प्रयोगः सार्वभौमः सार्वकालिकश्च भवति। यथा अनुसन्धानं भौतिक-रसायनादि-विज्ञानेषु प्रतिदिनं क्रियमाणं वर्तते, किञ्च नूतनत्वं तत्त्वमाविष्क्रियमाणं दृश्यते, तद्वत् मनोविज्ञानस्य विविधशाखासु शारीरिक-तुलनात्मक-बाल-व्यक्तित्वात्मक-सामाजिक-भेदान्वितशाखादिषु प्रयोगशालासु अनुसन्धानं जायमानमस्ति एवं नूतनविषयाणां प्रतिपादनं क्रियमाणमस्ति।

मनोविज्ञानाभिमतं मनसः स्वरूपं जानीमः। प्राचीनैः महर्षिप्रवरैः चैतन्यतत्त्वस्य सुमहती गवेषणा वेदेषु, उपनिषत्सु, दर्शनेषु च कृता वर्तते। सा च अध्यात्मविद्या-ब्रह्मविद्या-वेदान्ताद्यभिधानैः व्यवहृता दृश्यते। प्राचीनकाले मनोविज्ञानम् अध्यात्मदर्शनस्य अङ्गभूतमासीत्। श्रूयते हि बृहदारण्यकोपनिषदि मैत्रेयीं प्रति याज्ञवल्क्योक्तिः - **“आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, मैत्रेयात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्”**[१] इति। भगवता श्रीकृष्णेनापि - **“अध्यात्मविद्या**

**विद्यानाम् वादः प्रवदतामहम्**"[२] इति उक्त्वा अध्यात्मविद्याया महद् गौरवं प्रदर्शितम्। उपनिषत्सु अध्यात्मविद्या महता समादरेण सर्वविद्याप्रतिष्ठा इति उक्ता। विषयेऽस्मिन् किञ्चित् सादृश्ये सत्यपि नास्ति मनोविज्ञानमध्यात्मविद्याङ्गभूतं विज्ञानम्। इदं सत्यं यत् अध्यात्मविद्या चैतन्यतत्त्वं विवेचयति। परन्तु मनोवृत्तीनां सुविस्तृतं लोकव्यवहारानुगतम् अध्ययनं तस्याः न लक्ष्यम्, यादृशमर्वाचीनमनोविज्ञानस्य दृश्यते। भारतीयदार्शनिकैः मनसः उपरि स्वकीयाभिप्रायाः इत्थं प्रतिपादितास्सन्ति। यथा नैयायिकैः उक्तं यत् - "**सुखाद्युपलब्धिसाधनम् इन्द्रियं मनः**"। मनसि सुखदुःखेच्छाप्रयत्नधर्माधर्मसंस्कार-द्वेषगुणाः मनसि विद्यमानाः भवन्ति। परमाणुः इन्द्रियं निरवयवश्चेति तेषां मतम्। सुखादिगुणाः आत्ममनस्संयोगेन जायन्ते। तथैव ईश्वरकृष्णेन साङ्ख्यकारिकायाम् अपि उक्तम् - "**मनोऽपि साङ्ख्यैरिन्द्रियेतरवद् इन्द्रियमेवाभिमतम्**"[३] इति। वेदान्तिनः अपि स्वकीयाभिप्रायमित्थं प्रकटयन्ति यथा - "**वृत्तिभेदेन एकमप्यन्तःकरणं मन इति बुद्धिरिति अहङ्कार इति चित्तमिति च आख्यायते**"[४]। तदुक्तम् -

**मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम्।**
**संशयो निश्चयो गर्वः स्मरणं विषया इमे।।** इति।

यथा वायोः कृते उपाधिभेदेन भिन्नभिन्ननामानि परिकल्पितानि तद्वदेव मनसः वृत्तिभेदेन नामानि भवन्ति इति वेदान्तीनामभिप्रायः। अद्वैतसिद्धौ सदानन्दयतिनाऽपि मनसो सावयवत्वं भौतिकत्वं जडत्वं च प्रदर्शितमस्ति। अतः मनसः विषये केवलमर्वाचीनानां योगदानं वर्तते इति न कथनीयम्। भारतीयदर्शनेषु मनस्तत्त्वमाश्रित्य विविधचर्चाः अवलोक्यन्ते। पुनः अस्माभिः वाजसनेयिसंहितायां मनसः स्वरूपं विशदतया सम्यग् वर्णितं लक्ष्यते। श्रूयते यजुर्वेदे -

**यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।**
**दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु।।**[५]

इत्यादिषु षट्सु मन्त्रेषु मनसः क्रियाणामुल्लेखः प्रायशोऽर्वाचीनमनोवैज्ञानिकानामभितम् एव विद्यते। मनस्तु अत्र चैतन्यात्मकं वर्णितम्। ज्योतिषां प्रकाशकानां श्रोत्रादीनाम् एकमेव ज्योतिः प्रकाशकमिति महीधरः। जाग्रद्दशायां मनो दूरं गच्छति। दूरस्थान् विषयान् पश्यति

चिन्तयति वा। भारतीयदर्शनपारावरमहोदधौ तितिर्षुभिः अस्माभिः मनसः स्वरूपमधिकृत्य वालुकाकणान् संगृह्य अत्र दिङ्मात्रमेव प्रदर्शितम्। विशदविवेचनायाः नास्ति अत्र अवकाशः। अपि बहूनि मनोवैज्ञानिकतत्त्वानि प्राच्यवाङ्मये चर्चितानि सन्ति, तानि संक्षेपेणात्र उपस्थाप्यन्ते।

मनोविज्ञाने व्यक्तित्वमेकः प्रधानविषयः भवति। अर्वाचीनमनोविज्ञानीनाम् अयमभिप्रायः यत् वातावरणस्य प्रभावः व्यक्तेरुपरि भवति। जान् लॉक (John Locke), हेलविशयश (Helvetious), हेवर्ड (Heward) चेत्यादयः वातावरणम् एव प्रभावयति न तु वंशानुक्रमम् इति अभिप्रयन्ति। यतः न हि तस्य निर्मितौ कश्चित् पूर्वगतसंस्कारः संक्रमते। परन्तु भारतीयपरम्परायां वंशानुक्रमस्य प्रभावो वर्तते इति प्रमाणीकृतम्। वंशानुक्रमः इति शब्देन वयं पैतृकगुणसंक्रमणतारतम्यमिति जानीमः। किं बालकस्य मानवस्य वा विकासे वंशानुक्रमस्य पैतृकगुणसंक्रमणस्य गुरुतरः प्रभावो भवति? अथवा वातावरणस्य सामाजिकसंस्थाजन्यशिक्षाया वा? प्रश्नोऽयं शिक्षामनोविज्ञानदृष्ट्याऽतीव महत्त्वपूर्ण उपयोगी चास्ति। वातावरणवैय्यर्थ्यप्रदर्शनाय भवभूतिमहाकवेर्वचनं सुप्रथितमेव सर्वेषां विदुषां यथा -

**वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे**
**न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।**
**भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा**
**प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः।।**[६] इति।

कथनस्य इदं तात्पर्यं यत् गुरुः सर्वान् शिष्यान् समानरूपेण कक्ष्यायां पाठयति। कक्ष्यायां मन्दबुद्धयस्तीव्रबुद्धयश्च छात्राः भवन्ति। न हि गुरुः प्रकृष्टबुद्धिषु विशेषमवधानं ददाति न वा मन्दबुद्धीनामुपरि न्यूनावधानं प्रददाति। तर्हि कुतः तेषां पाठबोधमात्रायामतीव भेदो दृश्यते। किं तस्य भेदस्य कारणम्? अतोऽस्ति किञ्चित्तेषां स्वभावगतकारणं पैतृकगुणादिजन्यं जन्मत एव प्राप्तम्। वंशानुक्रमस्य दृष्टान्ताः बहवः उत्तररामचरिते द्रष्टुं शक्यन्ते। किञ्च वातावरणजनितामितप्रभावो येनायं जन्मतः शूद्रो मानवो द्विजत्वमवाप्नोति। यथा -

**जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते।**
**विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते।।**

संस्कारो नाम शिक्षा-सामाजिक-पारिवारिक-समुदाचारः। अत्र संस्कारेण वातावरणोपलक्षणेन हि खलु महान् प्रभावः दृश्यते।

मनोविज्ञाने अपरः कश्चन विषयः मूलप्रवृत्तिः वर्तते। मूलप्रवृत्तयः सहजक्रियाः इव जन्मजाता वंशपरम्परया समागताः क्रियाः भवन्ति, ताः सहजक्रियाऽपेक्षया जटिलतरा भवन्ति। सहजक्रियासु संवेगाभावो भवति, मूलप्रवृत्तयश्च संवेगरूढा भवन्ति। मैकडूगल-महोदय अभिप्रैति यत् मूलप्रवृत्तिः नाम एकः कायिकमानसिकः पैतृकगुणसंक्रमणजनितो जन्मजातो वा स्वभावः येन विशिष्टप्रकारकः संवेगः अनुभूयते, तद्विषये विशिष्टप्रकारेण प्रयत्नः क्रियते। अर्थात् प्रयत्नानुरूपः क्रियावेगः एव अनुभूयते। यथा मनुष्यः व्याघ्रदर्शने चौरागमे वा भयात् पलायते, स्वेदरोमाञ्चरक्तातिशीघ्रप्रसारणादीनि च लक्षणानि तस्य शरीरे आविर्भवन्ति। भयेन पलायनं, शरीरे रक्तातिशीघ्रप्रसारणं च मूलप्रवृत्तिजन्यं जन्मजातं कर्म इति। मूलप्रवृत्तयः पशुषु मानवेषु च समानरूपेण समुपलक्ष्यन्ते। अत एवाऽस्ति प्राचीनमाभाणकम्। तद्यथा -

**आहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।।** इति।

किञ्च प्रतिशोधावसरे दुर्भिक्षे वा मानवोऽपि पश्वभिन्नव्यवहारमाचरति। उक्तं यथा -

**"बुभुक्षितः किं न करोति पापं क्षीणा जना निष्करुणा भवन्ति"** । इति।

अपि च उच्यते - **"कामातुराणां न भयं न लज्जा"** इति।

मूलप्रवृत्तयः चतुर्दश भवन्ति इति मैकडूगलमहोदयस्याभिमतम्। यथा भोजनान्वेषणम्, पलायनम्, युयुत्सा, औत्सुक्यम्, सर्जनमुतविधायकत्वम्, सञ्चयः, विकर्षणम्, समवेदनाज्ञापनम्, पुत्रैषणा, प्रजननं कामप्रवृत्तिर्वा, सामूहिकजीवनैषणा, आत्मगौरवप्रदर्शनम्, दैन्यम्, परिहासश्चेति। एतासां मूलप्रवृत्तीनां संवेगात्मिकाः क्रियाः भवन्ति। यथा - बुभुक्षा,

भयं, क्रोधः, आश्चर्यम्, रचनात्मकानन्दः, स्वत्वम् लोभो वा, घृणा, करुणा, वात्सल्यम्, वासना, एकाकिभावः, अहङ्कारः, आत्महीनता, हर्षः आमोदो वा इति।

ड्रेवर (Drever) महोदयानुसारं जन्मजातप्रवृत्तिः द्विविधा। संवेदनात्मिकाः प्रतिक्रियात्मिकाश्च। संवेदनात्मिका द्विविधा। सामान्या विशिष्टा चेति। तथैव प्रतिक्रियात्मिका द्विविधा, विशेषा सामान्या चेति। सामान्यप्रतिक्रियात्मिकायां जन्मजातप्रवृत्तौ "अनुकरणम्" एका प्रवृत्तिः, या मानवेषु पशूनामिव विद्यते। वानराणाम् अनुकरणं तु लोके सुप्रथितमेव। भगवता श्रीकृष्णेनापि श्रीमद्भगवद्गीतायाम् अनुकरणस्य अस्तित्वं महत्त्वञ्च इत्थं कथितम् -

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।**[७] इति।

भगवद्वचनमपि नैसर्गिकं लोकस्वभावम् अनुकरणमूलप्रवृत्त्याख्यम् उररीकरोति एव। अनुकरणसामान्यप्रवृत्तौ अभिनयानुकरणमन्तर्भवति। बाल्यकाले बालकाः स्वीयपुत्तलिकाः भोजयन्ति, तासां विवाहञ्च परस्परं रचयन्ति। बालकाः मयूरपुच्छानि धारयित्वा वानराश्च भूत्वाऽपरे राक्षसानां मृण्मयानुकृतिमुखानि धारयित्वा रामरावणयोः युद्धमभिनयन्ति। तथैव बाल्यकाले पार्वत्याः कियत् सरसमभिनयानुकरणोदाहरणं महाकविना कालिदासेन कुमारसम्भवे प्रदत्तम्। यथा -

**मन्दाकिनीसैकतवेदिकाभिः**
**सा कन्दुकैः कृत्रिमपुत्रकैश्च।**
**रेमे मुहुर्मध्यगता सखीनां**
**क्रीडारसं निर्विशतीव बाल्ये।।**[८] इति।

इति अनेन ज्ञायते अनुकरणसामान्यप्रवृत्तिः संस्कृतवाङ्मये कथम् आलोचिता वर्तते।

ड्रेवरमहोदयस्य जन्मजातप्रवृत्तीनां वर्गीकरणे सामान्यप्रवृत्तिषु सहानुभूतिः अपरा भवति। केनापि पुरुषेण सह तत् दुःखहर्षानुभवनं सहानुभूतिरिति अभिधीयते। इयं सहानुभूतिः सामान्यप्रवृत्तिः समाना पुरुषेषु पशुषु च। "अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्" इति महाकविभवभूतिनिर्दिष्टं सहानुभूतेः चरममुदाहरणम्। आदिकवेः कविकुलगुरोः

वाल्मीकेः क्रौञ्चपक्षिणा सह सहानुभूतिप्रकाशनं तु सुप्रथितमेव। यथा -

**मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।** इति।

एवं प्रकारेण प्राचीनसंस्कृतवाङ्मये बहवः दृष्टान्ताः दृश्यन्ते।

मनोविज्ञाने "संवेदनम्" इति कश्चन विषयः भवति। संवेदनं प्रत्येकमनुभवस्य अनिवार्यमङ्गम्। वस्तुदर्शने सति तद्विषये कश्चन भावनाविशेषो जायते, यथा - सुखप्रदमिदम्, दुःखप्रदमिति वा। सेयं भावना "संवेदनम्" इति कथ्यते। भवभूतिमहाकविना संवेदनपदं प्रयुक्तम्। यथा -

**दुःखसंवेदनायैव रामे चैतन्यमागतम्।**
**मर्मोपघातिभिः प्राणैर्वज्रकीलायितं हृदि।।**[१] इति।

अपि च किं लक्षणं दुःखं सुखं चेति? उक्तं न्यायसूत्रे - "अनुकूलवेदनीयं सुखम्, प्रतिकूलवेदनीयं दुःखम्" इति।

भगवान् मनुः मनुस्मृतौ सुखदुःखलक्षणमेवं कथयति -

**सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।**
**एतज्ज्ञेयं समासेन लक्षणं सुखदुःखयोः।।** इति।

जर्मनदेशीयमनोवैज्ञानिकः वण्ट (Wundt) महोदयः संवेदनं षड् विधम् इति कथयति। सुखसंवेदनं, दुःखसंवेदनं, शरीरविश्रान्तिः, व्यग्रता, उत्तेजितत्वं, शान्तिश्चेति। संवेदनमिति केवलं पाश्चात्त्यमनोवैज्ञानिकानाम् एव योगदानम् इति नैव मन्तव्यम्, अपि तु भारतीयदर्शनशास्त्रेषु बहुधा वर्णितमस्ति।

मनोविज्ञाने यथा व्यक्तित्ववर्गीकरणं दृश्यते तथैव आयुर्वेदशास्त्रानुसारं वर्गीकरणं दृश्यते। वायुप्रकृतिः, पित्तप्रकृतिः, कफप्रकृतिश्चेति विविधप्रकृतिभाजां पुरुषाणां गुणाः सुश्रुतसंहितायाम् एव उपलभ्यन्ते। तथैव व्यक्तित्वम् एकम् अङ्गं स्वभावस्य इति। व्यक्तेः

सामान्यतो भावसंवेदनादिसङ्घटनेन अभिनिवृत्तरूप: स्वभाव:। कस्य कस्य संवेगविशेषस्य प्रभावो मानवव्यवहारस्य निर्णायको भवतीति सर्वं स्वभावायत्तम्। संवेगविशेषप्रभावमुद्दिश्य वयं कथयाम: - अयं लोभी, जिज्ञासु:, कामी, दम्भी इति। श्रीमद्भगवद्गीतायामपि स्वभावस्य त्रेधा वर्गीकरणं दृश्यते। सात्त्विकस्वभाव:, राजसस्वभाव:, तामसस्वभावश्चेति। सात्त्विकराजसतामसप्रकृतीनां व्यक्तीनां बहव: स्वभावानुगतभेदा: भवन्ति। तेषां वर्णनं श्रीमद्भगवद्गीतायां सुस्पष्टं वर्तते।

एवं प्रकारेण बहूनि तत्त्वानि मनोवैज्ञानिकानि प्राच्यविद्वद्भि: शास्त्रेषु दर्शनेषु च चर्चितानि सन्ति, येषामुपरि विचार: विद्वद्भि: भवद्भि: सुतरां करणीय:।

## सन्दर्भा:

१. बृहदारण्यकोपनिषदि, २.४.५
२. श्रीमद्भगवद्गीतायाम्, १०/३२
३. साङ्ख्यकारिकायाम्, कारिकासङ्ख्या - २३
४. वेदान्तपरिभाषायाम्, अड्यारसंस्करणम्, पृ.२६
५. यजुर्वेदे, अध्याय: ३४, मन्त्र: १
६. उत्तररामचरिते, २/४
७. श्रीमद्भगवद्गीतायाम्, ३/२१
८. कुमारसम्भवे, १/२९
९. उत्तररामचरिते, १/४७

## सन्दर्भग्रन्थसूची


१ बृहदारण्यकोपनिषद् - केशवलाल वि.शास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०११

२.उत्तररामचरितम् - रमाकान्तत्रिपाठी, चौखम्बा पब्लिकेशन, नई दिल्ली, २००८

३. श्रीमद्भगवद्गीता - केशवलालशास्त्री, चौखम्बा पब्लिकेशन, नई दिल्ली, २००५

४. साङ्ख्यकारिका - श्रीकृष्णमणित्रिपाठी, चौखम्बा पब्लिकेशन, वाराणसी, २०१२

५. यजुर्वेद: - चौखम्बा पब्लिकेशन, वाराणसी, २००६

६. वेदान्तपरिभाषा - डा.गजाननशास्त्री मुसलगाँवकर, चौखम्बा पुस्तकालय, वाराणसी, २००७

७. मनुस्मृति: - डा.गजाननशास्त्री मुसलगाँवकर, चौखम्बा विद्याभवन, वाराणसी, २००७

८. श्रीमद्वाल्मीकिरामायणम् - शिवरामशर्मा, चौखम्बा विद्याभवन, वाराणसी, २००५

९. कुमारसम्भवम् - कृष्णमणित्रिपाठी, चौखम्बा बुक् स्टोर, वाराणसी, २००८

१०. रघुवंशम् - कृष्णमणित्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०११

११. Introduction to Psychology - Robert M. Yerkes, Forgotten Books, 2017

१२. Introduction to Social Psychology - William Mc. Dougall, Taylor & Francis Ltd, 2015

१३. The Psychology of Emotions, Feelings & Thoughts, Pettinelli Mark, Mark Pettinelli, 2008

ISSN: 2231-0452

# श्रीमद्भगवद्गीता-आयुर्वेदशास्त्रयोः व्यक्तित्वप्रकाराः

***डा. सिङ्गराजु दक्षिणामूर्तिशर्मा***
*(उपाचार्यः, शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**प्रस्तावना**

श्रीमद्भगवद्गीतानुसारं प्राचीनभारतीयायुर्वेदानुसारञ्च व्यक्तित्वस्वरूपम् अत्यन्तं वास्तविकमिति सर्वैः अङ्गीक्रियमाणं वर्तते। किञ्च प्रतिपादितं व्यक्तित्वस्वरूपं सार्वकालिकमिति प्राचीनैः अर्वाचीनैश्च अङ्गीकृतमस्ति। यथा–

व्यक्तित्वं नाम व्यक्तेर्विविधमानसिकव्यापाराणां मूलप्रकृतिचिन्तनसंवेदनविचार-कल्पनाप्रयत्नप्रभृतीनां समन्वयात्मकं सामञ्जस्यपूर्णं रूपम्। व्यक्तित्वं तावद् द्विविधं भवति - सङ्घटितं व्यक्तित्वम्, असङ्घटितं व्यक्तित्वञ्चेति। यदा व्यक्तेर्ज्ञानानुकूलाः भावाः, भावानुकूलं प्रयत्नञ्च भवति, बुद्धिभावेच्छाप्रयत्नादिव्यापारेषु विप्रतिकूलत्वं नोपलभ्यते, तदा तस्या व्यक्तेः सङ्घटितं व्यक्तित्वं भवति। यदा तेषु तेषु व्यापारेषु परस्परं प्रतिकूलकारित्वं जायते, तदा तस्या व्यक्तेरसङ्घटितं व्यक्तित्वमिति निगद्यते।

व्यक्तित्वप्रचलितस्वरूपविषये भारतीयशास्त्रेषु विद्वद्भिः विचारः कृतो वर्तते। भारतीयवाङ्मये व्यक्तित्वस्याध्ययने आत्मनः स्वस्य च केन्द्रीयं स्थानं वर्तते। दर्शनशास्त्रे आत्मस्वरूपं विवेचितं वर्तते। उपनिषत्सु निरूपिताः अन्नमयादिपञ्चकोषाः शरीरादात्मानं प्रति उत्तरोत्तरविकासस्य परिचायकाः वर्तन्ते। एतेषां कोषानां सम्बन्धो व्यक्तित्वस्य विविधैरायामैर्वर्तते। अत एव व्यक्तित्वाध्ययने एतेषां कोषानामाधारत्वं गृह्यते।

**श्रीमद्भगवद्गीतानुसारं व्यक्तित्वस्य वर्गीकरणम्**

श्रीमद्भगवद्गीतायां व्यक्तित्वस्य वर्गीकरणं सुष्ठु प्रतिपादितमस्ति। यथा – सात्त्विकः स्वभावः, राजसः स्वभावः, तामसः स्वभावश्चेति। सात्त्विकराजसतामसप्रकृतीनां व्यक्तीनां बहवः स्वभावानुगतभेदा

भवन्ति। केषाञ्चन वर्णनमत्र श्रीमद्भगवद्गीतानुसारेण क्रियते। तथा हि-

**सात्त्विकव्यक्तित्वलक्षणम्**

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः।।[१]

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकप्रियम्।।[२] इति।

**राजसव्यक्तित्वलक्षणम्**

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ।।[३]

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ ! तं यज्ञं विद्धि राजसम् ।।[४]

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद् दानं राजसं स्मृतम् ।।[५] इति।

**तामसव्यक्तित्वलक्षणम्**

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ।।[६]

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ।।[७]

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ।।[८] इति।

सात्त्विकव्यक्तित्वे सारल्यमार्जवम्, कर्त्तव्यनिष्ठा, ज्ञानम्, तपः, श्रद्धा, सत्यम्, निःस्पृहा, सर्वप्राणिनामुपकारकत्वं चेत्यन्तर्भाव्यते।

राजसव्यक्तित्वे हि खल्वात्मप्रदर्शनम्, दम्भः, सामाजिकराजनीतिकयशोलिप्सा, क्रियानुरागः, वित्तैषणाप्राचुर्यम्, उत्तेजकपदार्थानां विषयाणाञ्च सेवनम्, स्वार्थे सर्वसमारम्भोपक्रम इत्यादयो विशेषा अनुप्रविशन्ति।

तामसव्यक्तित्वे हि दीर्घसूत्रत्वम्, आलस्यम्, वर्जितद्रव्यसेवनम्, शुद्धशुद्धधर्माधर्म-विवेकशून्यमाचरणम्, पैशुन्यम्, अशौचमित्यादिदुर्गुणानामन्तर्भाव इष्यते।

स्वभावस्यायं सात्त्विकराजसतामसभेदेन वर्गीकरणं सर्वथा मनोविज्ञानशैल्या सह सङ्गच्छते।

**आयुर्वेदशास्त्रानुसारं व्यक्तित्ववर्गीकरणम्**

प्राचीनभारतीयायुर्वेदविशारदानां मते वातपित्तकफाधिकारविशेषेण मनुष्याणां प्रकृतिभेदाः अभिनिर्वर्तन्ते अर्थाद् यदि कस्यचिन्मानवस्य वातप्रकोपाद् वातप्रकृतिस्तदा तस्य चारित्र्ये स्वभावे व्यवहारे च विशिष्टा गुणाः सँल्लक्ष्यन्ते । अन्यच्च, पित्तप्रकृतीनां स्वभावा व्यवहाराः वातप्रकृतिभ्यः पुरुषेभ्यो भिद्यन्ते। तेषां चापि कफप्रकृतिभ्यः पुरुषेभ्यः । विविधप्रकृतिभाजां पुरुषाणां गुणाः सुश्रुतसंहितायामेवमुपलभ्यन्ते । तथा हि–

**(१) वायुप्रकृतिः**

तत्र यः प्रजागरूक शीतद्वेषी दुर्भगः स्तेनो मात्सर्यनार्यो गन्धर्वचित्तः स्फुटितकरचरणोऽल्परूक्षमश्रुनखकेशः क्राथी दन्तनखखादी च भवति ।

अधृतिरदृढसौहृदः कृतघ्नः कृशपरुषो धमनीततः प्रलापी ।
द्रुतगतिरटनोऽनवस्थितात्मा विषति च गच्छति सम्भ्रमेण सुप्तः ।।

अव्यवस्थितमतिश्चलदृष्टि मन्दरत्नघनसञ्चयमित्रः ।
किञ्चिदेव विलपत्यनिबद्धं मारुतप्रकृतिरेष मनुष्यः ।। इति।

अत्र 'क्राथी' इति हिंसाशीलः । 'क्राथी' इति स्थाने 'क्रोधी' इत्यपि पाठान्तरं समुपलभ्यते। 'अनवस्थितात्मा' इति च चलचित्तः । 'दुर्भगः' इति अमनोरमाकारः।

**(२) पित्तप्रकृतिः**

"स्वेदनो दुर्गन्धः पीतशिथिलाङ्गस्ताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलो दुर्भगो वलिपलितखालित्यजुष्टो बहुभुगुण्यद्वेषी क्षिप्रकोपप्रसादो मध्यमबलो मध्यमायुश्च भवति।"

मेधावी निपुणमतिर्विगृह्य वक्ता तेजस्वी समितिषु दुर्निवारवीर्यः ।
सुप्तः सन् कनकपलाशकर्णिकारान् सम्पश्येदपि च हुताशविद्युदुल्काः।। इति।

अत्र 'विगृह्यवक्ता' इति परवाक्यमुच्छिद्य वक्तुं शीलः।

**(३) कफप्रकृतिः**

"दुर्वेन्दीवरनिस्त्रिंशार्द्रारिष्टशरकाण्डानामन्यतमवर्णः सुभगः प्रियदर्शनो मधुरप्रियः कृतज्ञो धृतिमान् सहिष्णुरलोलुपो बालवाँश्चिरग्राही दृढवैरश्च भवति।"

दृढशास्त्रमतिः स्थिरमित्रधनः
परिगण्य चिरात् प्रददाति बहु ।
परिनिश्चितवाक्यपदः सततं
गुरुमानकरश्च भवेत् स सदा ।। इति ।

**स्वभावस्य व्यक्तित्वाङ्गत्वम्**

स्वभावोऽपि व्यक्तित्ववैशिष्ट्यमावहति स्वभावे हि खलु भावाः, सुखदुःखाद्यनुभूतिः, स्थायिभावाः, विचाराश्च विशेषणाऽन्तर्भावमर्हन्ति। प्रायः स्वभावस्य वर्गीकरणं यवनदेशीयैर्दार्शनिकैः, अरबदेशीयैः लेखकैश्च भारतीयायुर्वेदाचार्याणां सदृशं वातपित्तकफ-प्रकृत्यनुसारं स्वीक्रियते। यवनानां मते रक्तमयस्तुरीयः पुरुषस्वभावोऽपि स्वीक्रियते। अस्माभिरिदं मतं प्राग्वर्णितम्। सर्वतोऽधिकां ख्यातिमिदं मतम् अलभत। नैतन्मतं रमणीयं प्रतिभाति। वातपित्तकफादिकं शारीरिकरासायनिकपरिवर्तनमात्राधीनम्। शारीरिकपरिवर्तनस्वभावयो-स्तादात्म्यं नैतावता सिद्ध्यति। मनोवैज्ञानिकवरेण्या रोस स्टेगनर-किम्बालयुङ्गमहोदयौ व्यक्तित्वस्य अन्तर्वर्तिग्रन्थिस्त्रावायत्तत्वं नाङ्गीकुरुतः दुष्टत्वात्। अन्यच्च, वातपित्तकफासाम्यजन्या विकारा भवन्ति । तेषां साम्यावस्था 'स्वास्थ्यम्' इति निगद्यते। सा च प्राणिनां प्रकृतिश्चरकमते।

कथं शारीरिकरासायनिकविकारैः स्वस्थपुरुषाणां संवेगविचारस्थायिभावायत्ता प्रकृतिः स्वभावो निर्म्मातुं शक्यत इति नास्माकं बुद्धिपथमारोहति। नूनं कफपित्तादिविकारातिशयेन स्वभावविक्रिया अपि कदाचन दृश्यन्ते। स्वभावे शिक्षाभ्यासस्य सामाजिकवातावरणस्य च भूयिष्ठः प्रभावो भवति। स चोपरिलिखितमतेन निराक्रियते।

**उपसंहारः**

प्राच्य-पाश्चात्त्यानुसारं व्यक्तित्वस्य स्वरूपं भिन्नं भवतीति सर्वविदितम् । व्यक्तित्वस्य वर्गीकरणं यथा श्रीमद्भगवद्गीतायां कृतं वर्तते तत्सार्वकालिकमिति प्राच्यमनोविज्ञानीनामभिप्रायः। किञ्च आयुर्वेदशास्त्रे कृतस्य वर्गीकरणस्य चिकित्साशास्त्रदृष्ट्या मनोविज्ञानदृष्ट्या च अङ्गीकारः क्रियते । व्यक्तेः स्वभावानुसारं व्यक्तित्वं विकसितं भवति । अर्थात् व्यक्तौ स्थिताः स्वभावविशेषाः एव व्यक्तित्वं प्रभावयन्तीति नास्ति संशयः । किञ्च व्यक्तौ स्थितान् गुणान् आश्रित्य व्यक्तित्वं स्वीयसंज्ञां प्राप्नोति ।

## सन्दर्भाः


१. श्रीमद्भगवद्गीतायाम्, १७/८

२. तत्रैव, १७/२०

३. तत्रैव, १७/९

४. तत्रैव, १७/१२

५. तत्रैव, १७/२१

६. तत्रैव, १७/१०

७. तत्रैव, १७/१३

८. तत्रैव, १७/२२

## सहायकग्रन्थसूची

१. श्रीमद्भगवद्गीता - बाकिलरामस्वामिशास्त्रुलु एवं सन्स्, चेन्नई, १९५१

२. सुश्रुतसंहिता - यादवशर्मा, निर्णयसागरमुद्रणालयः, मुम्बाई, १९४५

३. शिक्षामनोविज्ञानम्- डा. वि.एस्.वि. राघवाचार्यः, के.एस्.विद्यापीठम्, तिरुपतिः, १९८२

४. शिक्षामनोविज्ञानम् - श्री पि. नागमुनिरेड्डि, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २००८

ISSN: 2231-0452

# Atharvavedic References to Gems

***Dr. G. Sudev Krishna Sharman***
*(Swasthikam, Thali, Chalapuram, Calicut, Kerala)*

Gemmology is a branch of science that refers to the scientific study of gems. Ratnaparīksā is considered one among the sixty four arts in Kāmasūtra of Vātsyāyana which is believed to be written around 2nd C. BC. This points to the fact that there surely existed a systematised knowledge of gems and its studies prior to it.

If we go through Vedic literature, it is only Atharvaveda that has something to say about gems or maṇis. But here maṇi referred to are not classified under plant origin or that of mineral origin. On the contrary all of them are quite stones. They are used for different purposes like- destroying enemies, demons, diseases etc. The sūktās given here praise these stones, through which their qualities, capabilities, mythological and superstitious beliefs are all described.

Some of these maṇis are:

1) Śaṅkhamaṇi
2) Pratisaramaṇi
3) Audumbaramaṇi
4) Astrtamaṇi
5) Jangiḍamaṇi
6) Darbhamaṇi
7) Dhṣranamaṇi
8) Ḍatavṣramaṇi
9) Phālamaṇi

This paper aims to study different types of maṇis referred to in Atharvaveda and compare this classification with the Navaratna system (nine precious and semi-precious stones) of later periods.

Modern world conceives Gemmology as the scientific study of all sorts of gems. Ratnaparīkṣā or Maṇirāgākarajñāna can be considered as the equivalent branches of knowledge which were developed in the Indian heritage. Rūpyaratnaparīkṣā and Maṇirāgā-karajñāna were considered separately among the traditional sixty four arts[1] in India. Vātsyāyana, the author of *Kāmasūtra* has no doubt on this point. *Arthaśāstra* also considers rūpyaratnaparīkṣā as a separate branch of knowledge. *Bṛhatsamhitā* sets apart four adhyāya-s to deal with this vast subject. Some Āyurvedic texts, such as *Rasaratnasamuccaya*, *Rasaratnākara* and others deal with the therapeutic powers of gemstones. Apart from these, we are fortunate to have some original works like *Ratnadīpa* and *Ratnaśāstra* etc. These works are much significant in making what Indian gemmology has now become.

It will be interesting to search the antiquity of this developing or developed branch of science in India. If we go through Vedic literature, *Atharvaveda* has much more to say about gems or maṇi-s and their therapeutic powers also. But here maṇi-s referred to are not classified under either of plant origin (vanaspati) or that of mineral origin, on the contratry all of them are previous stones.

**Difference between Maṇi-s & Ratna-s**

Most of the Sanskrit lexicons say that ratna and maṇi are synonyms. Still we can see some contextual differences in their usage. Perhaps this contextual difference itself was the reason for Indians to have separate disciplines in sixty-four arts viz. Rūpyaratnaparīkṣā and Maṇirāgākarajñāna. *Bhāvaprakāśa* mentions the definition of Ratna as -

"People who want money are fond of gems, therefore it is called 'Ratna' by grammarians". So from this it can be inferred that if the stone has some commercial value it is ratna, otherwise it is maṇi.

But Arthaśāstra says that ratna-s are of two types - maṇi-s and mauktika-s. Maṇi-s are harder while mauktika-s are less hard.

But the criterion followed in Vedic lore in distinguishing maṇi and ratna is somewhat different.When gems are used for ornamental purposes they are ratna-s and when they are used for talismanic purposes they are maṇi-s. Hence the term maṇibandhana in Atharvaveda becomes significant[2].

**'Maṇi'- Its' Meanings & Translatins**

The word maṇi is interpreted in many senses by scholars. Devi Chand, the follower of Dayananda Saraswati ascribes the meaning of the word maṇi as 'Vedic law'. Pt. Jaidev Vidyalankar is of the opinion that the meaning of the word maṇi denotes 'commander-in-chief of the army'. Here the findings of Dr. K D Dvivedi seems to be more appropriate, as he says that maṇaka of a tree means the smallest portion of the branch of that tree. And maṇi is the same as maṇaka which is round in shape. From this statement, it can be inferred that it is possible to make maṇi-s from all kinds of trees. Thus the herbal powers of a tree can be utilised by using them as amulets or as talisman apart from other purposes. From these explanations it could be stated that Atharvavedic maṇi-s are those small round parts of wooden pieces or in some cases animal shells which can be holed and can be worn just as rudrākṣa or tulasi-seed. And at the time of Vedas, particularly *Atharvaveda*, their usage seems to be much more prominent. This will be more clear if we go through the hymes of these maṇi-s which are the following:

They are:

1) Jangidamaṇi
2) Pratisaramaṇi
3) Varaṇamaṇi
6) Śankhamaṇi
7) Audumbaramaṇi
8) Śatavāramaṇi

4) Astṛtamaṇi

5) Darbhamaṇi

9) Manibandhana (Phālamaṇi)

**1) Jangiḍamaṇi (Atharva 19/5/1,2)**

Jangiḍamaṇi is referred to in jangiḍamaṇisūkta in *Atharvaveda*. There is another name for Jangiḍa called Angiras. From what it is made up of, is unclear in these verses. Sāyaṇa considers it as peculiar type of tree. He ascertains that this tree is famous in northern India, particularly in Varanasi. Dr. K D Dvivedi compares this maṇi with a peculiar type of herb called *vaca* referred to in *Bhāvaprakāśa*. It is also called as ugragandhi in *Bhāvaprakāśa*[3].

The Kalpa texts state that this maṇi is used for longevity, fortune, and for peace. It is also used for vāyavya śānti or troubles by the doṣa-s of vāta[4]. Viṣkandha and samskandha, the two types of disorders explained in these verses[5] which are translated by K D Dvivedi and many others as rheumatism. Sāyaṇa also remarks this as a herb. It has many other curative powers for many diseases.

Here it also should be noticed that in these sūktas jangiḍa is called as vanaspati[6]. Devi chand compares this tree with arjuna tree.

**2) Pratisaramaṇi (Atharva 8/2/6)**

Kauśika has categorised this sūkta among kṛtyāpratyāharaṇagaṇa which are used for destroying 'kṛtyā' – a vedic demoness. For setting her aside, Tilakamaṇi should be put first in milk and then in honey and these sūktās should be recited.

"The brave will tie it up for getting vīrya. One can protect even his lord with this.

It will give us brave sons, destroy enemies. Indra won Vṛtrāsura, won the earth and heaven, won other demons, won four directions all with the help of this maṇi.

It diverts the ways of all troubles from us. At the sight of this maṇi, enemy will go off. And for this reason there will be no enemy and hence no war." (Atharva 8/2/6)

*Kauśika sūtra* says that Pratisara means tilakavṛkṣa or seasamum. Tilakvṛkṣa is also called Malamkara tree[7] in Malayalam. This amulet has to be immersed in honey and in milk for a period of three days reciting these sūkta-s. This maṇi has the potency to expel all diseases which can be etymologically correlated as :

**रोगादेः प्रतिसरणसाधनभूतः मणिः इत्यनेन प्रतिसरमणिः ।**

Kaśyapa was the first to activate this maṇi. Indra has become victorious over vṛtra due to this maṇi. Therefore from both sides, i.e from the side of activator and from the side of user it has nothing to harm its effectiveness, says Sāyaṇa. By wearing this, many troubles caused by exorcism can be expelled away.

**3) Varaṇamaṇi (Atharva 10/2/1)**

Nīrmātala in Malayalam is similar with the Varaṇa tree. The amulet or maṇaka of this tree may be used for making varaṇamaṇi. This also is prepared just as the previous one by putting it in milk and honey for three days reciting these sūkta-s, says *Kauśika Sūtra*. This is used for getting rid of fear which is referred to in *Nakṣatrakalpa*[8]. Many problems can be solved; enemies can be destroyed; sleeplessness, nocturnal emissions can also be remedied by using this amulet.

In the pūrvakhaṇḍa of *Bhāvaprakāśa*, varaṇa is described as a herb[9]. Khem Karan Das Trivedi and Devi Chand interpret this maṇi as Vedic knowledge. Jayadeva Vidyalankar says that it is army-chief. Griffith considered it as an amulet itself.

**4) Astṛtamaṇi (Atharva 19/6/1)**

It is made out of milk, honey, and ghee. The verbal root √stṛ is used in two senses -

1) to cover with (ācchādanārtha)

2) to destruct (himsārtha)

Therfore, according to Sāyaṇa, one which can never be subjected to these two actions is the real sense of meaning with which this term is employed here. Trivṛt maṇi and astṛta maṇi both are the same, says Sāyaṇa. This stone has many peculiarities as noted down as in other stones.

Here also Khem Karan Das Trivedi and Devi Chand, both of them go for totally different meanings of the term. As the former gives the meaning of astṛta maṇi as 'unbreakable law', the latter gives it as 'invincible commander'.

**5) Darbhamaṇi (Atharva 19/4/2,3,6,7)**

Darbhmaṇi can be made by immersing darbha grass in ghee, milk and in honey and by reciting these sūktas.

Sāyaṇa says that etymologically "dambhana" - means destroying enemies. It has another name called kuśa. Here in *Atharaveda* we can see two different sūkta-s for praising Darbha and Darbhamaṇi. Hence it is clear that the Kuśa grass and Darbhamaṇi have some distinct characteristics of their own.

The therapeutic properties of Darbha are described in *Bhāvaprakāśa*. Here also translators do not have common opinion regarding its meaning. Griffith considers it as an amulet like others. Jayadeva Vidyalankar and Khem Karan Das Trivedi translate it as - chief of the army. Here Devi Chand has given a totally different meaning for the word darbha. He says this as some sort of radiating contrivance or

radiating instrument made by expert technicians. He even says that this maṇi possesses many properies of radio activity. To support this fact he gives a detailed picture of the formation of Darbha grass. According to him lightning, the nature's resource of electricity is the ultimate cause of the formation of Darbha and thus it could enforce the electro-magnetic field all over its surroundings. But these facts have to be experimentally verified.

**6) Audumbaramaṇi (Atharva 19/4/5)**

It is made out of Udumbara tree which is referred to as Atti in Malayalam. This is used to obtain wealth, thus recommends *Nakṣatra kalpa*. It also bestows us with bravery, heroism etc. It was also used for the well-being of livestock.

**7) Śankhamaṇi (Atharva 4/2/5)**

Acharya Priyavrata Sharma says[10] that none of the maṇi-s referred to in Atharvaveda are gemstones or Ratna-s. All belong to vanaspati group of maṇi. This statement cannot be fully true. Śankhamaṇi is the only exception as it would not belong to vanaspati group of maṇi-s.

After upanayanasamskāra (sacred thread ceremony) Āyuṣkāman māṇavaka should be tied with Śankhamaṇi reciting these sūkta-s. Kauśika has not noted this point in Kauśika Sutra-s.

In *Śāntikalpa* it is pointed that this maṇi is meant for the treatment of hydrophobia. The difference sources of origin of the Śankhamaṇi have been referred to in these hyms which are -

1) air (Vāta)

2) space (Antarikṣa)

3) lightning (Vidyut)

4) lightning space (Jyotirmaṇdala)

5) upper layer of ocean (Samudroparitala)

The text also states that at first it is formed in space, then in the ocean and then it is carried out from there.

"Oh! śanghamaṇi, with the help of you we can destroy demons. With the help of it diseases, ignorance (avidya), anaiśvarya can be destroyed.

Like the Sun releases from the clouds, śankha releases from samudra or antarikṣa. This is capable for protecting us from troublesome gods and demons. (Here the adjective of gods as troublesome should be noted.)

You have came from somamaṇdala which is filled completely with nectar (amṛtamaya). You are a victory-maker in wars.

Oh! māṇavaka I will tie upon you this maṇi for your well-being." (Atharva 4/2/5)

From the hymn it is clear that Śankhamaṇi is described as the outer shell, or the born-like part of an organism living in the water. Whitney translates Śankhamaṇi as the Pearl itself. Obviously, Śankha is used in Sanskrit in the sense of conch which is totally different from pearl. Both are found in the water and shell is necessary for the formation of both.

But if we go in search of the places where pearls are found in the later gemmological treatises we can establish an important connection between pearl and śankhamaṇi. According to its origin, Pearls are of eight types -

**शुक्तिः शंखो गजः क्रोड फणिर्मत्स्यश्च दर्दुरः।**
**वेणुश्चाष्टौ समाख्याताः सुज्ञानिर्मौक्तिकयोनयः।।**

Pearls are found natuarally at eight places. They are:

1) Shell 5) Snake-head

2) Conch 6) Fish

3) Elephant 7) Clouds

4) Pig 8) Flute

शंखस्याच्युतहारिणो जलनिधौ ये वंशजाः कम्बुकाः
तेष्वनन्तः किल मौक्तिकं भवति वै तच्छुक्रतारानिभम्।
कापोताण्डसमं सुवृत्तमसकृच्छ्रीकं सारूपं लघु
स्निग्धं स्पर्शकृतं हि तच्च न पुनर्मर्त्यैष्टदासाद्यते।।

Hence, it can be assumed that the one that formed from Śankha may be referred to in these hymns.

Astrologically moon is associated with pearl. This fact and the reference of formation of it from the Somamaṇdala make doubtless to believe it as pearl.

Here Devi chand considers the word śankha as 'the soul of a man'. The Kauśika Sutraic order that, this should be worn at the time of upanayana - is being interpreted as the importance of human soul at the time of upanayanasamskāra.

Although it is so, śankhamaṇi is the only one which differs from other vanaspati maṇis that were described in Atharvaveda. And also, this maṇi stands more close to the later navaratnas in its pecualiarities.

**8) Śatāvarimaṇi (Atharva 19/5/3)**

Sāyaṇa defines this stone etymologically as one that can cure a hundred sorts of diseases. *Nakṣatrakalpa* mentions that this is widely used for obtaining good children. Sātāvari or cerukaccolam in Malayalam may be the tree from which its amulet can be made.

In *Bhāvaprakāśa* śatāvari has different names like mahāśatāvari, śatamūlī, Urdhvakanḍikā and sahasravīryā. The text also describes that it is good for rheumatism (vāta) and bile related (pitta) troubles. It helps in the purification of blood also. In the same manner, Śatavāra which

has been referred to in Atharvaveda also possesses the mame qualities. For these reasons Dr. K D Dvivedi establishes that śatavāra and śatāvarī both are same. Śatavāra is the only one that is accepted as a herb by Devi chand. But Jaidevavidyalankar here also refers it as commander-in-charge.

**9) Phālamaṇi (Atharva 10/3/1)**

Bṛhaspati once wore this maṇi.The amulet of Khadira tree is being used for making this maṇi. At first it is covered in gold and is immersed in curd and honey by reciting these verses. It is helpful for earth-related problems. Here also Devi Chand interprets this word as Vedic Laws.

## Conclusion

If we go through Vedic literature, only *Atharvaveda* has something to say about Maṇibandhana or wearing of gems. Some references may also be found out as to whom these stones are authenticated for use. However, these maṇi-s began to be used for different purposes like destroying of enemies, demons, diseases at the peiod of Śantikalpa and Nakṣatrakalpa. We have also seen that the interpretations of Vedic terms without ample evidences so as to fit certain religious agendas may obviously mislead the readers of Vedas-s.

There is no evidence to believe that the usage of navaratna-s was common at the time of Atharvavedic period. But some other maṇi-s were there in their place for treatments and for talismanic purposes and other fascinations. However these hymns showing the systematised knowledge of making the amulets or maṇi-s may later lead to the development of India's gemmology above par.

## References

1. Kalāvidyāvivaraṇam, p. 94,126

2. Atharva 10/3/1

3. Hārītakyādivarga 102-103 BP

4. Vāyavyam vātavātyāyām, Śantikalpa 17-4

5. Atharava 29-05-05

6. Ugra it te vanaspate 29-05-09

7. Kanippayyur Sanskrit Malayalam Dictionary

8. Abhayām bhayārtasya, śāntikalpa 17-5

9. Vaṭādi varga 56,57,65,66

10. See the introduction of the book Ratnavijñān

## Bibliography


1. Atharvaveda (Śaunakīya) Vol I to IV, edn. Vishvabandhu -Vishveshvarananda Vedic Research Institute, Hoshiarpur (1962)
2. The Atharvaveda- English Trans.Devi Chand - Munshiram Manoharlal Pub. (1982)
3. Atharvaveda, Translated by Pandit Jai Dev Sharma Vidyalankar, The fine Art Printing Press, Ajmer (1940)
4. Atharvaveda, 2 Vols. Translated by Acharya Vaidya Nath Shastri.
5. Atharvaveda, 2 Vols. (In Sanskrit and Hindi). Khem Karan Das Trivedi
6. Atharvaveda. Bibek Debroy & Dipali Debroy
7. Atharvaveda Samhita, 2 Vols. William Dwight Whitney
8. Atharvaveda Samhita: Sanskrit Text Transliteration and Translation,5 vols. Satya Prakash Sarasvati and Satyakam Vidyalankar
9. A Cultural Study of the Atharvaveda - Dr. K D Dvivedi Vishvabharati Research Institute, Gyanpur (1999)
10. Ratnavijñān (Gemmology) - Pt. Radhakrishna Parasar Chowkhambha Bharati Akademy, Varanasi (1998)

11. A Sanskrit English Dictionary-M Monier Williams Bharatiya Granth Niketan, New Delhi (2007)

12. Samskrita_malayāla nighaṇṭu (Malayalam) - Kanippayyur Sankaran Nampoothiri Panchangam Book Pub, Kunnamkulam, Kerala (1972)

13. Kalāvidyāvivaraṇam (Malayalam) - M K Gurukkal, Kerala Sahitya Academy(1937)

ISSN: 2231-0452

# अलङ्कारशास्त्रे लोकन्यायाः

*डॉ. सोमनाथदाशः*
*(सहाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

“प्रमाणैरर्थपरीक्षणं न्याय” इत्युच्यते । नीयन्ते प्राप्यन्ते विवक्षितार्था अनेनेति न्यायः। न्यायपोषकत्वेन लोकः, वेदः, शास्त्रमिति वस्तुत्रयं स्वीक्रियते । अलङ्कारशास्त्रे न्यायाः बहुधा भवन्ति । यथा — वाक्यन्यायाः, तर्कन्यायाः, लोकन्याया इत्यादयः । एवमपि न्यायपदेन समानता (Likeness), सादृश्यम् (Analogy), लोकरूढनीतिवाक्यम् (A popular maxim), उपयुक्तदृष्टान्ताः (Apposite Illustration), निदर्शना इत्यादयोऽपि शब्दाः स्वीक्रियन्ते ।

लोकन्याय इत्युक्ते लोके घटितायाः कस्या अपि विलक्षणघटनाया उक्तिरित्यपि वक्तुं शक्यते, या विवक्षितविषयं पुष्णाति । समाजस्य संघटने, व्यावहारिकदशानिर्वाहे, लोकन्यायानां महत्त्वं वरीवर्ति ।

नागेशभट्टमतानुसारम् —

**लोक्यते येन शब्दार्थौ लोकस्तेन स उच्यते ।**
**व्यवहारोऽथवा वृद्धव्यवहर्तृपरम्परा ।।** इति ।

लोके या आचारव्यवहारपरम्परा तथा शिष्टपुरुषाणां वचांसि प्रामाणिकत्वेन भवन्ति, तेषामेव लोकन्याय इति व्यवहारः । विश्वनाथकृतभाषापरिच्छेद-मुक्तावल्यां शब्दखण्डे उच्यते यथा —

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।**
**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ।।**[१]

एतेषु “आप्तवाक्यं व्यवहारश्च” इति लोकन्यायत्वेन स्वीकर्तुं शक्यते । लोकन्यायाः सरलसूत्ररूपाः, वाक्यरूपाः, पदात्मिका, अनुभवकथनरूपा वा भवन्ति ।

लोकविज्ञानम्, लोकविदितम्, लोकाश्रयः, लौकिकम्, दृष्टान्त इत्यादयोऽस्य पर्यायाः श्रूयन्ते । लोकन्याय इति शब्दस्तु सर्वादौ पदमञ्जर्यां स्वीकृत इति ज्ञायते । यो जनः लोकं सम्यक् जानाति सः सर्वदर्शी भवतीति महाभारते उच्यते । यथा-

**प्रत्यक्षदर्शी लोकानां सर्वदर्शी भवेन्नरः ।।**[२]

एवमेव व्याकरणशास्त्रपरम्परायां लोकव्यवहारज्ञानस्य वैशिष्ट्यं बहुत्र दृश्यते । यथा — "परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये"[३], "संहितावसानयोर्लोकविदितत्वात्सिद्धम्"[४], "लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः[५]" इत्यादिः । काव्यप्रकाशकारः मम्मटः काव्यकारणत्वेन त्रीणि वस्तूनि उपस्थापयति । यथा —

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।**
**काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।।**[६] इति ।

अत्र लोकव्यवहारस्य न्यायानां वा पर्यवेक्षणेन काव्यरचनायै निपुणता सम्पद्यते इति मम्मटेन जोघूष्यते । अतः लौकिकन्यायानामाधारेण अलङ्कारशास्त्रे बहवो विषयाः प्रमाणीकृताः सिद्धान्तिताश्च सन्ति । तेषु केषाञ्चन न्यायानामुल्लेखोऽत्र विश्वनाथस्य साहित्यदर्पणदिशा क्रियते ।

**(१) सूचीकटाहन्यायः** — सूची च कटाहश्च सूचीकटाहौ, तदाधारीकृत्य प्रचलितः न्यायः सूचीकटाहन्यायः । यदि कस्यापि लौहकारस्य समीपे कश्चन सूचीं कारयितुमन्यश्च कटाहं कारयितुम् आगच्छति ; तर्हि लौहकारः सर्वादौ लघुवस्तुनः सूच्याः निर्माणं कृत्वा तदनन्तरं बृहद्वस्तुनः कटाहं निर्माति । तद्वद् अष्टादशभाषावारविलासभुजङ्गः विश्वनाथकविराजः स्वीयालङ्कारग्रन्थस्य प्रथमपरिच्छेदे अन्तिमकारिकायां —

**वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः ।**
**उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः ।।**[७]

इति प्रत्यपादयत् । यत्र क्रमेण वाक्यम्, रसः, दोषः, गुणः, अलङ्कारः, रीतिः इति पदार्थाः वर्तन्ते । तदाधारेण ग्रन्थेऽस्मिन् द्वितीय-तृतीय-सप्तम-अष्टमाध्यायेषु वाक्यम्, रसः, दोषः, गुणः इति चत्वारः पदार्थाः पर्यालोचिताः । किन्तु नवमे रीतेः विवेचना, दशमे च

अलङ्कारस्य परिशीलनं कृत्वा कश्चन क्रमभङ्गोऽनेन विहित इति प्रतिभाति । अस्य क्रमभङ्गस्य वैयर्थ्यनिराकरणाय "सूचीकटाहन्याय:" अयं लक्ष्मीटीकाकारेण उपस्थापित: । वस्तुत: अलङ्कारस्य विषयपरिसरोऽतीव विस्तृतोऽस्ति, किन्तु रीति: लघुविषयात्मक इति हेतो: यथा लौहकार: सर्वादौ सूचीं निर्माति, तत: कटाहं ;तथैव विश्वनाथोऽपि लघुविषयस्य रीते: पर्यालोचनं नवमे परिच्छेदे कृत्वा दशमे विपुलविषयस्यालङ्कारस्य चर्चामुपस्थापयति ।

(२) **दध्यादिन्याय:** — साहित्यदर्पणस्य तृतीयपरिच्छेदे विश्वनाथेन रसस्य लक्षणमेवमुक्तं यत् —

**विभावेनानुभावेन व्यक्त: सञ्चारिणा तथा ।**
**रसतामेति रत्यादि: स्थायिभाव: सचेतसाम् ।।**[८] इति ।

अत्र रसस्य अभिव्यक्ति: कथं भवति ? इति प्रश्ने तेन "दध्यादिन्यायेन" इति मतं समुपन्यस्तम् । तन्मतेन यथा दुग्धमामलकसंयोगेन दधिरूपेण परिणमते, तथैव विभावादिसंयोगेन रत्यादि: रसरूपेण परिणमते । तदुक्तं — "रूपान्तरपरिणतो रस: व्यक्तीकृत: । न तु दीपेन घट इव पूर्वसिद्ध: व्यज्यते" इति ।

(३) **प्रपाणकरसन्याय:** — लोके प्रपाणकस्य निर्माणं खण्डमरीच-गुड-कदल्यादिद्रव्याणां मिश्रणेन सम्भवति । तस्यास्वादनं च अपूर्वमानन्दं जनयति ; तथैव विभाव-अनुभाव-व्यभिचारिभावानां सम्मेलनात् रसे कश्चनापूर्व आनन्द: समनुभूयते । सोऽयं रस: चर्व्यमाण इति कथ्यते । विश्वनाथमतेन –

**कारणकार्यसञ्चारिरूपा अपि हि लोकत: ।**
**रसोद्बोधे विभावाद्या: कारणान्येव ते मता: ।।**
**प्रतीयमान: प्रथमं प्रत्येकं हेतुरुच्यते ।**
**तत: सम्बलितस्सर्वो विभावादिस्सचेतसाम् ।।**
**प्रपाणकरसन्यायाच्चर्व्यमाणो रसो भवेत् ।**[९]

आदौ तु कारणरूपस्य विभावस्य ज्ञानं भवति, तत: अनुभावस्य, तत: सञ्चारिणामन्ते, साधारणीकरणप्रक्रियया सर्वेऽपि मिलित्वा रसमुद्भावयन्ति ; यथा –

प्रपाणके मिश्रितान्यतरस्य खण्डमरीचस्य, गुडस्य, कदलीफलस्य स्वादे भिन्ने सत्यपि तेषां सम्मिश्रणमपूर्वं स्वादं जनयतीति विवक्षितार्थः ।

(४) **ब्राह्मणश्रमणन्यायः —** लोके यदि कश्चन ब्राह्मणः स्ववृत्तिं विहाय श्रमणवृत्तिं (बौद्धभिक्षुवृत्तिम्) आचरति, तर्हि सः ब्राह्मणश्रमण इत्युच्यते । अर्थात् परवृत्तिसमाचरणेन तस्य पूर्ववृत्तेः त्यागो न भवति । अस्य न्यायस्य प्रयोगः विश्वनाथेन चतुर्थपरिच्छेदे व्यङ्ग्यार्थविचारप्रसङ्गे कृतः । व्यङ्ग्यार्थः यद्यपि अलङ्कार्यो भवति तथापि "ब्राह्मणश्रमणन्यायेन" तस्य अलङ्कारत्वमपि स्वीक्रियते । तदुक्तं - "व्यङ्ग्यस्य अलङ्कार्यत्वेऽपि ब्राह्मणश्रमणन्यायादलङ्कारत्वमुपचर्यते" (सा.द. - चतुर्थपरिच्छेदे) इति।

(५) **जतुकाकाष्ठन्यायः —** साहित्य दर्पणे दशमपरिच्छेदे श्लेषालङ्कारप्रसङ्गे अयं न्यायः प्रदत्तोऽस्ति । "श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते"[१०] इति श्लेषालङ्कारस्य लक्षणम् । अस्य भेदत्रयं सम्भवति । यथा – सभङ्गश्लेषः, अभङ्गश्लेषः, सभङ्गाभङ्ग-श्लेषश्चेति । यत्र कस्यापि शब्दस्य विभाजनेन बहवोऽर्थाः समागच्छन्ति, तत्र सभङ्गश्लेष उच्यते । यथा श्रीहर्षस्य नैषधचरिते "नैषधराजगत्या" इत्यत्र शब्दानां भङ्गेन नलादिनिर्दिष्टाः पञ्च अर्थाः सम्भवन्ति । अथवा "वृषभानुजा" इत्यत्र शब्दभङ्गेन "वृषभस्य अनुजा" इत्येकः, "वृषभानोः जायते या सा" इति वृषभानोः कन्यार्थे द्वितीयोऽर्थः । विना भङ्गं शब्दात् यदि अर्थबाहुल्यं दृश्यते, तत्राभङ्गश्लेष इति कथ्यते । यथा – "प्रतिकुलतामुपगते हि विधौ" इत्यत्र विधिशब्दस्य विधुशब्दस्य च सप्तम्येकवचने प्रयोगः दृश्यते । अतः अभङ्गोऽयं शब्दः अर्थद्वयं प्रतिपादयति । अत्र सभङ्गश्लेष एव शब्दश्लेष अभङ्गस्त्वर्थश्लेष इति केचन स्वीकुर्वन्ति । तेषां मतं दूषयन् विश्वनाथेनोच्यते —

"इह केचिदाहुः सभङ्गश्लेष एव शब्दश्लेषविषयः । यत्रोदात्तादिस्वर-भेदाद्भिन्नप्रयत्नोच्चार्यत्वेन भिन्नयोः शब्दयोर्जतुकाष्ठन्यायेन श्लेषः"[११] इति ।

अत्र सभङ्गो नाम वर्णव्यूहेषु भङ्गेन युतः, तद्भावात्मकेन भिन्नपदेन वा सहितः । एवं शब्दद्वैधभिन्न-निर्व्यूढार्थद्वैविध्यात् सभङ्गः शब्दश्लेषविषयो भवतीत्यभिप्रायः । शब्दाः उच्चैः, नीचैः, अनुनासिकादिभिः, काक्वा च उच्चार्यन्ते । तेन द्वावपि भिन्नौ शब्दौ कदाचित् एकपदवच्छ्रूयन्ते । एतादृशस्थले भिन्नयोरपि तयोः शब्दयोः जतुकाष्ठन्यायेन एकशब्द-

व्यूहत्वेन स्वीकारो भवति । अर्थात् यथा - जतुका-काष्ठयोः पृथक्त्वे सत्यपि जडीकृतयोरनयोरेकतैव स्वीक्रियते ; तथैव भिन्नयोः पदयोः शब्दयोर्वा एकत्र वर्णव्यूहे सन्निवेशोऽत्र स्वीक्रियते ।

**(६) एकवृन्तगतफलद्वयन्यायः —** अभङ्गश्लेषपक्षे अयं न्याय उद्धृतः । यथा एकस्मिन् वृन्ते फलद्वयं भवति, तथैव एकस्मिन्नेव शब्दे अर्थद्वयं भवतीत्यभिप्रायः।

**(७) दण्डापूपिकन्यायः —** साहित्यदर्पणे अर्थापत्त्यलङ्कारलक्षणप्रसङ्गेऽयं न्याय उपस्थापितः । यथा – "दण्डापूपिकन्यायार्थागमोऽर्थापत्तिरिष्यते"[१२] इति । दण्डापूपयोर्भावः दण्डापूपिका । एकस्मिन् दण्डे अपूपं संयोज्य संस्थापनादनन्तरं कश्चन मूषकः आगत्य तद्भक्षणावसरे दण्डं भक्षयति, अपूपमपि भक्षयति इति आवश्यकीयवस्तुभक्षणेन सह अनावश्यकीयवस्तुनोऽपि भक्षणमत्र संसूच्यते । एवमर्थापत्त्यलङ्कारेऽपि कस्यचिदर्थस्य निष्पत्तौ सामर्थ्यात् समानन्यायत्वलक्षणात् अर्थान्तरमप्यापतति । उक्तं च साहित्यदर्पणे वृत्तौ – "मूषकेण दण्डो भक्षित इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापततीति न्यायो दण्डापूपिका" इति । अत्र क्वचित्प्राकरणिकार्थात् अप्राकरणिकस्यार्थस्यापतनं क्वचिदप्राकरणिकार्थात्प्राकरणिकस्यार्थस्येति द्वौ भेदौ ।

**(८) खले-कपोतिकान्यायः —** अयं न्यायः विश्वनाथेन साहित्यदर्पणे समुच्चयालङ्कारप्रसङ्गे उपस्थापितः । यथा —

**समुच्चयोऽयमेकस्मिन् सति कार्यस्य साधके ।**
**खलेकपोतिकान्यायात्तत्करः स्यात्परोऽपि चेत् ।।**[१३]

एकत्र धान्यमर्दनखले क्षेत्रे वा धान्यकणभक्षणार्थं सर्वेऽपि कपोताः एककालेन अवतरन्तीति न्यायस्यास्यार्थः । वस्तुतः गुणक्रियायौगपद्यं समुच्चयालङ्कारस्य लक्षणमुच्यते। अर्थात् गुणानां वैमल्यादीनां यौगपद्येनावस्थानं तथा च क्रियाणां यौगपद्येनावस्थानं समुच्चयालङ्कार इत्युच्यते । एकस्य सिद्धिहेतुत्वे अन्यस्य तत्करत्वं समुच्चयस्यैको भेदः। अस्मिन् प्रसङ्गे एव खलेकपोतन्यायः प्रयुक्तः। यत्र एकः कस्यचित्कार्यस्य सिद्धिहेतुत्वेन प्रक्रान्तस्तत्र अन्येऽपि यदि तत्स्पर्धया तत्सिद्धिं कुर्वन्ति, तदा समुच्चयः इत्युच्यते । उदाहरणं यथा –

**हंहो धीरसमीर ! हन्त जननं ते चन्दनक्ष्माभृतो**
**दाक्षिण्यं जगदुत्तरं परिचयो गोदावरीवारिभिः ।**
**प्रत्यङ्गं दहसीति मे त्वमपि चेदुद्दामदावाग्निव-**
**न्मत्तोऽयं मलिनात्मको वनचरः किं वक्ष्यते कोकिलः ।।**

अत्र दाहे एकस्मिन् चन्दनक्ष्माभृज्जन्मरूपे कारणे सत्यपि दाक्षिण्यादीनां हेत्वन्तराणामुपादानात् समुच्चयालङ्कारः ।

**(९) काकतालीयन्यायः —** समाध्यलङ्कारप्रसङ्गे अस्य न्यायस्योल्लेखः दृश्यते। तत्र समाध्यलङ्कारस्य लक्षणमुक्तं साहित्यदर्पणे —

**"समाधिः सुकरे कार्ये दैवाद्वस्त्वन्तरागमात्"**[१४] इति ।

कस्यापि ताडवृक्षस्याधः कश्चन पथिकश्शयान आसीत् । तदा वृक्षस्योपरि कश्चन काकोऽपि अवर्तत । यदा काकस्ततः उड्डयति स्म, तदा वृक्षात्पक्वं तालफलमेकमधोऽपतत्। अत्र फलं पक्वमासीदिति पतितमिति पथिकेन न ज्ञायते, अपि तु फलपतनस्य कारणं काकस्य उड्डयनमेवेति चिन्त्यते । एवं यत्र वस्तुद्वयमेककालेनैव सम्भवति, तत्र उभयोर्मध्ये सम्बन्धाभावेऽपि जनैः सः सम्बन्धः स्वीक्रियते । एतादृशेषु सन्दर्भेषु च काकतालीय-न्यायस्यावतारणा भवति । एवं समाध्यलङ्कारे कार्ये सुकरे सत्यपि दैवाद्वस्त्वन्तरस्यागमनं भवति, तदेव च कार्यस्य कारणत्वेन विवक्ष्यते । उदाहरणं यथा —

**मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।**
**उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ।।** इति ।

अत्र कश्चन नायकः नायिकायाः मानापनोदनार्थं तस्याः पादयोः पतित्वा यदा निवेदयति, तदा भाग्यवशात् आकाशे घनगर्जनं श्रूयते । तेन च घनगर्जनेन नायिका नायकमालिङ्गति । एवं कार्यसिद्ध्यर्थं नायकस्य पादतले पतनमुत घनगर्जनमिति कारणद्वये सत्यपि दिष्ट्या उदीर्णस्य घनगर्जनस्यैव सम्बन्धस्वीकारात् काकतालीयन्यायोऽत्र स्वीक्रियते।

**(१०) तृणारणिमणिन्याय:/दण्डचक्रन्यायश्च —** न्यायद्वयमिदमाचार्यमम्मटेन काव्यप्रकाशे उक्तस्य काव्यकारणस्य विचारप्रसङ्गे उपस्थापितम् । तत्रोक्तम् —

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।**
**काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।।**[१५]

अत्र काव्यस्य निर्माणे शक्ति:, निपुणता, अभ्यास: इति वस्तुत्रयमपेक्ष्यते । इत्येवं बहुवचने "हेतव:" इति नोक्त्वा "हेतु:" इत्येकवचने उपन्यासस्य कारणमत्रोच्यते। तृणारणिमणिन्यायेन न व्यस्ता अपि तु दण्डचक्रन्यायेन समस्ता इति । अर्थात् यथा अग्ने: संयोगार्थं कस्यापि एकस्य वस्तुन: तृणस्य वा अरणेर्वा, मणेर्वा स्वीकारो भवति, तथैव काव्यनिर्माणकारणत्वेन शक्ते:, निपुणताया:, अभ्यासस्य वा स्वीकारो न भवति; अपि तु यथा मृद्भाण्डस्य निर्माणार्थं दण्डस्य, चक्रस्य च उभयोरावश्यकताऽस्ति एकस्याभावे तन्निर्मातुं न शक्यते ; तथैव शक्तित्रये एकस्याभावे काव्यनिर्माणं न सम्भवतीत्यर्थ: ।

**(११) नीरक्षीरन्याय: —** अस्य न्यायस्योपयोग: सङ्करालङ्कारप्रसङ्गे क्रियते। सङ्कर-संसृष्ट्याख्ययोरलङ्कारयोरेकाधिकालङ्काराणां समावेश: दृश्यते । यथोक्तं साहित्यदर्पणे —

**यद्येत एवालङ्कारा: परस्परविमिश्रिता: ।**
**तदा पृथगलङ्कारौ संसृष्टि: सङ्करस्तथा ।।**[१६]

तत्र सङ्करालङ्कारस्य लक्षणमेवमुक्तं यत् —

**अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।**
**सन्दिग्धत्वे च भवति सङ्करस्त्रिविध: पुन: ।।**[१७]

यथा नीरमिश्रितक्षीरे नीरक्षीरयोरवस्थिति: पृथज्ज्ञातुं न शक्यते, तथैव अत्र सङ्करालङ्कारेण अलङ्काराणं पृथक् स्थितिर्नैव भवति इत्यभिप्राय: । उदाहरणं यथा –

**आकृष्टिवेगविगलद्भुजगेन्द्रभोग-**
**निर्मोकपट्टपरिवेष्टनयाम्बुराशेः ।**
**मन्थव्यथाव्युपशमार्थमिवाशु यस्य**
**मन्दाकिनी चिरमवेष्टत पादमूले ।।**

अत्रापह्नुति-श्लेष-अतिशयोक्ति-उत्प्रेक्षा-समासोक्त्याद्यलङ्काराणामङ्गाङ्गि-भावेनावस्थानं नीरक्षीरमिश्रणवदस्ति ।

(१२)**तिलतण्डुलन्यायः** — संसृष्ट्यलङ्कारेऽस्य न्यायस्योपयोगः क्रियते । संसृष्टेर्लक्षणं यथा — "मिथोऽनपेक्षमेतेषां स्थितिः संसृष्टिरुच्यते"[१८] इति । यथा तिलतण्डुलयोः मिश्रणे तिलानां तण्डुलानां च पृथगवस्थानं द्रष्टुं शक्यते ; तथैव संसृष्ट्यलङ्कारेण शब्दालङ्कारस्य अर्थालङ्कारस्य वा पृथक्सत्ताऽनुभूयते । उदाहरणं यथा –

**देवः पायादपायान्नः स्मेरेन्दीवरलोचने ।**
**संसारध्वान्तविध्वंसहंसः कंसनिषूदनः ।।**

अस्मिन्नुदाहरणपद्ये "पायादपायादि"ति यमकम्, "संसारध्वान्तविध्वंसहंसः कंसनिषूदनः" इति स-कारसाम्यादनुप्रासः, द्वितीयपादे रूपकम्, उपमा चेति बहूनामलङ्काराणं पृथगवस्थानमाकलयितुं शक्यते। अतः तिलतण्डुलन्यायेनात्र संसृष्टिः स्वीक्रियते ।

(१३) **देहलीदीपन्यायः** — काव्येषु कविभिः अपि अर्थान्तरन्यासालङ्कारप्रसङ्गे बहूनां लोकनीतीनामुदाहरणत्वेन उपन्यासः क्रियते । तत्र मदीयेऽस्मिन् श्लोके "देहलीदीपनीतिः" इति लोकन्यायस्य आकलनं कर्तुं शक्यते । यथा —

**ईक्षा यस्यास्समाना श्वशुरजनकयोस्सद्मनोस्सद्विचारे**
**ज्येष्ठे श्रेष्ठा च भक्तिर्भवति निरुपमा देहलीदीपनीत्या ।**
**कार्ये दक्षा गृहस्था बहुविधरसनास्वादभोज्यादिपाके**
**निष्पक्षा न्यायनिष्ठाऽचलमतिधरणी प्रेयसी कल्पिता सा ।।**

अर्थात् गृहे देहलीस्थः कश्चन दीपः यथा उभयप्रकोष्ठं प्रकाशयति, तथैव ऊढा रमणी श्वशुर-जनकयोः कुलमर्यादां प्रकाशयतीत्यर्थः ।

एवं प्रकारेण बहवो न्यायाः साहित्यशास्त्रे अलङ्कारशास्त्रे काव्येषु च प्रयुक्ताः दरीदृश्यन्ते । तेषु दिङ्मात्रमेवात्र परिशीलितमिति शम् ।

## सन्दर्भाः


१) न्यायसिद्धान्तमुक्तावली (दिनकरी-रामरुद्रीभ्यां संवलिता) - पृ. ३५९

२) महाभारते उद्योगपर्वणि (५/४३/६३)

३) काशिकावृत्तौ "अनद्यतने लङ्" (३/२/११) इति सूत्रव्याख्याने

४) महाभाष्यम् - १/४/४ ; १-४-११० सूत्रव्याख्यानसन्दर्भे

५) महाभाष्यम् - पश्पसाह्निकम्, ९-२-२

६) काव्यप्रकाशः - १/३

७) साहित्यदर्पणः - १/३

८) साहित्यदर्पणः - ३/१

९) तत्रैव - ३/१४-१६

१०) तत्रैव - १०/११

११) तत्रैव - श्लेषविचारप्रसङ्गे

१२) तत्रैव - १०/८३

१३) तत्रैव - १०/८४

१४) तत्रैव - १०/८५

१५) काव्यप्रकाशे - १/३

१६) साहित्यदर्पणः - १०/९७

१७) तत्रैव - १०/९८

१८) तत्रैव - दशमपरिच्छेदे

## सहायकग्रन्थाः

१) कारिकावली न्यायमुक्तावलीसंवलिता (दिनकरी-रामरुद्रीव्याख्याभ्यां सनाथीकृता), राष्ट्रियसंस्कृत-संस्थानम्, ५६-५७, इन्स्टिट्युशनल् एरिआ, जनकपुरी, नई दिल्ली, ११००५८, पुनर्मुद्रितसंस्करणम्, २००२

२) महाभारतम् — https://sa.wikisource.org/wiki/महाभारतम्-०५-उद्योगपर्व-०४३

३) काशिकावृत्तिः (श्रीवामनजयादित्याभ्यां प्रणीता अष्टाध्यायीव्याख्या), पण्डित ईश्वरचन्द्रसम्पादिता, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली

४) महाभाष्यम् (द्वितीयखण्डम्) - सम्पादकः - शिवदत्तशर्मा, चौखम्बा संस्कृतप्रतिष्ठानम्, ३८-यू.ए., जवाहर नगर, बंगलो रोड, दिल्ली - ११०००७, संस्करणम् - १९८८

६) काव्यप्रकाशः (मम्मटकृतः) — डॉ.गङ्गानाथझासम्पादितः, भारतीयविद्याप्रकाशनम्, वाराणसी-१, संस्करणम् - १९६७

७) साहित्यदर्पणः (लक्ष्मीराजटीका) - आचार्यकृष्णमोहनशास्त्री, चौखम्बा संस्कृत सिरीज् ऑफिस्, वाराणसी - १, संस्करणम् - १९६७

ISSN: 2231-0452

# औचित्यं विश्वव्यवहारहेतुः

*डा. सी. हेच्. नागराजु*
*(सहाचार्यः, अनुसन्धानप्रकाशनविभागः,राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**प्रस्तावः**

**कविताचारुताव्यक्तिधुरमुद्वोढुमीश्वरी ।**
**औचिती काप्यनौचित्यप्रतियोगिन्युदाहृता ।।**
**यथावद्वस्तुवितते: प्रकृतेर्धर्मदर्शिका ।**
**तत्प्रसूतस्य काव्यस्याप्यौदार्यगुणगुम्भिका ।।**
**यथाभावं यथायोगं यथासत्त्वं यथाक्रियम् ।**
**औचित्यं तत्तथा भाव्यं यथार्थार्थनिबोधनम् ।।**
**अनेकधर्मावच्छिन्नकाव्यप्राणसमं हि यत् ।**
**तदलङ्कारत्यादीनतिशेते स्वसत्तया ।।**
**यद्विना यन्न वर्तेत तत्प्रपुष्णन् महाकविः ।**
**कृतेर्यशस्यमायुष्यमादधीत सुयुक्तिमान् ।।** (आत्मकृतिः)

प्रकृतेः सर्वाङ्गीणायाः प्रत्यङ्गपरिस्फूर्तो नित्योऽनपायी धर्मः औचित्यनामा यस्य च निसर्गः याथार्थ्येन चराचरस्य जगतो दर्शनमिति निध्येयः । वस्तुतो लोकव्यवहारस्य निखिलस्यापि तद्योगेनैवावस्थाने समेषामुपादेयतायां निरुपद्रव इति मतिर्महताम् । तत्रैव लोकव्यवहारे कलाशास्त्रमपि निजसत्तां समन्तात् सर्वोत्कर्षेणाभिबृंहयति । तत्र कवनकलापि श्रुतेरारभ्य कालेनेयता निरवच्छिन्नधारारूपेण प्रवहन्ती तस्यैव साचिव्यमाचरति । कवयितुं योग्यत्वादेव काव्यं संप्रवृत्तम् । तत्समाश्रयणेनैव कवनकलाया विभूतिः ।

किन्धर्मावच्छिन्नं काव्यमिति विचारणायां कृतायां रसालङ्कारगुणरीति-ध्वन्यादिधर्मसमायुतं काव्याख्यं वस्त्विति भरतमुनिप्रभृतिजगन्नाथपर्यन्तलाक्षणिक-गणनिर्णीतिः। तथा सति तेषां रसादिधर्माणां सन्निवेशे जीवितायितं बीजमौचित्यमिति क्षेमेन्द्रसम्मतं मतं मीमांसव एव साम्प्रतमस्मिन् शोधपत्रे विचारं तदुन्मुखं विधित्सवः स्याम ।

काव्यस्य सप्तविंशत्यङ्गेषु व्यापित्वेन औचित्यस्य सत्तां क्षेमेन्द्रः प्रतिशुश्राव । परन्तु शोधपत्रेऽस्मिन् लघुवपुषि तावान् महाविषयः नैवोपस्थाप्यः । सोऽयं मदीयशोधग्रन्थे सर्वात्मना समुपादीयते । साम्प्रतमत्र रसः, छन्दः, अलङ्कारश्च औचित्यसंवलनेन प्रमातृणां परमां निर्वृतिं नियच्छेदिति विचारोऽत्र पुरस्क्रियते ।

**विषयोपस्थापनम् -**

भरतमुनिप्रणीतनाट्यशास्त्रस्य षोडशाध्याये रसानुरूपं छन्दः अलङ्कारश्च कथं प्रयोज्यमित्यत्र सम्यक् प्रतिपत्तिर्दर्शितास्ति । सा च त्रिविक्रमभट्टमहाकविना निजमदालसाचम्पूकाव्ये कथं समुपात्तेत्ययमेव परिधिः शोधपत्रस्य ।

भरतमुनिना तत्रैव शृङ्गाररसे आर्यावृत्तं मृदुवृत्तं च छन्दः, रूपकं दीपकं चालङ्कारः, करुणे शक्वरी (१४) अतिधृतिः च (१९) छन्दः, उपमा रूपकं चालङ्कारः, रौद्रे जगती (१२) अतिजगती च (१३) छन्दः, उपमा रूपकं चालङ्कारः, वीरे संकृतिः (२४) जगती अतिजगती च छन्दः, उपमा रूपकं चालङ्कारः, बीभत्से गुर्वक्षरप्रायकृतं छन्दः, उपमा रूपकं चालङ्कारः, अद्भुते लघ्वक्षरप्रायकृतं छन्दः, उपमा रूपकं चालङ्कारः, यथायोगं कविभिः प्रयोज्यमिति नियमः कृतः। पुनः हास्ये भयानके शान्ते तदनुरूपच्छन्दोऽ-लङ्कारविधिः यथोचितं सम्पाद्य इति सुव्यक्तमुपन्यस्त एव ।[१]

साम्प्रतं मदालसाचम्पूकाव्ये कविना त्रिविक्रमभट्टेन शृङ्गारादिरसपरिपोषणविधौ छन्दोऽलङ्काराणां सन्निवेशे मुनिनियतिः कथं परिपालितेति क्रमशः प्रसङ्गानुप्रसङ्गं समीक्षामहेऽत्र।

**शृङ्गारः -**

काव्यस्यास्य द्वितीयोल्लासे गन्धर्वराजस्य विश्वावसोः प्रियनन्दिनी मदालसा सखीभिः जलक्रीडादिविलासविधिमाचरितुमुद्यताभिः वनशोभादर्शनोत्सुकाभिः ताभिः सपरिहासं चारुभाषितैरेवमभिधीयमानास्ति ।

**सोऽयं प्रवीर इव भाति पलाशशाखी**
**कामं शिलीमुखगणैरभिसंवृतोऽपि ।**
**आपादपल्लवितरक्तवपुर्धरोऽपि**
**यः पङ्कजाक्षि ! विजहाति न हि स्थिरत्वम् ।।** (२-२०)

श्लोकेऽस्मिन् उपमा[२] समासोक्तिः[३] विशेषोक्तिरिति[४] अलङ्कारत्रितयमस्ति । अत्र पलाशवृक्षरूपप्रस्तुतवृत्तान्तादप्रस्तुतः स्थिरनायकविषयकवृत्तान्तोऽपि परिस्फुरति इत्यतः समासोक्तिः । तथा "**सोऽयं प्रवीर इव भाति पलाशशाखी**" इत्यत्र पलाशशाखी विषयः प्रवीरः विषयी , इवेत्युपमावाचकः, भानमत्र समानो धर्मः इत्येवं चतुर्णामपि बीजानां समुपादानात्पूर्णोपमा । तथा चात्रायं पलाशतरुः सर्वाङ्गेषु रक्तिमानमाकलयन्नपि नाम सर्वात्मना गाढानुरागपरिनद्धचित्तवृत्तिरपि नैव स्थिरतामुत्सृजतीति कथनेन रक्तत्वरूपहेतौ सत्यपि न तत्र तदनुरूपसङ्गमादिकार्यस्यानुपपत्तेः भवत्येव विशेषोक्तिरलङ्कारः ।

तथा ह्यत्र शृङ्गारो रसः । प्रस्तुतवृत्तान्ते अचेतनगतत्वादाभासविषयश्चेदपि अप्रस्तुते तु नायकस्य कस्यचिद् रतिमत आलम्बनाश्रयस्य अभिवर्णनात् स च स्फुटः सर्वप्रतीत एव । अत्र मुनिमर्यादया आर्यावृत्तं मृदुवृत्तं वा प्रयोज्यमिति शासनात् कविना वसन्ततिलकानामकं सरलगतिकं वृत्तमुपात्तमस्ति ।

**करुण: -**

अत्रैव चतुर्थोल्लासे तालकेतुनामकमायाविराक्षसकपटचेष्टया गतासुं प्रियतमां प्रत्याक्रोशतो राजसुतस्य ऋतुध्वजस्य विलापोऽयं -

**चेतस्सन्निहिते ! सितच्छदगते सम्फुल्लमल्लीस्मिते !**
**हा कान्ते ! विषयास्त्वया सह मया ये येऽनुभूता: पुरा ।**
**आरुढस्मृतयस्त एव शतधा कुर्वन्ति चेतोऽधुना**
**प्रोच्चण्डानिलघट्टनानि ललितं रम्भापलाशं यथा ।।** (४-१०८)

श्लोकेऽस्मिन् रस: क इत्यत्र विचिकित्सा जागर्ति । सा चैवंविधा । अयं हि रस: विरहविप्रलम्भशृङ्गारो वा उत करुणरसो वेति । अत्र जगन्नाथदर्शितनियतिमुपस्कृत्यैव रसो निर्णीयते ।

**"स्त्रीपुंसयोस्तु वियोगे जीवितत्वज्ञानदशायां वैक्लव्यपोषिताया: रतेरेव प्राधान्यात् शृङ्गारो विप्रलम्भाख्यो रस: । वैक्लव्यं तु सञ्चारिमात्रम् मृतत्वज्ञानदशायां तु रतिपोषितस्य वैक्तव्यस्येति करुण एव ।"**

- (रसगङ्गाधर: - प्रथमाननम्, पृ. सं. १४२)

अत्र स्वार्थे मृतां प्रियतमां प्रति क्रोशति कुवलयाश्वे प्रिया जीवितेति ज्ञानं निराश्रयम्। अतस्तदीयरतिपोषितस्य शोकस्यैव प्राधान्यात् करुण एव । भावि नागराजानुग्रहात् पुनर्जीविता भविष्यति मे प्रियेति ज्ञानस्यापि साम्प्रतं निरवकाशात् रतेरेवात्र शोकाङ्गतया करुण एवात्र रस इति नियत: । त्वया सह मया अनुभूता: विषया: सर्वेऽपि सम्प्रति स्मृतिपदमारुढा: मदीयं हृदयं शतधा कुर्वन्तीति कथनं रत्यपेक्षया शोक एवात्र बलीयानिति प्रतीतिं द्रढयति ।

तथा चेदत्र उपमा रूपकं वा अलङ्कार: भवेदिति भरतशासनमप्यनुगतमेव । हे प्रिये त्वदीयस्मृतय: मम मन: शतधा शकलीकुर्वन्ति । यथा महातरस्विनो वातस्य

संघट्टनानि कदलीपत्रम्। इत्यत्र मनोवर्णनमुपमेयं, रम्भापत्रवर्णनमुपमानं, यथेत्युपमावाचकः, भेदः समानो धर्मः इत्यतः पूर्णोपमा समुल्लसति । छन्दश्चाप्यत्र अतिधृतिरेव । इदं हि छन्दः नवदशकम्। प्रतिपादमस्य नवदशाक्षराणि भवन्ति । अस्मिन्नेव छन्दसि शार्दूलविक्रीडितवृत्तमस्ति । तेनैवायं श्लोकः संग्रथितः ।

**वीरः -**

अत्र तृतीयोल्लासे स्वाभीष्टां गन्धर्ववंशविभूतिं मदालसां परिणीय राजधानीं प्रति दारैः समं प्रयान्तं ऋतुध्वजं संयुगे निहन्तुं सानुगो दैत्यनाथः पातालकेतुः सैन्येन सार्थं रणाजिरमवातरत्। तत्र तदीयानुचराः कुवलयाश्वेन कथमुद्यता व्यवहरन्तीति प्रसङ्गमुपन्यस्यति कविरत्र-

**उद्यत्पट्टिशभिन्दिपालपरषुप्रासासिचक्रोन्मिष-**
**त्कान्तिव्रातनिचोलिताखिलदिशाचक्राः प्रदष्टाधराः ।**
**हुङ्कारैः पदघट्टनैः प्रतिभयैः सञ्चालयन्तो भुवं**
**तं वीरं रुरुधुः पतङ्गशिशवः कल्पान्तवह्निं यथा ।।** (३-६७)

श्लोकेऽस्मिन् वीरो रसः सर्वानुभवसाक्षिकः स्फुटं प्रतीयते । नानाप्रहरणैर्नानाविध-प्रतिभयक्रूरकर्मभिः मण्डलाधीशतनूजन्मानमत्यर्थं भीषयितुं यत्नवतस्तान् दैतेयानुचरान् क्षणमात्रनिजकार्मुकविमुक्तसायकव्रातेन महाकालाग्निः पतङ्गशावकानिव लीलया पर्यदहत्। तादृशलोकोत्तरपराक्रमशालिनमायोधनभीमकर्माणमविज्ञाय ते पराभूताः ततः कालधर्ममिताश्च जाताः । एवं सर्वत्रास्मिन् प्रकरणे ओजस्विबन्धमयी रचना प्रभूतं दृश्यते।

तथा उपमालङ्कारोऽप्यत्र स्फुट एव ज्ञायते । "तं वीरं रुरुधुः पतङ्गशिशवः कल्पान्तवह्निं यथा" इत्यत्र स सर्वाङ्गीणः समुल्लसति । स वीरः ऋतुध्वजः ते च दैत्यानुगाः उपमेयस्थानिनः, कल्पान्तवह्निः पतङ्गशिशवः उपमानस्थानिनः, यथेत्युपमावाचकः, रोधोऽत्र समानो धर्मः । अतः पूर्णोपमासौ । रसेऽस्मिन् संकृतिः

जगती अतिजगती छन्दः प्रयोज्यमिति भरतनियतिः। परन्तु बहुत्रापि लौकिकवाङ्मये अतिधृतिच्छन्दसि (शार्दूलविक्रीडिते) वीररसः कविभिः भृशं परिपोष्यमाणोऽस्ति ।

**बीभत्सः -**

अत्र हि तृतीयोल्लासे कुवलयाश्वस्य निजधनुर्विद्याकौशलक्षणमात्रप्रयोगेन असुरवाहिनी कां वा दुरापत्तिदशामापेति वर्णयितुं कविः श्लोकमिमं प्रस्तौति ।

**रक्षस्सैन्यपिचण्डतुङ्गपुलिना दोर्दण्डकुम्भीनसा**
**सक्थिग्राहझषा करोटिकमठा बालावलीशैवला ।**
**मेदोदुर्गमकर्दमास्थिपटली शम्बूकशङ्खाङ्किता**
**रेजे राजकुमारबाणनगजा कीलालनीरा सरित् ।।** (३-८०)

श्लोकेऽस्मिन् बीभत्सो रसः विद्यते । रणाजिरे मृतकलेवरेभ्यः प्रसृतशोणितमेदोऽस्थि-मांसादिजुगुप्सितवस्तुवर्णनात् तत्स्थायिको बीभत्सो रस इति प्रतिपत्तव्यः।

अत्र हि रूपकालङ्कारः[५] अभेदात्मा कविना सम्यक् प्रयुक्तः । महीपतिसूनोः कार्मुकनिर्मुक्तबाणसंहतिः नगजनदीत्वेन , शोणितं जलत्वेन, निहतराक्षसानामायतान्युदराणि पुलिनत्वेन, बाहुदण्डाः सरीसृपत्वेन, सक्थीनि नक्रमीनत्वेन, करोटयः कमठत्वेन, बालावलिः शैवलत्वेन, मेदः दुर्गमकर्दमास्थिपटलत्वेन, जलशुक्तयः कम्बुत्वेन, रूपवत्कृताः परस्परमभिन्नाः सन्ति । अतोऽत्र अभेदरूपकालङ्कारः ।

पुनरत्र गुर्वक्षरप्रायकृतं छन्दः मुनिना नियतमस्ति । प्रकृतश्लोकः शार्दूलविक्रीडित-वृत्तोपनिबद्धः । वृत्तमिदमतिधृतिच्छन्दोगतम् । मसजसततगा गणाश्चास्य। तथा चेत् अष्टौ लघुवर्णाः एकादशगुरुवर्णाश्च भवन्त्यत्र । गुर्वक्षरभूयस्त्वादस्य वृत्तस्य मुनिमतदृशा प्रयोगः समुचित एव ।

**उपसंहृतिः -**

एवं काव्ये सर्वत्रापि औचित्यमुखेन सर्वाङ्गसन्निवेशः कृतो वा न वेति विचारः सर्वथापि विधेय एव । न केवलं काव्यजगति लोकेऽपि अनेनैव पथा सूक्ष्मपरिशीलनेन सर्वमपि सुव्यवस्थितं भावनीयमिति धिया विरतश्चानेन ।

## प्रमाणानि

१. लघ्वक्षरप्रायकृतमुपमारूपकाश्रयम् ।
काव्यं कार्यं च नाट्यज्ञैर्वीररौद्राद्भुताश्रयम् ।।
गुर्वक्षरप्रायकृतं बीभत्से करुणे तथा ।
कदाचिद्वीररौद्राभ्यां यदाघर्षणजं भवेत् ।।
रूपदीपकसंयुक्तमार्यावृत्तसमाश्रयम् ।
शृङ्गारे च रसे कार्यं मृदुवृत्तं तथैव च ।।
उत्तरोत्तरसंयुक्तं वीरे काव्यं तु यद्भवेत् ।
जगत्यातिजगत्या वा संकृत्या वापि योजयेत् ।।
तथैव युद्धसंफेटावुत्कृत्यां संप्रकीर्तितौ ।
करुणे शक्वरी ज्ञेया तथैवातिधृतिर्मता ।।
यद्वीरे कीर्तितं छन्दः तद्रौद्रेऽपि प्रयोजयेत् ।
शेषाणामर्थयोगेन छन्दः कार्यं प्रयोक्तृभिः ।।
यच्छन्दः पूर्वमुद्दिष्टं विषमार्धसमे समम् ।
उदारमधुरैः शब्दैः तत्कार्यं तु रसानुगम् ।। (नाट्यशास्त्रम् - १६-११५-१२१)

२. उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः । (कुवलयानन्दम् - ६)

३. समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् । (कुवलयानन्दम्- ६१)

४. कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे । (कुवलयानन्दम् - ८३)

५. तद्रूपकमभेदो य उपमानोपमेययोः । (काव्यप्रकाशः - १०-९३)

## उपयुक्तग्रन्थसूची


१) औचित्यविचारचर्चा- श्रीव्रजमोहन झा, चौखम्बा विद्याभवन, वाराणसी, २००७

२) कुवलयानन्दम् - श्रीभोलाशङ्कर व्यास, चौखम्बा विद्याभवनम्, वाराणसी, २०१०

३) काव्यप्रकाशः - श्रीहरिशङ्करशर्मा, चौखम्बा प्रकाशनम्, वाराणसी , २००७

४) नाट्यशास्त्रम् - श्रीपारसनाथद्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९६

५) मदालसाचम्पूः - निरञ्जनमिश्रः, सत्यं प्रकाशन, न्यूदिल्ली, २००५

६) रसगङ्गाधरः - श्रीबदरीनाथ झा, चौखम्बाप्रकाशन, वाराणसी, २००८

ISSN: 2231-0452

# समाजे आश्रमधर्मस्य प्रासङ्गिकता

***डा. सुधांशुशेखरमहापात्रः***
*(सहाचार्यः, धर्मशास्त्रविभागः, राष्ट्रियसस्कृतविद्यापीठम्, तिरुपतिः)*

प्रथमपुरुषार्थरूपस्य धर्मस्य प्रतिपादकत्वेन वेदाङ्गत्वेन च धर्मशास्त्रं भारतवर्षे सुविख्यातधर्मप्रमाणत्वेन गृह्यते। श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिरिति मनुवचनात्[१] धर्मशास्त्रस्य स्मृतिरेव अपरा संज्ञा। यद्यपि धर्मे मुख्यं प्रमाणं श्रुतिः तथापि तदनुमापकत्वेन स्मृतिः धर्मे प्रमाणं भवति । अतः श्रुतिप्रतिपादितो धर्मः श्रौतधर्मः तथा च स्मृतिप्रतिपादितः धर्मः स्मार्त्तधर्म इति जगति प्रसिद्धः। स च स्मार्त्तधर्मः याज्ञवल्क्यस्मृतिटीकाकारेण विज्ञानेश्वरेण[२] षोढा विभक्तः । यथा- वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति। तेषां समेषां धर्माणां समाजे उपयोग आसीत्, अस्ति स्थास्यति च । तेषु मया समाजे आश्रमधर्मस्य प्रासङ्गिकताविषये सम्प्रति चर्च्चा क्रियते।

"शतायुर्वै पुरुषः" इति श्रुतिवचनानुसारेण पुरुषस्य समग्रमायुश्चतुर्धा विभज्य चत्वार आश्रमाः परिकल्पिताः। ब्रह्मचर्य्याश्रमः, गृहस्थाश्रमः वानप्रस्थाश्रमः, सन्न्यासाश्रमश्चेति । तेषां चतुर्णामाश्रमिणां ये धर्माः ते आश्रमधर्मा इति कथ्यन्ते । तेषां धर्माणां समाजे प्रासङ्गिकता कीदृशी सा विचारणीया । तत्रादौ ब्रह्मचर्य्याश्रमविषये विचारः क्रियते ।

**ब्रह्मचर्य्याश्रमः -**

ब्रह्मणि चरति यः स ब्रह्मचारी । ब्रह्म नाम वेदः। उपनयनान्तरमेव वेदाध्ययने अधिकारो भवति। गर्भाष्टमे ब्राह्मणस्य, गर्भैकादशे क्षत्रियस्य, गर्भद्वादशे वैश्यस्य च उपनयनं भवतीति धर्मशास्त्रे प्रतिपादितम् ।यथोक्तं याज्ञवल्क्येन[३]-

**गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम् ।**

**राज्ञामेकादशे सैके विशामेके यथाकुलम् ।।** इति ।

शूद्रस्य स्त्रीणाञ्च उपनयनयाभावात् वेदाध्ययने अधिकारो नास्त्येव । तस्मात् कृतोपनयना द्विजाः गुरुगृहे आचार्यस्य गृहे वा स्थित्वा वेदाध्ययनं कुर्वन्ति स्म। तदानीं ते वेदाध्ययनात् ब्रह्मचारिणः कथ्यन्ते स्म । यत्र ते तिष्ठन्ति स्म स च आश्रमः ब्रह्मचर्य्याश्रमः, यावद्दारग्रहणं च तस्मिन् आश्रमे स्थीयते ।

साम्प्रतिकसमाजे गुरुकुले आचार्यकुले वा स्थित्वा वेदाभ्यासं कुर्वाणाः केचनापि दृश्यन्ते । सर्वकारपक्षतः तेषां कृते आवासव्यवस्था भोजनव्यवस्था अध्ययनव्यवस्था च कार्यते । किन्तु तेषां संख्या स्वल्पा एव । सामान्यरूपेण सर्वेषां सर्वासाञ्च शिक्षाग्रहणार्थं साधारणविद्यालयाः सर्वकारपक्षतः प्रतिष्ठापिताः। तत्र प्राथमिकस्तरादारभ्य विश्वविद्यालयस्तरं यावत् शिक्षा प्रदीयते । साम्प्रतिकसमाजस्य अनुकूलाः पाठ्यक्रमाः अपि निर्द्धारिताः। तत्राध्ययने सर्वेषां वर्णानां जातीनां पुरुषाणां स्त्रीणां अन्त्यजानां हरिजनानां गिरिजनानामपि अधिकारः प्रदत्तः । समाजे ये अनग्रसराः आसन् तेषां शिक्षणे प्रशिक्षणे च अधिकं प्रोत्साहनं दीयते यथा समाजे न कोऽपि अशिक्षितः न तिष्ठेत् । एतच्च अध्ययनं यावत्पर्यन्तं प्रचलति तावत्पर्यन्तं ब्रह्मचर्य्याश्रमः इति कल्प्यते । अत्र अध्ययनकाले यद्यपि शिक्षकाणां कृते छात्रैः किमपि देयं न भवति तथापि शिक्षकाः स्वयोग्यतानुसारेण सर्वकारपक्षतः वेतनं प्राप्नुवन्ति । प्राचीने काले अध्ययनार्थं उच्चवर्णानां कृते सुविधा प्रदीयते स्म , सम्प्रति तु नीचजातीनाम् इति भेदः। यद्भवतु अध्ययनावस्था अथवा छात्रावस्था एव सम्प्रत्यपि ब्रह्मचर्य्याश्रमे गच्छति ।

**गृहस्थाश्रमः-**

**अविप्लुतब्रह्मचर्यः लक्षण्यां स्त्रियमुद्वहेत् ।**

**अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।।**[४]

इति याज्ञवल्क्यवचनानुसारेण यादृशं लक्षणं दृष्ट्वा कन्या उदुह्यते स्म, सम्प्रति तेषु कानिचनापि विचार्य्यन्ते । तत्र आन्तर्लक्षणं दृश्यते न वा बहिर्लक्षणंतु दृश्यत एव । असुन्दर्यः स्त्रियः वराभावात् बहुत्र अविवाहिताः तिष्ठन्ति । अनन्यपूर्विकत्वस्य निरूपणं विचारो वा सम्प्रति कर्त्तुं न शक्यते । सगोत्रत्वसपिण्डत्वादिविचारस्तु भवत्येव। देशाचारदृष्ट्या कुत्रचित् सगोत्र-सपिण्डमध्ये विवाहो दृश्यते न तु सर्वत्र । धर्मशास्त्रे मनुना[५] अष्टविधविवाहाः प्रतिपादिताः। ते यथाा-

**ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः।**

**गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः।।** इति।।

अष्टविधेषु विवाहेषु सम्प्रति दैवार्षराक्षसविवाहानां प्रचलनं तु नास्ति । ब्राह्म-प्राजापत्ययोः पृथक् लक्षणभूतयोरपि विवाहो नैव दृश्यते परन्तु तयोः सङ्करूपः कश्चित्प्रकारः प्रचलति । गान्धर्वविवाहस्तु भूयस्त्वेन दृश्यते । क्वचित् गिरिराज्येषु आसुरविवाहः कुत्रचित् च पैशाचविवाहोऽपि दृश्यते । गृहस्थस्य पञ्चमहायज्ञानामनुष्ठानम् अनिवार्यमासीत्। प्रसङ्गेऽस्मिन् याज्ञवल्क्येन[६] प्रतिपादितं यत् -

**बलिकर्म स्वधाहोमस्वाध्यायातिथिसत्क्रिया ।**

**भूतपित्रमरब्रह्ममनुष्याणां महामखाः ।।** इति।।

सम्प्रत्यपि ते पञ्चमहायज्ञाः अनुष्ठीयन्ते । विवाहानन्तरमपि कश्चित् स्वशास्त्रस्यापि अध्ययनं करोति । स्वगृहे देवपूजा प्रत्यहमपि प्रचलति । पितृमातृक्षयदिवसे पितृयज्ञोऽपि प्रचलति। केचित् प्रत्यहमपि पितृतर्पणादिकं कुर्वन्ति । अतिथिधर्मेणागतानामपि गृहे सत्कारः क्रियते । भूतवलिस्थाने श्वकाकादीनां कृतेऽपि भक्ष्यभोज्यादिकं जना उत्सृजन्ति । प्राचीने काले सर्वे आश्रमा गृहस्थस्योपरि निर्भरशीला भवन्ति स्म, गृहस्थाश्रमश्च ज्येष्ठाश्रम इति मन्वादिभिः[७] प्रतिपादितम् । तद्यथा-

**यथा वायुं समाश्रित्य वर्त्तन्ते सर्वजन्तवः ।**

**तथा गृहस्थमाश्रित्य वर्त्तन्ते सर्व आश्रमाः ।।** इति।।

सम्प्रत्यपि गृहस्थाश्रमः ज्येष्ठाश्रमः श्रेष्ठाश्रमश्च कथ्यते । यद्यपि गृहस्थानां जीविका यथा वर्णानुसारेण स्थिरीकृता आसीत् तथा सम्प्रति नास्ति, तथापि स्वविद्याबुद्धिबलानुसारेण स्वकुटुम्बभरणार्थं जना धनमर्जयन्ति धर्मानुष्ठानं कुर्वन्ति च । तदानीं पित्रोः श्वशुरयोश्च यत् पादवन्दनादिकमासीत् तत् सम्प्रति नास्ति । एतेन गृहस्थाश्रमव्यवस्था सम्प्रत्यपि यथाकथञ्चित् प्रचलति ।

**वानप्रस्थाश्रमः -**

वने प्रकर्षेण स्थीयते यत्र स वानप्रस्थाश्रमः। गृहस्थः आत्मनः पलितकेशान् गलितनखदन्तांश्च दृष्ट्वा पुत्रस्य पुत्रमुखदर्शनं च कृत्वा ग्राम्यभोजनं परिधानं च परित्यज्य स्त्रिया सह एकाकी वा पञ्चाशद् वर्षे वयसि वनं गच्छेदिति धर्मशास्त्रे प्रतिपादितम्। अस्मिन् प्रसङ्गे महर्षिणा मनुनोक्तं[८] यत् -

**गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः।**

**पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ।।** इति।।

सम्प्रति न कोऽपि वनं व्रजति नापि वानप्रस्थो भवति । अतः वानप्रस्थाश्रमस्य साम्प्रतिककाले अद्यतनसमाजे काचित् प्रासङ्गिकता नास्ति ।

**सन्न्यासाश्रमः -**

पञ्चसप्ततितमे वर्षे वयसि सन्न्यासाश्रमस्य व्यवस्था प्राचीनकाले आसीत् । कश्चिद् वानप्रस्थाश्रमात् कश्चिद् गृहस्थाश्रमाद् वानप्रस्थो न भूत्वापि, कश्चिद् ब्रह्मचर्य्याश्रमाद् गृहस्थो न भूत्वा वानप्रस्थोऽपि न भूत्वा साक्षात् सन्न्यासी भवितुमर्हति स्म। परन्तु तदानीं ब्राह्मणस्यैव सन्न्यासाश्रमेऽधिकार आसीत् । यतो हि 'आत्मन्यग्निं समारोप्य' इत्यादि

मनुवचनात्[९], 'ब्राह्मणाः प्रव्रजन्तीति श्रुतेश्च केवलं ब्राह्मणस्यैवाधिकारः तत्र श्रूयते। तस्मिन् आश्रमे स्थितः सर्वथा अनासक्तो भूत्वा सर्वेभ्यो भूतेभ्यो अभयं दत्त्वा, भिक्षार्थी भूत्वा, त्रिदण्डी सकमण्डलुः एकाकी प्रव्रजेत् । एवं प्रकारेण इन्द्रियाणि विजित्य सर्वदा तपश्चरणशीलो भूत्वा अहिंसया ध्यान-धारणादिभिः,प्राणायाम-प्रत्याहारादिभिश्च सर्वाणि पापानि अपनोद्य देहस्य शोषणं कृत्वा मृत्योः प्रतीक्षायां तिष्ठेत् । प्रसङ्गेऽस्मिन्नुक्तं मनुना[१०]-

**प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्विषम् ।**
**प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ।।** इति।।

अतो मरणं यावदयमाश्रमः इति ज्ञायते । सम्प्रति तु गृहस्थाश्रमानन्तरं केचन सन्न्यासिनो भवन्ति । केचन च साक्षाद् ब्रह्मचर्य्याश्रमादनन्तरं विवाहं न कृत्वा । न ब्राह्मणस्य कृते केवलोयमाश्रमः। अत्र सर्वेषामधिकारो दृश्यते । द्विजातेः का कथा, शूद्रः, अन्त्यजोऽपि वैष्णवदीक्षां गृहीत्वा सन्न्यासी भवति । अनेके मठादिकं निर्माय तत्र आधिपत्यं संस्थाप्य संपच्छालिनो भोगिनोऽपि भवन्ति । केचित्तु तापसव्यञ्जना भगवदाराधनादिकं कृत्वा धर्मप्रवचनादिकञ्च दत्त्वा कालं नयन्ति। एवं प्रकारेण चत्वार आश्रमा प्राक्काले आसन् । सम्प्रति तु वानप्रस्थाभावात् त्रय एव आश्रमा दृश्यन्ते । एवं प्रकारेण समाजे आश्रमधर्मस्य प्रासङ्गिकता मयाऽत्र संक्षेपेण प्रतिपादिता।। इति।।

## सन्दर्भाः

१. म.स्मृ. २-१०
२. यास्मृ.मिता. पृ.-२
३. यास्मृ.-आ.-१४
४. यास्मृ.-आ.-५२
५. म.स्मृ. ३-२१
६. यास्मृ.-आ.-१०२

७. म.स्मृ. ३-७७

८. म.स्मृ. ६-२,३

९. म.स्मृ. ६-२५

१०. म.स्मृ. ६-७२

## सन्दर्भग्रन्थसूची

१. मनुस्मृतिः (मनुमहर्षिकृता), सम्पादकः - श्री पण्डित गोपालशास्त्रिनेने, चौखम्बासंस्कृतसीरिज, वाराणसी, १९७०

२. याज्ञवल्क्यस्मृतिः (याज्ञवल्क्यमहर्षिकृता), विज्ञानेश्वरप्रणीतमिताक्षराटीकासहिता, चौखम्बासंस्कृतअफीस, वाराणसी, १९८३

ISSN: 2231-0452

# 'ककुद्मन्तः' इति पदविषयकसाध्वसाधुविचारः

**डॉ. यदुवीरस्वरूपशास्त्री**

*(व्याकरणविभागसहायकप्राध्यापकः*
*राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ परिसरः, लखनऊ)*

एतल्लेखे रघुवंशकुमारसम्भवमहाकाव्ययोः कालिदासप्रयुक्तस्य 'ककुद्मन्तः' इति प्रयोगस्य पाणिनीयत्वमाहोस्विदपाणिनीयत्वमिति विषये विविधपक्षान्नाश्रित्य विचारस्समुपस्थापि। निष्कर्षत्वेन च 'ककुद्मन्तः' इति प्रयोगोऽपाणिनीय एवेति प्रत्यपादि। अपि चैतत्प्रसङ्गे 'प्रत्यये भाषायां नित्यम्' इति वार्तिकार्थस्तदुदाहरण-ङ्कथञ्चिन्मयञ्चेत्यपि न्यरूपीति।

"कथं तर्हि 'मदोदग्राः ककुद्मन्तः' इति?[1]" वाक्यमिदम्भट्टोजिदीक्षितेन सिद्धान्तकौमुद्या हल्सन्धिप्रकरणे 'प्रत्यये भाषायां नित्यम्' इति वार्तिकस्य प्रत्युदाहरणत्वेन अलेखीति। ककुद्मन्त इति पदविषयकसाध्वसाधुविचारात् प्रागादौ तद्विषयकवार्तिकार्थो विचार्यते।

यरः पन्दान्तस्यानुनासिके परेऽनुनासिको वा स्याद् इत्यर्थकं सूत्रं 'यरोऽनु-नासिकेऽनुनासिको वा' (8-4-45) इति। तस्योदाहरणम्- एतन्मुरारिः एतद्मुरारिः। अत्र प्रसङ्गे 'प्रत्यये भाषायां नित्यम्' इति वार्तिकमपि उपन्यस्तम्। एतस्यार्थस्तु-भाषायाम् इत्युक्ते लौकिकप्रयोगे न तु वैदिकप्रयोगे। भाष्यते=उच्यते व्यवहारकर्तृभिरिति व्युत्पत्तिबलात्। तथा च लौकिकप्रयोगव्यवहारकाल इत्यर्थः। 'यरोऽनुनासिकेऽनुनासिको वा' इति सम्पूर्णं सूत्रमनुवर्तते वेति विहाय। 'न पदान्ताट्टोरनाम्' इत्यतः पदान्तादित्यनुवृत्तं सत् षष्ठ्यन्ततया विपरिणम्यते। एवञ्च वार्तिकार्थः फलति यरः पदान्तस्य

अनुनासिकादौ प्रत्यये परेऽनुनासिकादेशो नित्यं स्याल्लौकिकप्रयोगव्यवहारकाल इति। न च 'अनुनासिके प्रत्यये' इत्यत्र अनुनासिकविशेषणकप्रत्ययविशेष्यकसत्वाद् 'येन विधिस्तदन्तस्य' (1-1-72) इति सूत्रेण तदन्तविधौ अनुनासिकान्ते प्रत्यये परे पदान्तस्य यरः अनुनासिकादेशो नित्यं स्याद् भाषायामित्येवार्थो युज्यते न तु अनुनासिकादाविति वाच्यम्। 'येन विधिस्तदन्तस्य' इति बाधक 'यस्मिन्विधि स्तदादावल्ग्रहणे' इतिपरिभाषया अनुनासिकादौ प्रत्यये इत्याद्यर्थलाभसम्भवादिति।

ननु कस्तावत् परिभाषार्थः? इति चेदुच्यते- यस्मिन्निति सप्तम्यन्तपदानां बोधकम्। विधीयते असौ विधिरिति कर्मव्युत्पत्त्या विधिशब्दः कार्यपरः। अल्ग्रहणे इत्यत्र हि अल् गृह्यते येनेति बाहुलकात् करणे ल्युट् अल्प्रतिपादकशब्दे सतीत्यर्थः। न तु अल् गृह्यतेऽस्मिन्नित्यधिकरणल्युटा अल उच्चारणे। तथा सति ''तस्मान्नुडचि'' इत्यादौ प्रत्याहारग्रहणे दोषापत्तेः ''इकोऽचि व्यञ्जने मा भूत्'' इति भाष्ये व्यञ्जनादाविति विरोधापत्तेश्चेति। तदादावित्यत्र तच्छब्देन सप्तम्यन्तार्थः परामृश्यते। तथा च परिभाषार्थ४ फलति- ''सप्तम्यन्ते विशेषणीभूते अल्प्रतिपादकशब्दे सति यद् विधानं तत्तदादौ बोध्यमिति।

इत्थञ्च ''प्रत्यये भाषायां नित्यम्' इत्यत्र अनुनासिकादौ प्रत्यये परे इत्यर्थकरणे न कापि क्षतिः। तत्प्रमाणमस्येत्यर्थे 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' (5/2/37) इति शास्त्रेण मात्रच्प्रत्यये कृते तद्+मात्र इत्यवस्थायां 'प्रत्यये भाषायां नित्यम्' इत्यनेन दकारस्यानुनासिके नकारे तन्मात्रम् इति सिध्यति। इत्थमेव केचन चिन्मात्रमिति पठन्ति अत्र प्रसङ्गे। तन्न 'प्रमाणे द्वयसच्' इति सूत्रे प्रमाणशब्दस्य परिच्छेदकपरत्वात्, चितः परिच्छेदकत्वासम्भवात्। मात्रच्प्रत्ययस्य दुर्लभत्वाच्चेति। तस्माच् चिन्मयमिति उदाहार्यम्। ननु तर्हि कथं चिन्मयम्? उच्यते- चिन्मयम् इति शब्दः त्रिधा व्याख्यातो वर्तते।

**प्रथमस्तावत्–**

चिदेव चिन्मयम् इत्यत्र ताद्रूप्येऽर्थे मयट्प्रत्ययः। 'नित्यं वृद्धशरादिभ्यः' (4-3-144) इति सूत्रे 'नित्यम्' इति योगो विभज्यते। तथा च नित्यमर्थे=ताद्रूप्यऽर्थे मयड् भवतीति अर्थो लभ्यते। उक्तञ्च बालमनोरमाकारेण 'एकाचो नित्यम्' इति वार्तिकप्रसङ्गे 'नित्यमिति योगविभागलब्धमिदम्''। न च ''मयड् वैतयोर्भाषाया-मभक्ष्याच्छादनयोः'' (4/3/143) इत्यनेन विकारावयवोः अस्त्विति वाच्यम्। 'चिन्मयं ब्रह्म' इत्यत्र अभेदरूपसामानाधिकरण्यं न स्यादपितु चिद्ब्रह्मणोर्भेदः एव स्यात्, स चार्थो न कुत्रापीप्सित इति। अतः अभेदरूपसामानाधिकरण्यमुपपत्तये योगविभागेनैवेष्टसिद्धिरिति भावः। अत्र सन्दर्भे प्रकाशकारोऽप्याह– ''नित्यं वृद्धशरादिभ्यः'' (4/3/144) इति नित्यग्रहणस्याधिकविधानार्थकत्वात्। ताद्रूप्ये मयट्। ''मयड् वैतयोः'' (4/3/143) इति विकारावयवोस्तु मयटि ब्रह्मणा सामानाधिकरण्यं न स्यात्[2]''।

सिद्धान्तकौमुद्याः रत्नाकरटीकाकारो रामकृष्णभट्टोऽपि अत्र प्रसङ्गे स्वलेखनीं व्यापारयामास– तद्यथा– ''चिन्मयमिति। 'नित्यं वृद्धशरादिभ्यः' इत्यत्र 'नित्यम्' इति योगविभागात्ताद्रूप्ये मयट्, तेन 'चिन्मयं ब्रह्म' इति सामानाधिकरण्यमुपपद्यते। 'मयड् वैतयोर्भाषायाम्' इति विकारावयवोर्मर्याटि तन्न स्यादिति भावः[3]''।

**द्वितीयस्तावत्–**

चित्तं मयते=गच्छतीति चिन्मयम्। अत्र मय गतौ इति भ्वादिगणस्थाद्धातोः ''कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्'' इति वार्तिकेन कप्रत्यये चिन्मयम् इति सिध्यति। मूलविभुजादिगणस्त्वाकृतिगणः इति विशेषः। कप्रत्यये वैकल्पिकेन अनुनासिकेन भवितव्यम् इति त्वन्यत्। चिद्मयम्। चिन्मयम्। तथा चात्र प्रकाशकारः शेषकृष्णः ''चित्तं मयते इति चिन्मयम्। मय गतौ मूलविभुजादित्वात्क इति[4]''।

**तृतीयस्तावत्-**

चिदेव चिन्मयम् इत्यर्थे ''तत्प्रकृतवचने मयट्'' (5-4-21) इति सूत्रेण अत्यन्तस्वार्थिकेऽर्थे मयटि सति चिन्मयम् इति सिध्यति। न च प्रकृतसूत्रन्तु प्राचुर्यार्थे भवति, प्राचुर्यस्य च स्वसमानाधिकरणस्वसजातीयाल्पत्वसापेक्षत्वनियमात् कथमत्यन्तस्वार्थे इति वाच्यम्। 'तत्प्रकृतवचने' इति सूत्रे तदिति पृथग्वाक्यं कृत्वा तस्य च स्वार्थिकप्रकरणे सत्वात् कुत्रचित् प्राचुर्यस्याभावेऽपि मयड् भवति। अत्यन्तस्वार्थिकमयडङ्गीकारादेव 'चिन्मयं ब्रह्म' इत्यत्र प्रयोगेऽभेदरूप-सामानाधिकरण्यं जायत इति। प्राचुर्ये मयटि तु अन्नमयो यज्ञ इत्यत्र यथा अन्नयज्ञयोः भेदरूपसमानाधिकरण्यं दृश्यते तथैव चिद्ब्रह्मणोर्भेद एव स्यादिति। अत्र शेखरकारस्त्वित्थमाह- ''चिन्मयमिति। स्वार्थिकः 'तत्प्रकृतवचने' इति मयट्। तत्र तदिति वाक्यभेदेन क्वचित्प्राचुर्यरूपप्रकृतवचनाभावेऽपि मयडर्थम्। अत एव 'चिन्मयं ब्रह्मेति सामानाधिकरण्यम्[5]'।

**अत्रायं विशेषः -**

विषमपदविवृतिकारः श्रीराघवेन्द्राचार्यः, भावबोधिनीकारः सेतुमाधवाचार्यश्च प्राचुर्यार्थेऽपि मयट्प्रत्ययं साधयतः। तथा च उभयोः ग्रन्थः। ''वस्तुतस्तु 'प्रचुरप्रकाशो रवि'रित्यादौ उक्तनियम (प्राचुर्यस्य स्वसमानाधिकरणस्वसजातीयाल्पत्वसापेक्षत्व नियमः) व्यभिचारात् प्राचुर्येऽपि मयट् सूपपादः[6]''। इति विषमपदविवृत्तौ। 'वस्तुतो वचनशब्दे भावे ल्युट्पक्षे प्रकृते अन्नमयमित्यादाविव प्राचुर्ये मयट्यपि सामानाधिकरण्यं सूपपादम्''[7]। इति भावबोधिनीकारः।

ननु एषु त्रिषु क४पक्षः श्रेयान्? इति चेच्चरमः पक्ष एव श्रेयान्। तथा हि प्रथमपक्षे शेषकृष्णरामकृष्णभट्टवासुदेवदीक्षितैः यदुक्तं 'नित्यं वृद्धशरादिभ्यः' इत्यत्र नित्यमिति योगविभागात्ताद्रूप्ये मयट् तन्न, महाभाष्ये तथाविधयोगविभागस्य

क्वाप्यनुपलम्भात् 'चिन्मयं ब्रह्म' इत्यत्र अभेदरूपसामानाधिकरण्यस्यालाभाच्चेति। नापि द्वितीयपक्षः - 'प्रत्यये भाषायां नित्यम्' इत्यस्य उदाहरणत्वेनासम्भवात्। प्रत्ययस्याविद्यमानत्वाच्चेति। अतो नागेशोक्तचरमपक्ष एव साधीयानिति दिक्। एतत्सर्वमपि मया प्रसङ्गानुरोधेन न्यरूपि। एतर्हि प्रकृतमनुसरामि महाकविना कालिदासेन रघुवंशमहाकाव्ये चतुर्थसर्गे-

**मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः।**
**लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम्।।**

इति श्लोके ''ककुद्मन्तः'' इति प्रयोगो व्यधायि। तस्य कथं साधुत्वमिति? ककुन्मन्तः इति रूपेण भवितव्यङ्खलु। यतो हि ककुदेषामस्तीत्यर्थे 'तदस्यास्त्यस्मिन्निति मतुप्' (5/2/94) इत्यनेन मतुपि ककुद्+मत् इति स्थितौ अनुनासिकादिप्रत्यया-व्यवहितस्य पूर्वत्वविशिष्टस्य पदान्तस्य यरः स्थाने नित्यमनुनासिकादेशो भवति भाषायामित्यर्थकस्य 'प्रत्यये भाषायां नित्यम्' इति वार्तिकस्य उद्देश्यतावच्छेदक-सत्वादिति। एवञ्च ककुन्मन्तः इत्येव रूपं स्यादिति। कथन्तर्हि ककुद्मन्त इति। अत्र प्रसङ्गे श्रीमता भट्टोजिदीक्षितेन समाधिद्वयं प्रादायि। प्रथमः- 'यवादिगणे दकारनिपातनाद् दकारस्य नानुनासिकादेश इत्यर्थः[७]'।

## अनुनासिकनिवृत्त्यै प्रथमपक्षः, तन्निरासश्च -

अयमाशयो दीक्षितमहाशयस्य यवादिगणे 'ककुद्मत्' इति प्रकृतिप्रत्यय-समुदितस्य पाठः कृत[८] पाणिनिना। यदि तत्रानुनासिक एव इष्टः स्यात्तर्हि ककुन्मत् इति नकारविशिष्टे पठितव्ये दकारविशिष्टं पठ्यते। तेन ज्ञायते अन्यथा प्राप्तस्य आचार्येण अन्यथाकरणरूपनिपातनान्न नकारभाव इति। अतः ककुद्मन्त इति साध्वेवेति।

ननु ककुद्+मत् इत्यवस्थायां 'झयः' इति सूत्रेण मतुपो मकारस्य स्थाने वत्वादेशः प्राप्तः, तन्मा भूदेतदर्थमेव यवादिगणे पाठः, तेन 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः'(8-2-9) इत्यत्र 'अयवादिभ्यः' इति पर्य्युदास॰ प्रवर्तते। अतो यवादिगणे पाठस्य फलं वत्वनिवृत्तिर्न त्वनुनासिकनिवृत्तिरिति। अतः अनुनासिक-निवृत्तिर्दुरुद्धरा। इति चेदुच्यते- यदि ककुद्दकारस्य नकार इष्टः स्यात्तर्हि गणे भगवान् पाणिनिः ककुन् इत्येव पठेन् न तु ककुदिति। ककुन् इति पाठेऽपि 'अयवादिभ्यः' इति पर्युदास प्रवर्तत एव। अतो दकारविशिष्टोच्चारणमनुनासिक-निवृत्यर्थमेवेति। न च यवादिगणे यरोऽनुनासिकप्रवृत्त्या 'ककुन्' इति नकारविशिष्टपाठे झयन्तत्वाभावेन 'झयः' इत्यनेन मतुप्प्रत्ययमकारस्य वत्वस्याप्रसक्त्या तत्र पाठ एव निरर्थकः स्यादिति वाच्यम्। 'झयः' (8/2/10) इति पूर्वत्रिपादीदृष्ट्या 'यरोऽनुनासिके' (8/4/45) इति परत्रिपादीसूत्रस्थवार्तिकविहितानुनासिकासिद्धत्वेन झयन्तत्वस्यानपायाद् गणे तत्पाठस्य सार्थक्यमस्त्येवेति। अतो दकारनिपातनं यरोऽनुनासिकाभावार्थमिति। न च गणे नकारविशिष्टोच्चारणे अन्यत्रापि ककुन् इत्येव प्रयोगः स्यान्न तु ककुदिति वाच्यम्। मतुपः प्रकृतिभूतककुच्छब्दस्य नान्तत्वनिपातनेऽपि अन्यत्र दकारान्तप्रयोगो निर्बाधतया भवत्येव। अन्यथा तत्कुलम् इत्यादीनामसिद्ध्यापत्तिरिति। यतो हि सर्वादिगणे 'तद्' इत्याकारकदकारविशिष्ट एव पाठो न तु तकारविशिष्ट इति। अत्र प्रसङ्गे लघुशब्देन्दुशेखरस्य ज्योत्स्नाटीकाकारः उदयङ्करपाठकस्यापि मतमवश्यञ्ज्ञेयमस्ति- ''वैकल्पिकेषु भावानुष्ठानं धर्मा-धिक्यफलकमित्येतदनभ्युपगम्येदम्। तदभ्युगमे तु यवादिपाठप्रयोज्ये मतुपो वत्वाभावे तत्प्रयुक्तकार्यं ककुच्छब्दे दकारस्य यत्प्राप्तं त'द्वावसाने' इत्येतत्प्रवृत्या तान्तनिर्देशे कर्तव्ये ककुदिति दान्तप्रकृतिमात्रनिर्देशेनापि वारयितुं शक्यत इति बोध्यम्[10]''।

वस्तुतस्तु उदयङ्करपाठकस्य प्रकृतप्रसङ्गे प्रदत्तसमाधानन्न साधीयः। यतो हि वैकल्पिकेषु भावानुष्ठानं धर्माधिक्यफलजनकम्भवतीत्यभ्युपगमे तु सर्वादिगणे

पठितानां त्यदादीनां शब्दानामपि अनुनासिकत्वं न स्यात्। तन्मात्रमित्यादिर्न सिध्येत। तत्कुलमित्यत्र चर्त्वञ्च न स्यादिति। उक्तञ्च सदाशिवभट्टेन सदाशिवभट्टीये ''प्रकृतिपाठेपि चर्त्वाकरणान्निपातनमिति' तु न युक्तम्। त्यदादिष्वपि तथात्वापत्तौ तत्कुलमित्यादौ चर्त्वानापत्तेः। तस्मान् नाग्रहो भावानुष्ठाने गणपाठे चेति[11]''।

ननु यवादिगणे ककुदित्येव पठ्यते न तु ककुद्मन्त इति प्रकृतिप्रत्ययसमुदायः, तथा च तत्र गणे- यव, दल्मि, उर्मि, भूमि इत्येवं प्रातिपदिकमात्रं पठितम्। एवञ्च ककुदिति प्रातिपदिकस्यैव पाठो न तु विशिष्टस्य, तेन केवले ककुदिति प्रातिपदिके दकारनिपातनस्यावसर एव नास्ति। तथा च यरोऽनुनासिको दुर्वारः। न च दान्तरूपनिपातनादेव निर्वाह इति प्रलपनीयम्। सर्वादिगणे तदिति दान्तनिपातनेन 'तन्मात्रम्' इत्यादावपि दकारश्रवणापत्तेः। इत्थं 'गणे दकारनिपातनात्' इत्याकरक-समाधाने अरुचिं वीक्ष्य स्वरचितप्रौढमनोरमाग्रन्थे भट्टोजिदीक्षितेन समाधानान्तर-मभ्यधायि।

**अनुनासिकनिवृत्त्यै द्वितीयपक्षः, तन्निरासश्च –**

तद्यथा- ''यचि भन्तसौ मत्वर्थे इति संहितया पाठे तसाविति तात्पूर्वं दकारं प्रश्लिष्य भत्वेनाप्येतत्समाधातुं शक्यम्[12]''।

**अयमभिप्रायः –**

'तसौ मत्वर्थे' (1-4-19) इत्यत्र तकारात् पूर्वं दकार प्रश्लिष्यते, (द्+तसौ) दकारस्य 'खरि च' (8-4-55) इति सूत्रेण चर्त्वे तकारे, (त्+तसौ) 'झरो झरि सवर्णे' (8-4-65) इत्यनेन वैकल्पिकत्वेन लोपे तसौ इत्येव भवति। तथा च सूत्रार्थो भवति 'दान्तः तान्तः, सान्तश्च भसंज्ञका भवन्ति मत्वर्थे प्रत्यये परे''। न च तात्पूर्वं यदि दकारप्रश्लेषः स्यात्तदा 'तसौ' इति द्विवचनान्तत्वन्न स्यादपितु बहुबचनान्तत्वमेव। अतो ज्ञायतेऽत्र दकारप्रश्लेषो नास्तीति वाच्यम्। तसावितिद्विवचन-

निर्देशस्तु दश्च तश्चेति दतम्। समाहारद्वन्द्वसमासं विधायं दतञ्च सश्चेति तसावितीतरेतरयोगद्वन्द्वसमासे कृते समुपपद्यत इति। एवञ्च ककुद्+मत् इत्यत्र दान्तत्वाद् भसंज्ञायान्नानुनासिकादेशः तस्य पदसंज्ञायामेव विधानादिति। एवं रूपेण कालिदासीयप्रयोगः ककुद्मन्तः इति सङ्गतो भवतीति। न च भसंज्ञापक्षे मृन्मान् इत्यादौ अतिप्रसङ्ग इति वाच्यम्। यवादिगणे मृच्छब्दस्य पाठाभावात् मृद्+मत् इत्यत्र 'झयः' (8-2-10) इत्यनेन वत्वे मृद्वान् इत्येव रूपं भवति, न तु मृन्मानिति। उक्तञ्च शब्दरत्नकारेण "इति केचित्तन्न, मृन्मानित्यादावतिप्रसङ्गात् इति तु क्वाचित्कोऽसाम्प्रदायिकः पाठः[13]"।

बृहच्छब्दरत्ने तु मृद्वान् इति यवादिगणे पठित्वैव ककुद्मन्त इतिवन्नानुनासिक-त्वमित्युक्तम्। तथा हि "केचित्तु 'ककुद्मन्त' इत्यत्रेव मृदित्यत्रापि यवादिगणे प्रकृतिप्रत्ययोभयपाठाद्विकाराऽभाव इत्याहुः[14]"।

वस्तुतस्तु 'यचि भन्तसौ मत्वर्थे' इति संहितापाठकरणकल्पना, तत्रापि दकारप्रश्लेषकल्पना च न तावज्ज्यायसी। यतो दकारप्रश्लेषस्य भाष्येऽनुक्तत्वादिति। एवञ्च भाष्यकारानुक्तकल्पनाया वैयाकरणनिकाये अप्रामाणिकत्वम्। एवम्प्रकारेण पुनरपि अनुनासिकत्ववारणं दुर्वारमिति।

**अनुनासिकनिवृत्त्यै तृतीयपक्षः, तन्निरासश्च -**

शेखरस्य ज्योत्स्नाटीकाकारेण 'अन्ये तु' इति पदेन कस्यचिन्मतमुपस्थाप्य 'ककुद्मन्तः' इत्यत्र अनुनासिकत्ववारणाय समाध्यन्तरमुक्तम्। तथा हि "अन्ये तु व्यवस्थितविभाषात्वाङ्गीकारादुक्तदोषद्वयं परिहरन्तश्चिन्मयमित्याद्यर्थं 'प्रत्यये भाषायां नित्यमित्यस्यापि वचनस्याकर्तव्यतां ब्रुवते[15]"।

एष आशयः- 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रे 'वा' पदे व्यवस्थितविभाषाऽस्तु। क्वचिद्भवतीत्यंश एव प्रवर्तते, क्वचित्तु न भवतीत्यंश

एव, क्वचिदुभयमित्येवं लक्ष्यानुसारेण व्यवस्थया प्रवृत्ता विभाषा व्यवस्थितविभाषा उच्यते। सभापतिवर्यास्त्वेवं परिष्कुर्वन्ति 'विभाषाशात्रीयोद्देश्यतावच्छेदकं यद्रूपं तद्व्याप्यं यद्रूपं तदवच्छेदेन भावाभावान्यतरविधायकत्वे सति भावाभावोभय-बोधकत्वं व्यवस्थितविभाषात्वम्[16]'। तेन 'चतुर्मुख' इत्यत्र रेफस्य नानुनासिकत्वम्। तन्मात्रम्। चिन्मयम्। इत्यत्रापि व्यवस्थितविभाषाश्रयणान् नित्यमेवानुनासिकत्वम्। किञ्च ककुद्मन्त इत्यत्रापि तथैव समाधानान्नानुनासिकत्वमिति। किञ्च 'प्रत्यये भाषायां नित्यम्' इति वार्तिकमपि न कर्तव्यम्भवतीति महल्लाघवम्।

**खण्डनम्**– ज्योत्स्नाकारस्य व्यवस्थितविभाषाऽश्रयणान् नानुनासिकत्वमिदमपि न सन्तोषाय। भाष्योक्तव्यवस्थितविभाषातिरिक्तविभाषाणां व्यवस्थितविभाषात्वस्या-प्रामाणिकत्वात्। अत्र मानम् 'इन्द्रे च' (6-1-124) इति सूत्रम्। तथा हि 'गवेन्द्रः' इत्यत्रापि व्यवस्थितविभाषाश्रयत्वे इन्द्रे परे नित्यमवङि सिद्धे 'इन्द्रे च' इति व्यर्थं सञ्ज्ञापयति–

**देवत्रातो गलो ग्राह इति योगे च सद्विधिः।**
**मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः।।**[17]

इति भाष्योक्तकारिकाया अन्यत्र व्यवस्थितविभाषा नास्तीति। उक्तञ्च शेखरकारेण 'न च व्यवस्थितविभाषयेन्द्रे सिद्धे 'इन्द्रे चे'ति व्यर्थमिति वाच्यम्, भाष्योक्तातिरिक्त-व्यवस्थितविभाषाणामप्रामाणिकत्वज्ञापनार्थं तत्सत्वादित्याहुः[18]'। इत्थञ्चानुनासिकत्वा-निवृतिर्तादवस्था।

### अनुनासिकनिवृत्त्यै चतुर्थपक्षः, तन्निरासश्च -

केचन तु ककुद्मन्त इत्यत्रानुनासिकवारणायैवं ब्रुवते मतुप्प्रत्ययस्य समभिव्याहारे ककुद्घटकदकारेऽनुनासिकत्वस्यावश्यम्भावाद् यवादिगणे 'ककुन्' इत्येव पठितव्ये, दकारघटितककुदित्यस्य एव पाठेनानुनासिकत्वस्य अभावो निपात्यत इति। तदपि

न सर्वत्रगणे पठितानां शब्दानां विषये अभेदानुकरणपक्ष एव। अत एव वृत्या अर्थोपास्थापकत्वाभावात् प्रातिपदिकसंज्ञाभावेन सुबनुत्पत्तौ गणपठितेषु शब्देषु न पदत्वप्रयुक्तं कार्यमिति। अतः ककुन् इत्येव पठितव्ये- इत्यादिकथनं काकदन्त-परीक्षणवदनर्थकम्तत्र पदत्वाभावादिति।

**निष्कर्षः -**

कालिदासीयप्रयोगककुद्मन्तः इत्यत्रानुनासिकवारणाय बहुभिः बहुविधयत्नाः अक्रियन्त, तथापि तत्रानुनासिकवारणन्न जातम्। तस्माद् अनुनासिकघटितपाठः 'ककुन्मन्तः' इत्येव ज्यायान्। ककुन्मन्तः इति पाठेऽपि न कापि हानिर्न च छन्दोभङ्गः। तर्हि कथं दकारघटितपाठा एव सर्वत्र पुस्तकेषु दृश्यन्ते? इति चेत् 'अपाणिनीयम्' इत्येव वक्तव्यम्। न च स्थितस्य गतिश्चिन्तनीयेति वाच्यम्। गतिस्तु चिन्तितैव सुष्ठु समाधिर्न लब्धः इति।

अत एव मल्लिनाथेन तत्र सञ्जीवनीटीकायां श्लोकव्याख्यासन्दर्भे 'ककुद्मन्तः' इत्यत्र झयन्तत्वेन 'झयः' सूत्रेण प्राप्तस्य वत्वस्य वारणं यवादित्वात् इत्येवाभ्यध ायि, न तु निपातनादनुनासिकस्य वारणमिति। तथा च सञ्जीवनीटीकायाम्–

''ककुदेषामस्तीति ककुद्मन्तः। महाककुदः इत्यर्थः। यवादित्वान्मकारस्य वत्वाभावः[19]''। अतः सिद्धं यदनुनासिकविशिष्टप्रयोग एव भवतीति। अयमेवाशयः लघुशब्देन्दुशेखरस्य सुबोधिनीटीकाकारस्य विश्वनाथमिश्रवर्य्यस्यापि तथा चोक्तम्। 'वस्तुतस्तु मल्लिनाथेनात्र यवादित्वात् 'झयः' सूत्रेण प्राप्तस्य वत्वस्याभावः कृतो न तु अनुनासिकाभावः। अतः स्पष्टं यदनुनासिकन्तु भवत्येवेति[20]''। सिद्धान्तकौमुद्याः लक्ष्मीटीकाकारोऽप्याहः ''तस्माद् रघुवंशे 'ककुन्मन्तः' इत्येव पाठ उचितः, तावताऽपि क्षति विरहात्। दकारघटितपाठस्तु लेखकप्रमादात्। अत एव मल्लिनाथेनापि तत्र यवादित्वात् वत्वाभाव इत्येवोक्तं न तु निपातनान् नत्वाभाव इत्यपीत्युपाध्यायाः[21]''।

इत्थञ्च ककुन्मन्त इत्येव साधीयान्। ककुद्मन्त इति तु अपाणिनीयमेव। एतेन कुमारसम्भवे प्रथमसर्गे-

**तुषारसंघातशिलाः खुराग्रैः समुल्लिखन्दर्पकलः ककुद्मान्।**
**दृष्टः कथञ्चिद्गवयैर्विविग्नैरसोढसिंहध्वनिरुन्ननाद।।**[22]

इति श्लोकगतककुद्मानित्यपि व्याख्यातमिति दिक्।

## सन्दर्भग्रन्थसूची


1. वैयाकरणसिद्धान्तकौमुदी, गिरिधरशर्मणा परमेश्वरानन्दशर्मणा च सम्पादिता, प्रकाशकः- मोतीलाल बनारसीदासः, वाराणसी, 2001-संस्करणम्। पृ.सं.126
2. प्रक्रियाकौमुदी (प्रकाशव्याख्यासहिता)। मुरलीधरमिश्रसम्पादिता, प्रकाशकः-सं.सं.वि., वाराणसी; 2056-द्वितीयसंस्करणम्। पृ. सं.-143
3. वैयाकरणसिद्धान्तकौमुदी (रत्नाकरटीकासहिता), डॉ.आजादमिश्रसम्पादिता, प्रकाशकः- केन्द्रियसंस्कृतविद्यापीठम्, लखनऊ, 1955 संस्करणम्, पृ.सं.-138
4. प्रक्रियाकौमुदी (प्रकाशव्याख्यासहिता)। मुरलीधरमिश्रसम्पादिता, प्रकाशकः-सं.सं.वि., वाराणसी; 2056 द्वितीयसंस्करणम्। पृ.सं.-143
5. लघुशब्देन्दुशेखरः, (षट्टीकोपेतः), डॉ. बालशास्त्रिसम्पादितः, प्रकाशकः-वाणीविलासप्रकाशनम्, वाराणसी, सं.-2048 संस्करणम्, पृ.सं. 355
6. तत्रैव
7. लघुशब्देन्दुशेखरः, (भावबोधिनीबालबोधिनीव्याख्याद्वयोपेतः), आचार्यः श्रीपादसत्यनारायणमूर्ति-सम्पादितः, प्रकाशकः-राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 2005 संस्करणम्, पृ.सं.-307
8. रघुवंशम्, (नारायणरामाचार्यकाव्यतीर्थसंशोधितम्) प्रकाशकः-राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, 2011, संस्करणम्, पृ.सं.- 88
9. वैयाकरणसिद्धान्तकौमुदी, गिरिधरशर्मणा परमेश्वरानन्दशर्मणा च सम्पादिता, प्रकाशकः-मोतीलाल बनारसीदासः, वाराणसी, 2001-संस्करणम्। पृ.सं. 126
10. लघुशब्देन्दुशेखरः, (षट्टीकोपेतः), डॉ. बालशास्त्रिसम्पादितः, प्रकाशकः-वाणीविलासप्रकाशनम्, वाराणसी, सं.-2048 संस्करणम्, पृ.सं. 357
11. तत्रैव

12. प्रौढमनोरमा (शब्दरत्न-रत्नप्रकाशिका-भावप्रकाश-सरलासहिता), प्रकाशकः- चौखम्बा-संस्कृतसंस्थानम्, वाराणसी, सं.-2059, संस्करणम्, पृ.सं. 261
13. तत्रैव
14. प्रौढमनोरमा (बृहच्छब्दरत्नलघुशब्दरत्नसहिता) श्रीसीतारामशास्त्रिसम्पादिता, प्रकाशकः-काशीहिन्दूविश्वविद्यालयः, वाराणसी, सं. 2021 संस्करणम्, पृ.सं. 203
15. लघुशब्देन्दुशेखरः, (षट्टीकोपेतः), डॉ. बालशास्त्रिसम्पादितः, प्रकाशकः-वाणीविलासप्रकाशनम्, वाराणसी, सं.-2048 संस्करणम्, पृ.सं. 356
16. वैयाकरणसिद्धान्तकौमुदी (लक्ष्मीटीकासहिता) बालकृष्णपञ्चोलिसम्पादिता, प्रकाशकः-मोतीलालबनारसीदासः, वाराणसी, 1966 संस्करणम्, पृ.सं. 154
17. महाभाष्यम् (प्रदीपोदयोतसहितम्), भार्गवशास्त्रिजोशीसम्पादितम्, प्रकाशकः- चौखम्बासंस्कृत-प्रतिष्ठानम्, दिल्ली, 1994 संस्करणम्, पृ.सं. 248, (षष्ठे भागे)
18. लघुशब्देन्दुशेखरः, (षट्टीकोपेतः), डॉ. बालशास्त्रिसम्पादितः, प्रकाशकः-वाणीविलासप्रकाशनम्, वाराणसी, सं.-2048 संस्करणम्, पृ. सं. 316
19. रघुवंशम्, (नारायणरामाचार्यकाव्यतीर्थसंशोधितम्) प्रकाशकः-राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, 2011, पृ.सं. 88
20. लघुशब्देन्दुशेखरः (सुबोधिनीहिन्दीव्याख्योपेतः) आचार्यविश्वनाथसम्पादितः प्रकाशकः-चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, 2008 संस्करणमृ, पृ.सं. 430
21. वैयाकरणसिद्धान्तकौमुदी (लक्ष्मीटीकासहिता) बालकृष्णपञ्चोलिसम्पादिता, प्रकाशकः-मोतीलालबनारसीदासः, वाराणसी, 1966 संस्करणम्, पृ.सं. 187
22. कुमारसम्भवमहाकाव्यम् (सञ्जीविनी-शिशुहितैषिणीटीका सहिता), प्रकाशकः- राष्ट्रियसंस्कृत-संस्थानम्, नई दिल्ली, 2005 संस्करणम्, पृ.सं.-28

ISSN: 2231-0452

# अमूर्तस्यापि आरुण्यस्य क्रयसाधनत्वम्

*डा.श्रीरामः ए.एस्.*
*(अतिथि-अध्यापकः, मीमांसाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

भगवता जैमिनिना प्रणीतायां द्वादशलक्षण्यां तृतीयाध्याये प्रथमपादे षष्ठम् अधिकरणम्, अरुणाधिकरणम्।

**सूत्रम् -** "अर्थैकत्वे द्रव्यगुणयोः ऐककर्म्यात् नियमः स्यात्" इति।

**सूत्रार्थः -** द्रव्यगुणयोः - एकहायनीरूपस्य द्रव्यस्य, आरुण्यरूपस्य गुणस्य च, अर्थैकत्वे- एकक्रियान्वयित्वे सम्भवति सति, ऐककर्म्यात् - एकक्रयसाधनत्वस्य सम्भवात्, नियमः - परिच्छेदकपरिच्छेद्यभावेन अन्वयनियमः स्यात्।

**विषयः -** ज्योतिष्टोमप्रकरणे श्रुतं वाक्यम्, "अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति" इति।

अरुणपदस्य अर्थः कः इति प्रश्ने मीमांसकानाम् इदं समाधानम्, अरुणरूपः गुणः इति। अथवा अरुणत्वजातिः अर्थः। न तु अरुणत्वजातिविशिष्टव्यक्तौ अरुणपदस्य शक्तिः। तथा सति आकृत्यधिकरणन्यायविरोधः स्यात्।

**तदुपरि प्रश्नः**, अरुणया इत्यत्र तृतीयाविभक्तिः श्रूयते। तृतीयाविभक्तेः करणत्वम् अर्थः। तच्च करणत्वं द्रव्यस्यैव सम्भवति। यदि अरुणपदार्थः गुणः, तर्हि गुणस्य करणत्वम् अनुपपन्नम्। अतः तृतीयानुरोधात् द्रव्ये लक्षणा स्वीकर्तव्या इति।

तन्न, द्रव्ये लक्षणां विनापि शक्यार्थस्यैव अरुणगुणस्य करणत्वं सम्भवति।

**तदुपरि प्रश्नः**, अरुणया इत्यत्र टाप् इति प्रत्ययः श्रुतः। तस्य प्रत्ययस्य स्त्रीत्वम् अर्थः। परं स्त्रीत्वं द्रव्यस्य सम्भवति। न तु शक्यार्थस्य अरुणगुणस्य। अतः प्रत्ययार्थस्त्रीत्व-अनुरोधेनापि अरुणया इति पदे द्रव्यरूपार्थे लक्षणा स्वीकार्या इति।

तन्न, प्रकृत्यर्थस्य आरुणस्य, प्रत्ययार्थस्य स्त्रीत्वस्य च सामानाधिकरण्यसम्बन्धेनैव अन्वयः सम्भवति। अतः न प्रत्ययार्थस्त्रीत्वानुरोधेनापि द्रव्ये लक्षणा।

यदि द्रव्ये लक्षणा स्वीक्रियते, तदा व्युत्पत्यन्तरमपि कल्पनीयमिति गौरवमापद्येत। इतरथा - प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोस्तु प्रत्ययः प्राधान्येन इति प्रत्ययार्थ-प्राधान्यस्मृत्या प्रत्ययार्थस्य कारकस्यैव विशेष्यत्वरूपं प्राधान्यं वक्तव्यम्। प्रत्ययार्थे कारके प्रकृत्यर्थस्य आरुण्यस्य, प्रत्ययार्थयोः लिङ्गसंख्ययोः अन्वयः च कार्यः। तेन एककार्यकारणभावो भवति इति लाघवम्। अतः कार्यकारणभावद्वयादपि न द्रव्ये लक्षणा।

यदि द्रव्ये लक्षणा तदा प्रत्ययार्थलिङ्गसंख्ययोः अन्वयः सत्वप्रधानानि नामानि इति स्मृत्या प्रकृत्यर्थे अरुणगुणे अन्वयः कार्यः, तदर्थं प्रत्ययार्थलिङ्गसख्ययोः प्रकारतानिरूपित-विशेष्यतासम्बन्धेन प्रकृतिजन्योपस्थितिः कारणम् इति एककार्यकारणभावः, प्रकृत्यर्थस्य अरुणरूपस्य प्रत्ययार्थे करणत्वे अन्ययार्थम्, प्रत्ययार्थलिङ्गसंख्याविशिष्टप्रकृत्यर्थ-अरुणरूपप्रकारतानिरूपितविशेष्यतासम्बन्धेन प्रत्ययार्थोपस्थितिः कारणम् इति अपरः कार्यकारणभावः कल्पनीयः इति गौरवम् आपद्यते।

**तदुपरि प्रश्नः**, यदि द्रव्ये लक्षणा न स्वीक्रियते तर्हि गुणवचनानाम् आश्रयतो लिङ्गवचनानि भवन्ति इति स्मृतिविरोधः सम्भवति इति। यथा - गुणिवाचकगुणवाचक-शब्दस्य आश्रयतः विशेष्यानुसारं लिङ्गवचने भवतः इति तदर्थः। प्रकृते अरुणादीनां गुणवाचकानां गुणिवाचकत्वमपि वक्तव्यम्। तेन द्रव्ये लक्षणा स्वीकार्या इति। तन्न, गुणवाचकानां शब्दानां लिङ्गवचनानि विशेष्यस्य समभिव्याहारे, विशेष्यानुसारं भवन्ति इत्येव स्मृत्यर्थस्य अङ्गीकारात्। एवं च अरुणपदार्थः अरुणगुणः एव।

“एकहायनी” इति पदस्य अर्थः कः विचारे, अवयवार्थविशिष्टः अन्यपदार्थः अर्थात् गोरूपद्रव्यमिति प्राचीनाः मीमांसकाः।

अन्यपदार्थे पदद्वये अपि लक्षणा स्वीक्रियते इति केचन।

**तदुपरि प्रश्नः**, अप्राप्ते शास्त्रम् अर्थवत् इति न्यायेन अज्ञातार्थज्ञापकः विधिः। परम् एकहायनीपदार्थस्य विधेयत्वे, पुनः पिङ्गाक्षीपदार्थस्य विधिविधेयत्वं कथमिति। विहितविधानेन वैयर्थ्यम् इति च। तन्न, यतः क्रमेण एकहायनीपिङ्गाक्षीति पदार्थद्वयस्य प्रवृत्तौ एव अयं प्रश्नः। परं पदार्थद्वयस्यापि युगपत् प्रवृत्तौ विहितविधानमिति न प्रश्नावसरः।

यदुक्तं विहितविधानेन वैयर्थ्यमिति, तदपि न, एकहायनीपदस्य यादृशगुणसमर्पकत्वम्, तदपेक्षया पृथक् गुणसमर्पकत्वं पिङ्गाक्षी इति पदस्य वर्तत इति गुणान्तरसमर्पणद्वारा पदद्वयस्यापि सार्थक्यं सम्भवति।

अथवा अरुणया इत्यत्र यथा लक्षणां विनैव वाक्यार्थः कृतः, तथैव एकहायनी इत्यादावपि अन्यपदार्थे लक्षणां विनैव वाक्यार्थः कर्तुं शक्यः। यथा आरुण्यस्य क्रयसाधनीभूत-गोरूपद्रव्यपरिच्छेदद्वारा क्रयाङ्गत्वम्, तथैव एकहायनस्यापि क्रयसाधनीभूत-गोरूपद्रव्यपरिच्छेदद्वारा क्रयाङ्गत्वं सम्भवति।

**तदुपरि प्रश्नः**, एकहायन्यादिपदानामपि गुणसमर्पकत्वे, द्रव्यसमर्पकपदाभावात् अरुणगुणस्य पार्ष्टिकः द्रव्यसम्बन्धः कथमिति। तत्र इदं समाधानम्, प्रमाणान्तरेण क्रयद्रव्यं ज्ञात्वा, तस्य द्रव्यस्य परिच्छेदद्वारा आरुण्यस्य क्रयाङ्गत्वं वक्तव्यम्।

**विशयः -** उद्देशतावच्छेदकं प्रकृतापूर्वसाधनीभूतद्रव्यत्वम् उत प्रकृतापूर्वसाधनीभूत-क्रयसाधनत्वमेव वा इति। अर्थात् आरुण्यं क्रयसाधनीभूतगोरूपद्रव्योद्देशेन विधीयत उत प्राकरणिकं यत्किञ्चिद्द्रव्यम् उद्दिश्य विधीयत इति।

**पूर्वपक्षः -** आरुण्यं गुणः, एकहायनी द्रव्यम्। अतः एकहायनीरूपद्रव्ये आरुण्यगुणस्य अन्वययोग्यता वर्तते। अयं च अन्वयः वाक्यीयोऽपि स्यात्। परं कारकाणां क्रियान्वय-नियमात्, अरुणकारकस्य एकहायनीकारकान्तरेण अन्वयः अव्युत्पन्नः।

अरुणकारकस्य अन्वयः क्रयभावनायां व्युत्पन्नश्चेदपि आरुण्यस्य अमूर्तत्वात् योग्यताभावात् अयमन्वयः वाक्यीयश्चेदपि न अङ्गीक्रियते। अतः अस्मात् वाक्यात् आरुण्यम् आच्छिद्य प्राकरणिके द्रव्ये निवेशः कार्यः। तथा च प्रकरणाश्रितकल्पित-वाक्यानुसारम् अरुणया प्रकृतापूर्वसाधनीभूतद्रव्यपरिच्छेदं भावयेदिति, प्राकरणिकानि सर्वाणि विहितद्रव्याणि अरुणीकर्तव्यानि इति।

**राद्धान्तः -** तन्न, शाब्दबोधं प्रति योग्यताज्ञानस्य कारणत्वं मीमांसकैः नाङ्गीक्रियते। अपि तु अयोग्यता निश्चयस्य प्रतिबन्धकत्वम् इति अङ्गीक्रियते। आरुण्यस्य क्रयसाधनत्वाभावः यावत् न निश्चीयते, तावत् अरुणया क्रयं भावयेत् इति शाब्दबोधः भवत्येव। क्रयस्य द्रव्यविनिमयरूपत्वात्, अमूर्तस्य आरुण्यस्य क्रयसाधनत्वं कथमति योग्यतायाः गवेषणे पार्ष्टिको द्रव्यपरिच्छेदद्वारा आरुण्यस्य गोरूपद्रव्ये अन्वयः इति

अवगम्यते। अतो न वाक्यात् विच्छिद्य प्राकरणिकसर्वाणि द्रव्याणि अरुणीकर्तव्यानि।

आरुण्यादीनाम् अन्वयः कथम् इति चेत्, प्राथमिकबोधे कारकाणां भावनान्वयनियमात् सर्वेषां कारकाणां साक्षादेव भावनायाम् अन्वयः। यथा -

१. आरुण्यकरणिका एकहायनीकरणिका पिङ्गाक्षिकरणिका सोमकर्मिका धात्वर्थक्रयविशिष्टार्थभावनाविशिष्टा शाब्दभावना इति।

तत्समनन्तरं धात्वर्थस्य क्रयस्य सोमेन साकं सम्बन्धावगत्यर्थं पार्ष्टिको बोधः कल्पनीयः। यथा -

२. आरुण्यविशिष्टैकहायनीविशिष्टपिङ्गाक्षीविशिष्टक्रयेण सोमं भावयेत् इति।

आरुण्यादित्रिकस्य धात्वर्थक्रयेण साकं सम्बन्धावगतये तृतीयो बोधः कल्पनीयः। यथा -

३.१ आरुण्येन क्रयं भावयेत्।

३.२ एकहायन्या क्रयं भावयेत्।

३.३ पिङ्गाक्ष्या क्रयं भावयेत् इति।

तृतीयबोधे आरुण्यस्य क्रयसम्बन्धज्ञानानन्तरं कथम् आरुण्यस्य क्रयसम्बन्धः, आरुण्यस्य अमूर्तत्वात् इति प्रश्ने, इदं समाधानम्, द्रव्यपरिच्छेदद्वारा क्रयाङ्गत्वं सम्भवति इति।

तथा च परिच्छेदकीभूतद्रव्याद्यपेक्षायां चतुर्थः बोधः कल्पनीयः। यथा -

४. या अरुणा सा एकहायनी, या एकहायनी सा पिङ्गाक्षी, तया पिङ्गाक्ष्या सोमक्रयं भावयेत् इति।

इत्थं क्रयसाधनीभूते एकहायनीरूपद्रव्ये एव निवेशः सम्भवतीति, ततः आरुण्यं विच्छिद्य न क्रयसाधनान्तरेषु वास आदिषु आरुण्यस्य निवेशावसरः।

**तदुपरि आशङ्का,** व्रीहिभिः यजेत, यवैर्वा इत्यनेन वैकल्पिकद्रव्यस्य यागसाधनत्वं विहितम्। यागसाधनीभूतव्रीह्युद्देशेन व्रीहीन् अवहन्ति इति अवहननं विहितम्। यवप्रयोगे व्रीह्युद्देशेन विहितस्य अवहननस्य प्राप्तिः यथा भवति, तथैव यथा गोः सोमप्राप्ति-

क्रयसाधनत्वम्, तथैव वास आदीनामपि सोमप्राप्तिक्रयसाधनत्वम्। अत: सोमप्राप्ति-क्रयसाधनत्वाविशेषात् वास आदिष्वपि आरुण्यं निवेशनीयमिति, तन्न, वास आदीनां क्रयान्तरसाधनत्वम् इत्येव अङ्गीक्रियते। तर्हि क्रयभेदे प्रमाणं किम् इति चेत्, न शब्दान्तरम्, अपर्यायधातुभेदाभावात्, न अभ्यास: अनन्यपरविधिपुन:श्रवणाभावात्, न तावत् संख्या, संख्याया: अश्रवणात्, न संज्ञा, नानानाम्न: अश्रवणात्, न प्रकरणान्तरम्, अनुपादेयगुण-सहकृतप्रकृतकर्मण: अनुपस्थित्यभावात्, तर्हि गुणात् क्रय: भिन्न: इत्येव वक्तव्यम्। **तदुपरि प्रश्न**:, पूर्वस्मिन् कर्मणि अनिविशमान: उत्पत्तिवाक्ये श्रुत: गुण: कर्मभेदम् आपादयति इति वक्तव्यम्। यथा तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम् इत्यत्र। वैश्वदेवकर्मणि उत्पत्तिवाक्ये श्रुताया: आमिक्षाया: अवरोधात् वाजिननिवेशासम्भवात्, श्रुतात् वाजिनात् वाजियाग: भिन्न: इति कर्मभेद:। प्रकृते गोवास आदिभि: सर्वै: सोमक्रय: सम्भवतीति गवा वास आदीनां प्रतिबन्ध: न क्रियत इति न गुणात् कर्मभेद:। यदा गोमात्रेण विक्रेतु: आनति: न सम्भवति, तदा वास आदीनामपि क्रयसाधनत्वं सम्भवति इति, तन्न, गोरूपैकद्रव्यमात्रेण य: विक्रेता आनत: भवति, तादृश: विक्रेता सम्पादनीय:।

इतरथा दक्षिणाया: प्रसङ्गबाधौ न स्याताम्। यथा - सोमस्य या दक्षिणा, सा एव सोमाङ्गाग्नीषोमीयादीनामपि भवति। ऋत्विजा अग्नीषोमाद्यर्थं पृथक् दक्षिणा प्रार्थ्यते चेत् स: न वरयितव्य:। एवं धेनु: दक्षिणा, एकां गां दक्षिणां दद्यात् इत्यादिना प्राकृतद्वादशशत-दक्षिणाया: बाध: श्रुत:। यदि ऋत्विजा दक्षिणाद्वयमपि इष्यते, तदा स: न क्रेतव्य:। एवं दक्षिणाया: प्रसङ्ग: बाधश्च न भवेत्।

**तदुपरि संशीति**:, दशभि: क्रीणाति इति वचनात् सर्वेषां क्रयसाधनीभूतद्रव्याणां निवेशस्य श्रुतत्वात् क्रयद्रव्येषु बाध्यबाधकाभावात् न गुणन्याय: इति। तन्न, दशभि: क्रीणाति इति वाक्यं दशानाम् अपि क्रयसाधनानां द्रव्याणाम् अनुवादं कृत्वा समुदायं सम्पादयति। एवं समुच्चयसिद्धिरेव अस्य दशभि: क्रीणाति इति वाक्यस्य सार्थक्यम्। न तु अस्य वाक्यस्य गुणाधिकरणसिद्धकर्मभेदापवादकत्वम्।

**तदुपरि प्रश्न**:, गुणात् क्रयभेद: सम्भवति चेदपि क्रयेण साध्यम् एकमेव, सोमप्राप्ति: इति। तेन प्रकृतापूर्वसाधनीभूतक्रयसाधनत्वं वास आदीनामपि सम्भवात् वास आदिष्वपि आरुण्यस्य निवेशसम्भव: इति।

तन्न, प्रकृतापूर्वसाधनीभूतक्रयसाधनत्वमात्रं न उद्देशतावच्छेदकम्। अपि तु विजातीयक्रयत्वमेव उद्देशतावच्छेदकम् इति स्वीक्रियते। अत: न सर्वक्रयसाधनीभूतद्रव्येषु निवेशावसर:।

एवं च आरुण्यं गोरूपद्रव्यपरिच्छेदद्वारा सोमक्रयाङ्गम् इति शम्।

## सन्दर्भा:

१. "अर्थैकत्वे द्रव्यगुणयो: ऐककर्म्यात् नियम: स्यात्" - जैमिनिसूत्रम्, ३-१-१२
२. "अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति" - तैत्तिरीयसंहिता, ६-१-६-१०
३. "गुणवचनानाम् आश्रयतो लिङ्गवचनानि भवन्ति" - व्याकरणवार्तिकम्
४. "सत्त्वप्रधानानि नामानि" - यास्कस्मृति:
५. "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत: तयोस्तु प्रत्यय: प्राधान्येन"
- वार्तिकम्, ३-१-६७
६. "धेनु: दक्षिणा" - तैत्तिरीयसंहिता, ५-७-३
७. "एकां गां दक्षिणां दद्यात्" - आपस्तम्बसूत्रम्, १४.२४१८.२५३
८. "दशभि: क्रीणाति" - तैत्तिरीयसंहिता, ६-१-१०
९. "व्रीहिभि: यजेत, यवैर्वा" - शतपथब्राह्मणम्, ११.३.१.३
१०. "व्रीहीन् अवहन्ति" - आपस्तम्बसूत्रम्, १.२१.७
११. "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामीक्षा, वाजिभ्यो वाजिनम्"
- बोधायनसूत्रम्, ५.१

## आकरग्रन्थौ

१. भाट्टदीपिका, खण्डदेव:, डा मण्डनमिश्र:, राष्ट्रियसंसंस्कृतसंस्थानम्, नवदेहली, ३-१-६, पुटसंख्या १८९-१९१
२. भाट्टकौस्तुभ:, खण्डदेव:, चिन्नस्वामिशास्त्री, राष्ट्रियसंसंस्कृतसंस्थानम्, नवदेहली, २०१२, ३-१-६, पुटसंख्या १५५-१६९

ISSN: 2231-0452

# दिङ्निर्णयविमर्श:

*डॉ. केशवमिश्र:*
*(अतिथि-अध्यापक:, ज्योतिषविभाग:,राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:)*

जीवने लोकानां व्यवहारनिर्वाहार्थं दिशां ज्ञानमत्यावश्यकम्। तत्रापि वेदनिष्ठानां भारतीयानान्तु वैदिककर्मकरणे दिग्ज्ञानमतिमहत्त्वं भजते। सिद्धान्तग्रन्थेषु दिग्विषय: त्रिप्रश्नाधिकारे ज्योतिर्विदा निरूपित: । यथोक्तं भास्कराचार्येण

**जगुर्विदोऽद: किल कालतन्त्रं दिग्देशकालावगमोऽत्र यस्मिन्।**
**त्रिप्रश्ननाम्नि प्रचुरोक्तिधाम्नि ब्रुवेऽधिकारं तमशेषसारम् ।।**[१]

श्लोकघटकत्रिप्रश्नबोध्या: दिग्देशकाला एव। यत्र दिश: दशसंख्याका:। तत्र मुख्या: दिश: चतस्र: पूर्व-दक्षिण-पश्चिम-उत्तरेति। विदिशोऽपि चतस्र: ईशान्य-आग्नेय- नैर्ऋत्य-वायव्येति। ऊर्ध्वमधोऽपि दिग्द्वयम्। एवमाहत्य दिश: दश भवन्ति। दिग्विषय: न केवलं ज्यौतिश्शास्त्रे अपितु वेदकालादारभ्यैव अस्या: विशदवर्णनं दृश्यते यस्य निरूपणमत्र क्रमश: क्रियते।

(१) दिने दिक्साधनप्रयोग: (शङ्कुद्वारा)।
(२) रात्रौ दिक्साधनप्रयोग: (नक्षत्रवेधद्वारा)।

तत्र स्थूलसूक्ष्मभेदात् दिशोऽपि द्विविधा:। तत्र स्थूलदिश: सामान्यकार्येषु, यात्रादौ च गृह्यन्ते। स्थूलदिग्ज्ञानन्तु सूर्योदय-सूर्यास्ताभ्यामेव जायते। यथा च भास्कर: - **यत्रोदितोऽर्क: किल तत्र पूर्वा तत्रापरा यत्र गत: प्रतीच्याम्**[२] । तत्र रविक्रान्ते: वैलक्ष्यण्यादुदयास्तबिन्दूनां प्रतिदिनं भिन्नत्वाच्च रवे: उदयास्तबिन्दू स्थूलपूर्वापरौ भवत:। किन्तु यज्ञादिषु वैदिकानां हवनकुण्डानां तथा वेदिकानां निर्माणार्थं च दिग्बिन्दूनां वास्तविकपरिचय: अत्यावश्यक: अभवत्। यतोऽहि वास्तविकदिग्बिन्दूनां स्थानानि निर्णीय यागानां शुभाशुभफलानां निष्पत्ति: जायते। अत एव यज्ञारम्भकाले, यज्ञमण्डपवेदीनां च निर्माणसमये सर्वप्रथमं

दिशाज्ञानमावश्यकं भवति। का दिशा प्राची, का प्रतीची, का याम्या का च सौम्येति ज्ञानाय दिक्साधनं निर्दिष्टमाचार्यवर्यैः।

शुल्बसूत्रैर्विना वैदिकयागसम्पादने न दिग्ज्ञानं भवितुं शक्यते न च वेदिनिर्माणं चितिनिर्माणं वा कर्तुं शक्यते। अत एव वेदस्य प्रतिशाखं यथा श्रौतसूत्राणि वर्तन्ते तथैव शुल्बसूत्राण्यप्युपलभ्यन्ते। अतः शुल्बसूत्रादिषु शास्त्रेषु च स्फुटदिग्ज्ञानविचारः निर्दिष्टः। अन्यच्च भूतले नभःस्थले वा कस्यापि नियतवस्तुनः स्फुटतया क्षितिजनिर्देशार्थं दिग्ज्ञानमपेक्षितम्।

इदमेव दिक्ज्ञानार्थं जनान् प्रेरयति यत् भूस्थिरवादिनां मतेन प्रवहवायुवशेन भपञ्जरस्य ध्रुवानुरोधेन पूर्वतः पश्चिमभ्रमणम्। अथवा आधुनिकानां मतेन भूगोलस्य कन्दुकाकारकल्पनया ध्रुवानुरोधेन भूपिण्डस्य पूर्वाभिमुखभ्रमणमिति।

**वेदब्राह्मणग्रन्थेषु दिङ्निर्णयः**

दिङ्निर्णयार्थं याजकाः विशेषेण प्रयत्नशीलाः दृश्यन्ते। तत्र नक्षत्रेभ्यः दिग्ज्ञानं कृतं तैः। ते हि कृत्तिका-पुष्य-चित्रा-स्वातीनक्षत्रैः पूर्वदिङ्निर्णयार्थं वेधेनावगन्तुं शक्यन्ते। यथा -

**कृत्तिकाश्रवणपुष्यः चित्रास्वात्योर्यदन्तरम्।**
**एतत् प्राच्या दिशोरूपं युगमात्रोदिते पुरः।।**[३]

तदुन्नतत्वं यदा पूर्वदिक्संपाते भवति स्म तदैव दिङ्निर्धारणं क्रियते स्म। कृत्तिका-नक्षत्रदर्शनेनैव प्राचीदिक्साधनं कृतं यथा -

"कृत्तिकास्वादधीत। एता ह वै प्राच्यै दिशो न च्यवन्ते। सर्वाणि ह वा अन्यानि नक्षत्राणि प्राच्यैः दिशश्च्यवन्ते तत् प्राच्यामेवास्यै तद्दिश्याहितौ भवतः तस्मात् कृत्तिकास्वादधीत।"[४]

अत्र कृत्तिकायामग्न्याधानसम्बन्धेन महत्त्वपूर्णं ज्योतिर्विषयकं सङ्केतद्वयमुपलभ्यते। प्रथमः कृत्तिकायामग्न्याधानसम्बन्धेन तस्याः नाडी-क्रान्तिवृत्तयोः सम्पातसन्निकर्षे स्थितिः। द्वितीयश्च कृत्तिकातारापुञ्जस्य नाडीवृत्ते कृताधिष्ठानत्वं येन तस्योदयः पूर्वबिन्दौ भवति स्म।

ब्राह्मणकालिकाचार्याः विषुवद्दिवसे (दिन-रात्रि समान इत्यर्थः) एवाग्न्याधानारम्भं कुर्वन्ति स्म। अग्न्याधानत्वेनास्य ब्राह्मणकालिकस्य देवता अग्निरिति कल्पितमभवत्। अनेन ज्ञायते यत् तदानीं कृत्तिकानक्षत्रं नक्षत्रगणनायां प्राथम्येन परिगृह्यते स्म। तथा तस्य विषुवद्वृत्तस्थितिः। तस्मात् पूर्वास्यामेव तस्योदयः इति। एवं नक्षत्राणामनुरोधेन दिग्ज्ञानं पूर्वैः कृतम्।

स्थूलदिङ्निरूपणमपि वेदे दृश्यते। यथा-

तैत्तिरीये आरण्यके स्पष्टमेव निर्दिष्टं यत् यत्र सूर्य उदेति सा प्राची दिक् यथा- "तत् आदित्य उदतिष्ठत्। सा प्राचीदिक्। अथाऽरुणः। केतुर्दक्षिणतः।"[५] एतेनात्र सूक्ष्मदिग्विचारोऽपि कृतो वर्तते।

न केवलं तत्र आकाशैः नक्षत्रग्रहादिभिः अपि तु भूमावेव शङ्क्वादीनां स्थापनद्वाराऽपि दिग्ज्ञानं कृतम् इति ज्ञायते। शतपथब्राह्मणस्येदं वाक्यं भूमौ शङ्कुनिपातेन दिग्ज्ञानं सूचयति यथा -

"चिह्ने नाप्यर्थसिद्धेः शङ्कुनिरवननं चेच्छङ्कुं निहन्ति।"[६] अपि च कात्यायन-महर्षिणाऽपि स्वीये शुल्बसूत्रे एवमेव दिग्ज्ञानविषये कथितं यथा -

"समे शङ्कुं निरवाय, शङ्कुसम्मितया रज्वा मण्डलं परिलिख्य यत्र लेखयोः शङ्क्वग्रच्छाया निपतति तत्र शङ्कुः निहन्ति सा प्राची इति।"[७] अतः तदानीमेव शङ्क्वादिना छायाज्ञानेन ते दिङ्निर्णयमकुर्वन्।

अपि च कात्यायनशुल्बसूत्रस्य कर्कभाष्ये कथितं यत्- "सूर्योदय एव प्राचीदिग्ज्ञानं कारयति। विषुवदिने रविश्चित्रास्वात्योरन्तराले समुदेति। अतस्तन्मध्ये शङ्कुगता च्छाया प्राचीं निर्दिशति। एतदतिरिक्तदिवसेषु शङ्क्वग्रभागो यां प्राचीं द्योतयति सा प्राची स्थूला भवति। दक्षिणायने चित्रापर्यन्तं सूर्य उदेति उत्तरायणे च स्वातीनक्षत्रं यावदिति।"[८] महीधरभाष्येऽपि स्पष्टीकृतमेतत्-

"दक्षिणायने चित्रापर्यन्तमर्कोऽभ्युदेति। मेषतुलासङ्क्रान्त्यहनि प्राच्यां शुद्धायामुदेति। ततोऽर्कात् प्राचीज्ञानं दुर्घटम्।"[९]

सूक्ष्मप्राचीदिशाज्ञानाय कुण्डमण्डपसिद्धिकार: तत्र यूकाचालनं निर्दिष्टवान्। कर्कवृश्चिकवृषमकरराशिषु चेत्सूर्य: स्यात्तर्हि मण्डले यत्र शङ्क्वग्रच्छाया स्पृशति तत उत्तरस्यां दिशि यूकामात्रं चालनं विधाय चिह्नं कार्यम्। यदा सिंहकन्यातुलाकुम्भमीनमेषराशिषु रवि: स्यात्तदा मण्डले शङ्क्वग्रच्छायाया दक्षिणे यूकाद्वयस्य चालनं विधाय चिह्नं दातव्यमिति। अथ च धनुर्मिथुनयो: सूर्ये सति यत्र शङ्क्वग्रच्छाया वृत्तं स्पृशति तत्रैव चिह्नं करणीयं सा दिशैव सूक्ष्मा भवति। यथोक्तम्-

**कर्के कीटे गोमृगे यूकया सा**
**द्वाभ्यां चाल्या सिंहकुम्भत्रिकेऽपि।**
**यां वा काष्ठां भानुमान् याति तस्यां**
**चाल्या द्वन्दे कार्मुके चालनं न।।**[१०]

एतेन यूकाचालनं कृत्वा यच्चिह्नमायाति सा दिशा सूक्ष्मा भवितुमर्हति। यूकाया: परिमाणं शास्त्रे लिखितं वर्तते यत् - कृतोर्ध्वबाहो: प्रपदोच्छ्रितस्य पुरुषस्य यत्परिमाणं स्यात्तस्य परिमाणस्य पञ्चमांशो हस्तपरिमाणं भवेत्। हस्तस्य चतुर्विंशत्यंशोऽङ्गुलो भवति। अङ्गुलस्याष्टमांशो यव: कथ्यते। यवस्य चाष्टमांशो यूका भवति।

**कृतोर्ध्वबाहो: समभूगतस्य कर्तु: शरांश: प्रपदोच्छ्रितस्य।**
**यो वा सहस्तोऽस्य जिनांशकोऽपि स्यादङ्गुलं तत्तदिभांशका ये ।।**
**यवो यूका च लिक्षा च बालाग्रं चैवमादय:।**
**कृतमुष्टि: करो रत्निररत्निरकनिष्ठिक:।।** [११]

यथा वेदेषु दिग्ज्ञानं नक्षत्रै: कृतं तथैव पुराणग्रन्थेषु दिग्ज्ञानप्रकार: दृश्यते।

**पुराणेषु दिग्ज्ञानम्**

ध्रुव-अगस्त्यादिनक्षत्राणां स्थितिवशेन दिङ्निश्चय: कृत:। सूर्योदय-सूर्यास्तादिकं न वास्तविकमिति प्रोक्तं यथा विष्णुपुराणे -

**विदिशासु त्वशेषास्तु तथा ब्रह्मन् दिशासु च।**
**यैर्यत्र दृश्यते भास्वन् स तेषामुदय: स्मृत:।।**

**तिरोभावे च यत्रैति तत्रैवास्तमनं रवेः।**
**नैवास्तमनमर्कस्य नोदयः सर्वदा सतः ।।**
**उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः।।**[१२]

एवं महाभारतेऽपि नक्षत्रैः दिग्ज्ञानस्य विचारः उपस्थापितः। तद्यथा -

**नाचक्षुर्वेत्ति पन्थानं नाचक्षुर्विन्दते दिशः।**
**नाधृतिर्बुद्धिमाप्नोति बुधस्यैवं प्रबोधत।।**
**चरन् मार्गान् विजानाति नक्षत्रैर्विन्दते दिशः।**
**आत्मना आत्मनः पञ्च पीडयन् नानुपीड्यते।।**[१३]

अन्यच्च -

**ततो नावं परित्यज्य प्रययुर्दक्षिणां दिशम्।**
**विज्ञाय निशिपन्थानं नक्षत्रगणसूचितम्।।**[१४]

एतेनेदमवगम्यते यत् निशायां नक्षत्रगणानां संस्थितिवशेनोत्तरदक्षिणादि दिग्ज्ञानं पुराणादिग्रन्थेषूपलभ्यते।

**ज्योतिश्शास्त्रानुरोधेन दिङ्निर्णयः**

सर्वेष्वपि सिद्धान्तग्रन्थेषु दिग्विषयः उपस्थापितः। तत्र विशेषतया शङ्कुमाध्यमेन दिग्ज्ञानं समुल्लिखितं वर्तते। विषयेऽस्मिन् सिद्धान्तशिरोमणेः गोलाध्याये भास्कराचार्येण स्थूलानां दिशां ज्ञानं सरलतया कथितं यथा -

**यत्रोदितोऽर्कः किल तत्र पूर्वा तत्रापरा यत्र गतः प्रतीच्याम्।**
**तन्मत्स्यतोऽन्ये च ततोऽखिलानामुदक्स्थितो मेरुरिति प्रसिद्धम्।।**[१५]

अस्यायमाशयः यत्र सूर्य उदेति सा पूर्वा दिक्। यत्रास्तं गच्छति सा परा दिगिति। सर्वेषामुत्तरतो मेरुरिति सामान्यदिक् परिचयः। तत्र रविक्रान्तेः वैलक्ष्यण्यादुदयास्तबिन्दूनां प्रतिदिनं भिन्नत्वाच्च रवेः उदयास्तबिन्दू स्थूलपूर्वापरौ भवतः। पुराणादिषु कृतदिङ्निर्देशः कन्दुकाकारपृथ्वीमाश्रित्य कृतः। एवञ्च भूपृष्ठवासिनां दिग्व्यवहारः पृथिव्याः कन्दुकाकार-कल्पनमन्तरेण कथमपि न सम्भवति। अत एव सर्वैः ज्योतिर्विद्भिः तावत् भूपिण्डस्य

कन्दुकाकारस्थित्या ग्रहाणां ध्रुवानुरोधभ्रमणेन च दिग्व्यवस्था अभिहिता। तत्र दिग्ज्ञानप्रकारे प्राचीनानां वराह-ब्रह्मगुप्त-लल्ल-भास्कर-श्रीपति-कमलाकर-गणेशदैवज्ञादिविदुषां दिक्साधनप्रकारा: उत्तरोत्तरं चमत्कारपूर्णा: सन्ति। सर्वैराचार्यै: सम्मण्डले शङ्कुस्थापनेन दिग्ज्ञानं प्रतिपादितम्। दिग्ज्ञानविषयकसूक्ष्मत्वोपलब्धये भास्कराचार्यस्य ज्ञानं स्फुटतां प्राप्नोति। तत्र सूक्ष्मदिग्ज्ञानाय क्रान्तिसाधनद्वारा दिक्चालनं भास्कराचार्यस्य विशेष:। "वासनाभाष्ये भास्कराचार्येण स्वयमेव शङ्को: प्रमाणं द्वादशाङ्गुलमिति कथितम्।"[१६] अत: सूक्ष्मदिग्ज्ञाननिर्णये भास्कराचार्यस्य अभिप्राय: -

**वृत्तेऽम्भ: सुसमीकृतक्षितिगते केन्द्रस्थशङ्को क्रमा-**
**द्भागं यत्र विशत्यपैति च यतस्तत्रापरेन्द्यौ दिशौ।**
**तत्कालापमजीवयोस्तु विवराद्भाकर्णमित्याहता-**
**ल्लम्बज्याप्तमिताङ्गुलैरयनदिश्यैन्द्री स्फुटा चालिता।।**
**तन्मत्स्यादथ याम्यसौम्यककुभौ सौम्या ध्रुवे वा भवे-**
**देकस्मादपि भाग्रतो भुजमितां कोटीमितां शङ्कुत:।**
**न्यस्येद्यष्टिमृजुं तथा भुवि यथा यष्ट्यग्रयो: संयुति:**
**कोटि: प्राच्यपरा भवेदिति कृते बाहुश्च याम्योत्तरा।।**[१७]

जलेन समीकृतभूमौ इष्टाङ्गुलप्रमाणमेकं वृत्तं लेखनीयम्। तन्मध्ये केन्द्रे द्वादशाङ्गुलशङ्कुश्च स्थापनीय:। तस्य शङ्को: छाया पूर्वाह्णे अपराह्णे च तस्मिन् वृत्ते प्रविशति निर्गच्छति च। यत्र छाया पतति पूर्वाह्णे तत्र सा पश्चिमदिग् इति। परन्तु सूक्ष्मदिक्साधनं रविक्रान्तिज्यया साध्यते। अर्थात् तात्कालिकार्कस्य क्रान्तिज्या साध्यते। तस्य कालं क्रान्तिज्यया: अन्तरं कृत्वा तस्या: छायां कर्णेन संगुण्य लम्बज्यया विभाज्यते। तल्लब्धिरेव चालनफलम् ।

यद्युत्तरस्मिन् रविर्वर्तते तेनैन्द्री दिग् उत्तरतश्चालिता तावता चालनफलेन स्फुटा भवति। यदि रवि: दक्षिणायने स्थितो भवति तदा इदं चालनफलं दक्षिणत: चाल्यते। तस्मात् स्फुटा प्राची भवति। तस्मात् मत्स्याकाररेखामुत्पाद्य उत्तरदक्षिणदिशौ साध्येते। यथापूर्व-बिन्दुकेन्द्रात् तद्बिन्दुद्वयान्त:पातिरेखात्रिज्ययोत्पन्नं वृत्तमेकम्। अपरं च पश्चिमबिन्दुकेन्द्रात् बिन्दुद्वयान्त:पातिरेखात्रिज्ययोत्पन्नं वृत्तम्। अनयो: योगेन मध्ये शकलं मत्स्याकारं भवति।

तन्मत्स्यमुखपुच्छबिन्दुद्वयगता तदुपरि लम्बरूपा च भवति। सैव रेखा दक्षिणोत्तरा। सा च याम्यसौम्यरेखा। यत्र बिन्दुद्वये लगति ते उत्तरदक्षिणदिशि भवतः।

इत्यनेन ज्ञायते यत् सिद्धान्तशिरोमणेः याम्योत्तरदिग्ज्ञानं पूर्ववन्मत्स्याकारचापेन कर्त्तव्यमिति। सिद्धान्तशेखरे श्रीपतिनाऽप्युक्तं दिग्ज्ञानायैतादृशमेव। सूर्यसिद्धान्ते याम्योत्तरदिशाज्ञानाय मत्स्याकृतिरेखा प्रयुक्ता वर्तते। मध्ये-मध्ये च केणेषु विदिशाभागाः ज्ञातव्याः इति। राजवल्लभमण्डने शङ्कुमाध्यमेन पूर्वापरोत्तरदक्षिणदिशाज्ञानमेवमेवोक्तम्। किन्त्वत्र द्वात्रिंशदङ्गुलात्मके वृत्ते द्वादशाङ्गुलशङ्कोः प्रयोगः लिखितः। सर्वानन्दकरणे दिक्साधनं शङ्कुमाध्यमेन नातिभिन्नं प्रदर्शितम्-

**समभुवि मण्डलकेन्द्रे शङ्कौ निहितेऽह्नि मण्डलं छाया।**
**विशति त्यजति च तत्स्थलयाता रेखा तु पूर्वपश्चिमा ।।**
**प्राक्पररेखा लम्बः केन्द्राद्याम्योत्तरादिशां ज्ञानम्।।**[१८]

सूर्यसिद्धान्तानुसारं दिक्साधनं छायाप्रवेशनिर्गमकालिकक्रान्त्याधारेण कृतं यथा-

**शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे।**
**तत्र शङ्क्वङ्गुलैरिष्टैः समं मण्डलमालिखेत्।।**
**तन्मध्ये स्थापयेच्छङ्कुं कल्पनाद्वादशाङ्गुलम्।**
**तच्छायाग्रं स्पृशेद् यत्र वृत्ते पूर्वापरार्धयोः।।**
**तत्र बिन्दू विधायोभौ वृत्ते पूर्वापराभिधौ।**
**तन्मध्ये तिमिना रेखा कर्तव्या दक्षिणोत्तरा।।**
**याम्योत्तरदिशोर्मध्ये तिमिना पूर्वपश्चिमा।**
**दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि।।**[१९]

ग्रहलाघवेऽपि दिक्साधानं तुरीययन्त्रमाध्यमेनैवमेव कृतं वर्तते। तुरीययन्त्रेण याम्योत्तरा पूर्वापरा च दिशा ज्ञातव्या। परन्तु कार्यमेतत्सर्वत्र न भवितुमर्हति तुरीययन्त्रस्य सर्वत्राऽभावत्वात्। सिद्धान्तदर्पणेऽतिविस्तरेण शङ्कुमाध्यमेन पूर्वपश्चिमोत्तरदक्षिणदिशां ज्ञानं तत्कोणानां च परिज्ञानं निर्दिष्टम्। एतदपि पूर्वोक्तशास्त्रानुसारमेव निगदितम्। एतेन विधिना दिने दिग्ज्ञानं सम्यक्प्रकारेण कर्तुं शक्यते।

रात्रौ दिक्साधानं ध्रुवतारामाध्यमेन क्रियते। ध्रुवतारा सदैवोत्तरस्यां दिशि एव भवति। मेषतुलयो: सूर्यस्य यत्रोदय: स्यात्सा दिशा प्राची भवति। श्रवणकृत्तिकानक्षत्रयोर्यस्यां दिशायामुदयो भवेत् सा दिशा पूर्वा भवितुमर्हति। चित्रास्वातीनक्षत्रयोरुदयस्थानयोर्मध्ये प्राची दिशा भवति-

**प्राची मेषतुलारवावुदयति स्याद्वैष्णवे वह्निभे।**
**चित्रास्वातिभमध्यगा निगदिता प्राची बुधै: पञ्चधा।।**[२०]

अत्र सायनमेषतुलयोर्ग्रहणं कर्त्तव्यमिति रात्रौ ध्रुवतारामाध्यमेन दिक्साधनं कथितम्। आकाशे सप्तर्षिध्रुवतारयोर्मध्ये तारकद्वयं मार्कटिकाऽभिधानं विद्यते। रात्रौ यदा ध्रुवतारा-मार्कटिकाताराद्वयं च समसूत्रे समागच्छतस्तदा दीपकद्वाराऽवलम्बे ध्रुवैक्यं प्रदर्शयति। सा दिशोत्तरा भवति। यथा-

**तारे मार्कटिके ध्रुवस्य समतां नीतेऽवलम्बे नते।**
**दीपाग्रेण तदैक्यतश्च कथिता सूत्रेण सौम्या दिशा।।**[२१]

प्रासादमण्डनेऽपि रात्रौ दिक्साधनाय ध्रुवतारावलम्बो गृहीत:-

**रात्रौ दिक्साधनं कुर्याद् दीपसूत्रध्रुवैक्यत:।।**[२२]

इदानीं दिक्साधनस्य कृते चुम्बकयन्त्रस्य (कुतुबनुमा) सर्वत्र प्रचलनमस्ति। यथोक्तं चुम्बकयन्त्रस्य विषये कमलाकरभट्टेन सिद्धान्ततत्त्वविवेके -

**सच्चुम्बकादेव सुशिल्पविज्ञा:**
**कुर्वन्ति दिग्ज्ञानमितोऽन्यथा वै ।**
**पूर्वापरा याऽत्र कृता प्रकारै-**
**र्ज्ञेया बुधै: सा सममण्डलीया।।**[२३]

इत्यनेन ज्ञायते यत् आचार्यकमलाकरभट्टकाले १६१०-१६४० ख्रिस्ताब्द्या: समये दिग्ज्ञानाय शङ्कुयन्त्रातिरिक्तं चुम्बकयन्त्रस्य प्रयोग: प्रचलित आसीत्। चुम्बकस्यैकोऽग्रभाग उत्तरस्यामपरश्च दक्षिणदिशायां सदैव तिष्ठत:। एतेन याम्योत्तरदिग्ज्ञानं सरलतया चुम्बकयन्त्रेण कर्तुं शक्यते। एवं प्रकारेण दिने रात्रौ च सम्यक् दिग्ज्ञानं सूक्ष्मतया

शुद्धतया च कर्तुं शक्यते। यतोऽहि दिग्ज्ञानं विना यागवेदीयागमण्डपगृहनिर्माणं, मन्दिरकूपादिनिर्माणं ग्रामनगरयोर्निर्माणं वेधशालादिनिर्माणं नैव भवितुमर्हन्ति।

अत्र निष्कर्षतः ब्रूते यद् आधुनिके ज्योतिषशास्त्रे दिक्साधनं त्रिप्रश्नाधिकारीयमेव प्रचलति। अतः अस्य महत्त्वम् उपयोगित्वञ्च स्फुटं भवति।

## सन्दर्भाः

१. सि.शि. ३/१
२. सि.शि.गो.अ.-२. ३४
३. ऋ.वे. २-४-३४
४. श.ब्रा. २-१-२
५. त्तै.आ. २३/१/९
६. श.ब्रा. ३-५-१-१
७. का.शु. सू.-२
८. कात्यायनसूल्बसूत्रे कर्कभाष्ये पृ.सं.-२
९. कात्यायनसूल्बसूत्रे महीधरभाष्ये पृ.सं.-३
१०. कुण्डमण्डपसिद्धौ- ८
११. कुण्डमण्डपसिद्धौ- ३-४
१२. वि.पु. २-८-१५-१७
१३. आदिपर्व ७४४/२४,२५
१४. तत्रैव १४९/२१
१५. सि.शि. ३/१
१६. सि.शि.गो.अ.२. ३४
१७. सि.शि.त्रि.अ.३/८,९
१८. सर्वानन्दकरणे त्रिप्रश्नाधिकारे २-५
१९. सू.सि. ३१-४
२०. राजवल्लभमण्डने १- १०
२१. राजवल्लभमण्डने १- ११
२२. प्रासादमण्डने १- २३
२३. सिद्धान्ततत्त्वविवेके त्रिप्रश्नाधिकारे-२७८

## सन्दर्भग्रन्थाः

१. सिद्धान्तशिरोमणिः (भास्कराचार्यविरचितः), वासनाभाष्यटीका, चौखम्बा संस्कृत सिरीज आफिस, वाराणसी, १९९६।

२. सूर्यसिद्धान्तः (आर्ष प्रणीतः), पं. श्री कपिलेश्वरशास्त्रिणा सम्पादिताः, चौखम्बा संस्कृत संस्थान, वाराणसी ।

३. शतपथ ब्राह्मण - व्याख्याकार स्वामी समर्पणानन्द सरस्वती, प्रकाशकः- स्वामी समर्पणानन्द वैदिक शोध संस्थान, मेरठ, १९९५ ।

४. विष्णुमहापुराणम्, श्रीधरस्वामिकृतात्मप्रकाशाख्यव्याख्यया, संपादकः- पं थानेश्चन्द्र उप्रैति, प्रकाशकः- परिमल पब्लिकेशन्स, दिल्ली, २०११।

५. तैत्तिरीयारण्यकम् (श्रीमत्सायणाचार्यविरचितभाष्यसमेतम्), आनन्दाश्रमसंस्कृतग्रन्थावली, २००८।

६. महाभारतम् (महर्षिवेदव्यासप्रणीतम्), श्रीनीलकण्ठकृतभारतभावदीपटीका, प्रकाशकः- सनातन शास्त्रम् प्रकाशन्, १९८३।

७. सिद्धान्तदर्पणः (श्री चन्द्रशेखरसिंहसामन्तकृतः), अनुवादकः - अरुण कुमार उपाध्यायः, नाग प्रकाशकः, ११ ए -यू.ए.जवाहरनगर, दिल्ली, १९९६।

८. सिद्धान्ततत्त्वविवेकः (श्रीकमलाकरभट्टविरचितः), सम्पादकः - डॉ. कृष्णचन्द्रद्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९८।

९. सिद्धान्तसम्राट् (विद्वद्वरश्रीजगन्नाथसम्राडविरचितः), सम्पादकः - डॉ मुरलीधरचतुर्वेदः, प्रकाशकः- संस्कृत परिषद्, सागरविश्वविद्यालयः, सागरम्, म०प्र०, १९७६।

१०. ग्रहलाघवम् (श्रीगणेशदैवज्ञविरचितम्), सम्पादकः व्याख्याकारश्च– प्रो. रामचन्द्रपाण्डेयः, चौखम्बा कृष्णदास अकादमी, वाराणसी, २००७।

११. सिद्धान्तशेखरः - श्रीपतिप्रणीतः, श्रीबबुआजिमिश्रेण प्रकाशितः।

ISSN: 2231-0452

# अग्निपुराणे वृक्षचिकित्सा

***जी.अमरेश्वरकुमारः***
*(शोधच्छात्रः, पुराणेतिहासविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

ओषधीनामनेकोपयोगास्सन्ति । अस्थानप्ररूढाः अकालप्ररूढाश्च वृक्षा औषधार्थं नोपयोक्तव्याः। चरकेऽपि योग्यौषधप्ररोहणानुकूलदेशाः विस्तारेण निरूपिताः। श्मशानस्थाः वृक्षाः न औषधयोग्याः। अधार्मिकराजानुशासितराज्येऽपि प्ररूढाः वृक्षाः औषधयोग्या न भवन्ति इत्यपि आयुर्वेदविदां मतम्। वर्जनीयाः वृक्षाः, देशाश्च चरकसंहितायां विमानस्थाने बहुधा व्याख्याताः। ये च सञ्जीवनीकर्णकल्पवृक्षाः, ते स्वयं गृहे पोष्याः। एवं गृहोद्याने तेषां रक्षणमपि अग्निपुराणे अस्मिन्नध्याये (२८२) विवृतम्।

**वृक्षायुर्वेदमाख्यास्ये प्लक्षश्चोत्तरतः शुभः।**
**प्राग्वटो याम्यतस्त्वाम्र आप्योऽश्वत्थः क्रमेण तु।।**[1]

उद्यानवने, गृहे च उत्तरस्यां दिशि ''प्लक्षः'', प्राच्यां ''वटः'' दक्षिणदिशि ''आम्रः'' पश्चिमदिशि ''अश्वत्थ''श्च मङ्गलकरः।

गृहसमीपे शुभकरणार्थं निम्ब-अशोक-पुन्नाग-शिरीष -प्रियंगु (कगुनी) इत्यादीनां वृक्षाणामारोपणं करणीयम्। (बृ. सं. वृक्षायुर्वेदाध्यायः - ३)

**दक्षिणां दिशमुत्पन्नाः समीपे कण्टकद्रुमाः।**
**उद्यानं गृहवासे स्यात् तिलान् वाप्यथ पुष्पितान्।।**[2]

उद्यानवने दक्षिणस्यां दिशि प्ररूढाः, तिलवृक्षाः, कण्टकिनो वृक्षा अपि शुभप्रदाः।

**वृक्षारोपणे मुख्यनक्षत्राणि -**

**गृह्णीयाद्रोपयेद् वृक्षान् द्विजञ्चन्द्रं प्रपूज्य च।**
**ध्रुवाणि पञ्च वायव्यं हस्तं प्राजेशवैष्णवम्।।**

**नक्षत्राणि तथा मूलं शस्यन्ते द्रुमरोपणे।**
**प्रवेशयेन्नदीवाहान् पुष्करिण्यान्तु कारयेत्।।**[३]

गृहसमीपे उद्यानमपि पोषणीयम्। ब्राह्मणम्, ओषधीनां पतिं चन्द्रं च पूजयित्वा वृक्षारोपणं कार्यम्। वृक्षारोपणार्थम् उत्तरा, हस्ता, स्वाती, रोहिणी, श्रवणा, मूला एतानि प्रशस्तानि नक्षत्राणि। उद्याने पुष्करिणीं निर्माय कुल्यां नद्याः कारयेत्।

बृहत्संहितायामपि दिव्यदृष्टयः मुनयोऽपि वृक्षारोपणार्थं मुख्यनक्षत्राणां नामानि उक्तवन्तः। तानि यथा - उत्तरा, रोहिणी, मृगशिरा, रेवती, चित्रा, अनुराधा, मूला, विशाखा, पुष्या, श्रवणा, अश्विनी, हस्ता चेति।

**उद्यानवने पुष्करिणीनिर्माणम् -**

**हस्तो मघा तथा मैत्रमाद्यं पुष्यं सवासनम्।**
**जलाशयसमारम्भे वारुणञ्चोत्तरात्रयम्।।**[४]

पुष्करिण्याः निर्माणकरणेऽपि शुभनक्षत्राणां दृष्टिः आवश्यकी। तदर्थं जलाशयारम्भे हस्ता, मघा, अनुराधा, पुष्या, ज्येष्ठा, उत्तरात्रयम् इति एतानि नक्षत्राणि शुभप्रदानि।

**वृक्षारोपणे नियमाः -**

**संपूज्य वरुणं विष्णुं पर्जन्यं तत् समाचरेत्।**
**अरिष्टाशोकपुन्नागशिरीषाः सप्रियङ्गवः।।**
**अशोकः कदली जम्बुस्तथा वकुलदाडिमाः।**
**सायं प्रातस्तु घर्मर्तौ शीतकाले दिनान्तरे।।**[५]

वरुणं, विष्णुं, पर्जन्यं च पूजयित्वा कार्यारम्भः कार्यः। बृहत्संहितायां वृक्षायुर्वेदाध्याये अपि एवमुक्तम् - वृक्षारोपणसमये वृक्षारोपकः पवित्रो भूत्वा अर्थात् स्नात्वा, चन्दनादिद्रव्यैः वृक्षान् पूजयित्वा आरोपणं कुर्यात्। तदानीमेव वृक्षपत्रेषु औषधगुणानां वृद्धिर्भवति इति।[६]

अरिष्टः, अशोकः, पुन्नागः, शिरीषवृक्षः, प्रियङ्गुः, कदली, जम्बुः, वकुलः, दाडिमः इत्येतान् वृक्षान्, संरोप्य दिने सकृत् जलसेचनं कार्यम्। अनावृष्टौ शुष्कायां भूमौ जलसेचनं कार्यम्।

**वर्षारात्रौ भुवः शोषे सेक्तव्या रोपिता द्रुमाः।**
**उत्तमं विंशतिर्हस्ता मध्यमं षोडशान्तरम्।।**
**स्थानात् स्थानान्तरं कार्यं वृक्षाणां द्वादशावरम्।**
**विफलाः स्युर्घनाः वृक्षाः शस्त्रेणादौ हि शोधनम्।।**[७]

वृक्षारोपणसमये वृक्षयोः मध्ये विंशतिहस्तप्रमाणान्तरः उत्तमः। षोडशहस्तप्रमाणं मध्यमं, द्वादशहस्तप्रमाणम् अधमं भवति। द्वादशहस्तविस्तीर्णे मध्ये स्थितानां वृक्षाणामन्यत्र आरोपणं कार्यमुत्तमम्। समीपे समीपे प्ररूढा वृक्षाः न फलप्रदाः।

**वृक्षाणां फलवृद्धिचिकित्सा -**

**विडङ्गघृतपङ्काक्तान् सेचयेच्छीतवारिणा।**
**फलनाशे कुलत्थैश्च माषैर्मुद्गैर्यवैस्तिलैः।।**[८]

विडङ्गघृतपङ्कयुक्तशीतलं जलं वृक्षमूले सेचनीयम्। फलनाशे कुलुत्थ-माष- मुद्गयव-तिल-घृतमिश्रितं जलं वृक्षसेचनार्थमुपयोज्यम्।

**बृहत्संहितायां वृक्षाणां चिकित्सा -**

रुग्णवृक्षाणां रक्षणार्थमादौ रुग्णवृक्षे विकृतभागः निष्कासनीयः। अनन्तरं तस्योपरि विडंग-घृतमिश्रितपङ्कं लेपनीयम्। अनन्तरं क्षीरमिश्रितजलसेचनं करणीयम्।[९]

फलानां वृद्ध्यर्थं कुलुत्थ-माष-मुद्ग-तिल-यवादीनि क्षीरे संस्थाप्य उष्णीकृत्य, शैत्यादनन्तरं वृक्षस्य मूले स्थापनीयम्।[१०]

**घृतशीतपयः सेकः फलपुष्पाय सर्वदा।**
**अविकाजशकृच्चूर्णं यवचूर्णं तिलानि च।।**
**गोमांसमुदञ्चैव सप्तरात्रं निधापयेत्।**
**उत्सेकः सर्ववृक्षाणां फलपुष्पादिवृद्धिदः।।**[११]

वृक्षाणां फलपुष्पवृद्ध्यर्थं - मेषाणाम्, अजानां मलं, यवचूर्णं तिलमिश्रितं जलसिञ्चितं सप्तदिनानि यावत् कृत्वा तन्मिश्रणं वृक्षमूले निधातव्यम्।

**मत्स्याम्भसा तु सेकेन वृद्धिर्भवति शाखिनः।।**[१२]

मत्स्यनिवासजलेन वृक्षाणां सेचने तेषां शाखानां वृद्धिर्भवति।

**विडङ्गतण्डुलोपेतं मत्स्यं मांसं हि दोहदम्।**
**सर्वेषामविशेषेण वृक्षाणां रोगमर्दनम्।।**[१३]

सामान्ये विविधरोगाणां निवारणार्थं वृक्षाणां मूले विडङ्गतण्डुलयुक्तमत्स्यमांसं स्थापनीयम्। तद् द्वारा विविधरोगाणां निवारणं भवति। एवं प्रकारेण वृक्षाणां विषयः, तेषां सामान्यचिकित्सायाः विषयाश्च अग्निपुराणे प्रतिपादिताः।

## सन्दर्भसूची

अ.पु.- अग्निमहापुराणम्।
बृ.सं. - बृहत्संहिता।
१. अग्नि. २८२-१
२. अ.पु.२८२-२
३. अग्नि. २८२-३,४
४. अ.पु.२८२-५
५. अग्नि. २८२- ६,७
६. बृ.सं. वृक्षायुर्वेदाध्यायः - ८
७. अ.पु. २८२-८,९
८. अ.पु.२८२-१०
९. बृ.सं. वृक्षायुर्वेदाध्यायः-१५
१०. बृ.सं. वृक्षायुर्वेदाध्यायः - १६
११. अग्नि. २८२. ११,१२
१२. अग्नि. २८२-१३
१३. अग्नि. २८२-१३

## उपयुक्तग्रन्थसूची

१) अग्निमहापुराणम् - आचार्य शिवप्रसाद द्विवेदी, चौखम्बा पब्लिकेशन्, देहली, २००४
२) अग्निमहापुराणम् - तेलुगु, विक्टरी पब्लिकेशन्स, विजयवाटिका
४) अग्निमहापुराणम् - श्रीपुल्लेल श्रीरामचन्द्रुडु, श्रीवेङ्कटेश्वरआर्षभारती ट्रष्ट्, भाग्यनगरम्,१९८९
५) बृहत्संहिता - चौखम्बा पब्लिकेशन्स आवञ्च सत्यनारायण, देहली, २००८

ISSN: 2231-0452

# नैषधीयचरिते राजनयः

*जी. सुमेधा*

*(शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

विश्वसृजा विश्वकल्याणाय लोकस्य नियमनाय च राजा सृष्टः। भ्राजकः प्रकाशको वा व्युत्पत्तिलभ्यो राजपदार्थः। किन्तु पदस्यास्य प्रवृत्तिलभ्यार्थस्तु प्रजारक्षणार्थमभिषिक्तः कश्चन पुरुषविशेष इति। उच्यते हि बृहस्पतिना -

**बलेन चतुरङ्गेण यतो रञ्जयति प्रजाः।**
**दीप्यमानः स वपुषा तेन राजाऽभिधीयते।।**[१]

ग्रन्थानामवलोकनेनावगम्यते यत् प्रजारञ्जकत्वं राजपदार्थः प्रजानन्दनश्च राजा इति। राज्ञः स्वभावविषये उच्यते याज्ञवल्क्यस्मृतौ -

**ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनोऽरिषु।**
**स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता।।**[२]

अर्थात् राजा विद्यावत्सु ब्राह्मणेषु क्षमागुणान्वितः, स्नेहशीलेषु साधुषु अकुटिलः, शत्रुषु क्रोधशीलः, भृत्येषु प्रजासु च पितृवत् स्यादिति नीतिः।

एवं राजभिः या नीतिः आचर्यते, सैव राजनीतिरिति ख्याता लोके। राजनीतिशास्त्रस्य मूलभूतमानदण्डानां विवरणं नैषधमहाकाव्येऽपि दरीदृश्यते। वस्तुतः राजनीतिः सा भवति, यत्र सामदानदण्डभेदोपायैः राजा स्वीयं राष्ट्रं रक्षन् तं सुसमृद्धं करोति। राज्ञः श्रेष्ठत्वं निरूपयन् तस्य दिक्पालानां देवतानाञ्च अंशत्वेन श्रीहर्षः नलं वर्णयन् प्राह-

**दिगीशविभूतिरीशिता दिशां स कामप्रसभावरोधिनीम्।**
**बभार शास्त्राणि दृशं द्वयाधिकां निजजिनेत्रावतरत्वबोधिकाम्।।**[३]

एवं लोकपालानामंशेन राजोत्पत्तिः मनुस्मृतावपि समर्थिता तत्रोक्तञ्च-

**इन्द्राऽनिलयमाऽर्काणामग्नेश्च वरुणस्य च।**
**चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः।।**
**तस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः।**
**तस्मादभिभवत्येष सर्वभूतानि तेजसा।।**[४]

राजानः गुप्तचराणां माध्यमेन राज्यस्य विवरणं जानन्ति स्म इत्यमुं विषयं श्रीहर्षो नलवर्णने प्रस्तुन्वन् प्रोक्तवान् यत् - नलः विचारदृक् (विचार्य पश्यतीति) चारदृक् (चारैः पश्यति) चासीत्। अतः स्पष्टं यत् राजा नलः गुप्तचरैः स्वराष्ट्रस्य परराष्ट्रस्य च सर्वान् व्यवहारान् परिशीलयाम्बभूव। यथा उच्यते हि नीतिषु -

**गन्धेन गावो पश्यन्ति ब्राह्मणा वेदचक्षुषा।**
**चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः।।**[५]

राजा इतरराजभिस्सह कीदृशव्यवहारी भवेत् इति वर्णयन् नलमाध्यमेन श्रीहर्षः प्रोवाच-

**प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता।**
**अमित्रजिन्मित्रजिदोजसा स यद् विचारदृक्चारदृगप्यवर्तत।।**[६]

अर्थात् परस्परविरोधिनोऽपि राजानः नलस्य भेदनीतिविषयिकीं पटुतां ज्ञात्वा समुदायेष्वेवावतिष्ठन्त स्वेच्छाचारितां विहाय। यतः नलः चारदृग्सन्नपि विचारदृगर्थात् नीरक्षीरविवेक्यप्यासीत्। अनेन ज्ञायते यत् चक्रवर्ती राजा स्वीयाधीनस्थान् भेदनीत्या भीषयित्वा तान् वशीकुर्यात्। नलस्य सार्वभौमलक्षणं प्रकटयन् कविराह -

**जगज्जयं तेन च कोशमक्षयं प्रणीतवान् शैशवशेषवानयम्।**
**सखा रतीशस्य ऋतुर्यथा वनं वपुस्तथालिङ्गदथास्य यौवनम्।।**[७]

अयं नृपः षोडशाब्ददेशीयो समग्रस्य भूमण्डलस्य विजयं प्रणीतवान्। तेन च विजयेन कोशं भण्डारगृहमक्षयं परिपूर्णं कृतवान्। अनेन प्रसङ्गेन ज्ञायते यत् सार्वभौमराज्याय राज्ञा असकृत् विजयाभियानं कार्यं, येन अधीनस्था राजानो चक्रवर्तिने राज्ञे कररूपेण उपहारान् प्रयच्छेयुः, येन राज्ञः कोशः अक्षीणो सुदृढश्च भवेत्। यतः कौटिल्येनाऽप्युक्तमर्थशास्त्रे-

कोशमूला: कोशपूर्वा: सर्वारम्भा:। तस्मात्पूर्वं कोशमवेक्षेत।[८]

एष भावो महाभारतेऽपि दर्शनीय:-

**कोशश्च सततं रक्ष्यो यत्नमास्थाय राजभि:।**
**कोशमूला हि राजान: कोशो वृद्धिकरो भवेत्।।**[९]

अर्थात् कोशस्य कार्यद्वयं भवति। कोशस्य रक्षा अर्थात् बाह्य शत्रुभ्य: आक्रमणेन रक्षा द्वितीयं रक्ष्यमाणस्य कोशस्य वृद्धि:, येन राज्यव्यवस्थार्थं कोशसमृद्धिमनु आगामिनी योजना भवेत्।

राजनीतिशास्त्रसम्बद्धां युद्धनीतिमपि नलमुखेन दमयन्त्या: उदरसौन्दर्यवर्णनाप्रसङ्गे हर्षेणोक्तं- यत् द्वयो: प्रबलराज्ययो: मध्ये यदि किञ्चित् निर्बलराज्यं भवेत् यत् पर्वतस्योपत्यकाधित्यकादि युक्तं गर्तप्रदेशयुक्तम् उच्छ्रयादियुक्तं कच्छादिप्रदेशयुक्तं च भवेत्, तत्र विजिगीषुणा राज्ञा कदाऽपि आक्रमणं नैव कार्यम्। यत: निर्बलराज्यवासिनां स्वीयस्थानस्य सुष्ठुज्ञानात् ते युद्धे जयमाप्नुवन्ति।

**क्षीणेन मध्येऽपि सतोदरेण यत्प्राप्यते नाक्रमणं बलिभ्य:।**
**सर्वाङ्गशुद्धौ तदनङ्गराज्यविजृम्भितं भीमभुवीव चित्रम्।।**[१०]

राजनीतौ एक अन्यतम: सिद्धान्त: एष यत् दुर्बल: प्राणी अथवा दुर्बलं राज्यं प्रबलप्रणिना सह प्रबलराज्येन च सह शत्रुतां नैवाचरेत्। प्रबलेन साकं भयविषयिणीमिमामेव नीतिं प्रयुञ्जीत तदुक्तम् -

**पुष्पैरपि न योद्धव्यं किं पुन: निशितै: शरै:।**[११]

अर्थात् यथा दुर्बल: कामदेव: प्रबले शंकरे केवलं पुष्पबाणेन प्रहारकारणात् भस्मताङ्गत: तथैव यदि कोऽपि दुर्बल: प्रबले शस्त्राघातं विदधाति तर्हि तस्य दुर्बलस्य दुर्दशायास्तु का कथा? इदमेव तात्पर्यम् इत्थं समुपवर्णितं कविना-

**फलमलभ्यत यत्कुसुमैस्त्वया विषमनेत्रमनङ्ग! विगृह्णता।**
**अहह नीतिरवाप्तभया ततो न कुसुमैरपि विग्रहमिच्छति।।**[१२]

अत: प्रबलै: साकं निर्बलै: औद्धत्यं नैव प्रदर्शनीयम्।

राज्ञा मर्यादा नैव त्याज्या अपितु सा सर्वदा परिपाल्या एव इत्यमुं भावं विवृण्वन् नैषधे उक्तम्-

**न वासयोग्या वसुधेयमीदृशस्त्वमङ्ग ! यस्याः पतिरुज्झितस्थितिः।**
**इति प्रहाय क्षितिमाश्रिता नभः खगास्तमाचुक्रुशुरारवैः खलु।।**[१३]

अर्थादत्र उत्प्रेक्षालंकारेण हंसोऽवदत् यत् यस्मिन् देशे राजा स्वकीये वचसि स्थिरो न भवति, स्वीयमर्यादायां न तिष्ठति, तत्र खगैरपि वासो न विधेयः। एनेन प्रसङ्गेन बुध्यते यत् सर्वप्राणिनां पालनाय सर्वभूताधिपत्यस्य सम्पादनाय च राज्ञा मर्यादा सर्वदा सर्वथा च अनुल्लंघ्या एव।

अथ च राजनये सामदानदण्डभेदानां चतुर्णां नीतीनामतिशयेन महत्वं वर्वर्ति। उच्यते हि अग्निपुराणे-

**सामभेदौ मया प्रोक्तौ दानदण्डौ तथैव च।**[१४]

एतासां चतुर्णां नीतीनाम् उपेक्षणात् प्रजासु अवज्ञाभाव उत्पद्यते येन राज्ञः अनुपदं स्वीयेऽपि राष्ट्रे राजकार्ये सर्वत्र रिपूणां साम्मुख्यं भवेत्। अत एव एतासां चतुर्णां नीतीनां राजनि अनिवार्यत्वं सूचयन् प्राह-

**न चाहमस्य शक्नोमि तत्रापेक्षां समाश्रयेत्।**
**अवज्ञोपहतस्तत्र राज्ञाकार्यो रिपुर्भवेत्।।**[१५]

एवं हंसं मारयितुं उद्यते सति नले आत्मरक्षार्थं हंसः सामनीतिमाश्रयन् नलाय यथार्थमबोधयत्। यथा-

**धिगस्तु तृष्णातरलं भवन्मनः समीक्ष्य पक्षान्मम हेमजन्मनः।**
**तवार्णवस्येव तुषारशीकरैर्भवेदमीभिः कमलोदयः कियान्।।**[१६]

हे राजन्! मम हेमजातान् पक्षान् दृष्ट्वा तत्प्राप्त्यै भवतः मनसि या तृष्णा जागृता सा धिक्कारयोग्या। यतः मम पक्ष्मणाम् अर्जनेन भवतां कोशः तथैव वृद्धिं नैष्यति यथा तुषारबिन्दूनां पातेन समुद्रः वृद्धिं नैति। अतः मां जीवनाय संत्यजतु इति हंसेन प्रार्थितम्।

अस्मिन् श्लोके सामनीतिः परिलक्षिता भवति। अस्मिन् श्लोके दाननीतिं समाश्रित्य हंसः प्राणदानं प्राप्नोत् यथा -

**न केवलं प्राणिवधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः।**
**विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि।।**[१७]

अर्थात् हे राजन्! मम वधः केवलं प्राणिवधो न अपितु धर्मस्य निन्दाऽपि भवति। यतः विश्वासजुषामपि द्विषतां हिंसा नैव कार्या इति धर्मः। अत्र तु अहं भवतां शरणागतः, अतः अवध्योऽहं इत्यवोचत् हंसः। एवं दाननीत्याश्रयणेन राज्ञः मनः परिवर्तितं कृतं हंसेन।

ततः परं दण्डनीतिविषये हंसोऽब्रवीत्-

**पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्यते।**
**धिगीदृशं ते नृपते! कुविक्रमं कृपाश्रये यः कृपणे पतत्त्रिणि।।**[१८]

अर्थात् हे राजन्! स्थाने-स्थाने रणोद्भटाः संग्रामदुर्मदा भटाः शूराः विद्यन्ते। तेषु हिंसारसः = मारणानुरागः ते शूरेषु राज्ञा परिपूरणीयः अर्थात् राज्ञः कर्तव्यमिदं यत् कृपापात्राणि (शरणागतान्) विहाय दुष्टेषु दण्डाघातो भवेदेव।

अग्रे भेदनीतिमाश्रयन् हंसोऽब्रवीत्-

**फलेन मूलेन च वारिभूरूहां मुनेरिवेत्थं मम यस्य वृत्तयः।**
**त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी हृणीयते।।**[१९]

अर्थात् हे नृपते! अहं हंसः मुनिवृत्या कमलनालानि भुक्त्वा जीवनं यापयामि तादृशि मयि त्वया दण्डधारिणा यदि दण्डाघातो क्रियते चेदेषा भूमिर्मही कथं न लज्जां प्राप्नोति।

अत्रश्लोके भेदनीत्या राज्ञः मनसि स्वीयवधविषये विचिकित्सां जनयित्वा राजनि कारूण्यरसं प्रवाहयति।

एवं चतुर्णां नीतीनां समाश्रयणेन राजा राज्यं कथं पालयेदिति सोदाहरणं महाकाव्येऽस्मिन् समुपस्थापितम्।

अथ च राजनीतौ कुटिलतायाः अपि समावेशो जायते। यतः वक्रगामिनां सन्मार्गप्रापणाय ऋजुत्वम् असमर्थं भवति। उच्यते च -

**तेन तेन वचसैव मघोनः स स्म वेद कपटं पटुरुच्चैः।**
**आचरस्तदुचितामथ वाणीमार्जवं हि कुटिलेषु न नीतिः।।**[२०]

अस्य श्लोकस्य भावं विवृण्वता उक्तम्-

कुटिलेषु पुरुषेषु आर्जवमकापट्यं नीतिर्न भवति, किन्तु कपटिषु कपटिनैव भवितव्यमिति न्यायः। सन्दर्भेऽस्मिन् ध्यातव्यं यदत्र नैषधकारः भारवेः प्रभावितो दृश्यते यतः किरातार्जुनीयेऽप्युक्तम्-

**व्रजन्ति ते मूढधियः पराभवं, भवन्ति मायाविषु ये न मायिनः।**
**प्रविश्य हि घ्नन्ति शठास्तथाविधान्, असंवृताङ्गान्निशिता इवेषवः।।**[२१]

अर्थात् मायाविनां शठानाञ्च नियन्त्रणं यदि दण्डेन कुटिलोपायेन च नैव क्रियेत तर्हि सर्वमपि प्रजातन्त्रं छिन्नं भवेत्।

यतः उपर्युक्तश्लोकस्य व्याख्यायामप्युक्तम्-

**यस्मिन् यथा वर्तते यो मनुष्यस्तस्मिंस्तथा वर्तितव्यं स धर्मः।**
**मायाचारो मायया बाधितव्यः साध्वाचारो साधुना प्रत्युपेयः।।**[२२]

एवमेव श्रीहर्षः राजनीतेरिदमपि तथ्यं स्वीये महाकाव्ये प्रस्तौति यत् "शत्रोः शत्रुर्मित्रमिति" अस्य सङ्केतोऽपि काञ्चीनरेशस्य प्रसङ्गे दीयते-

**आचूडाग्रमज्जयज्जयपटुयच्छल्यकाण्डानयं,**
**संरम्भे रिपुराजकुञ्जरघटा कुम्भस्थलेषु स्थिरान्।**
**सा सेवाऽस्य पृथुः प्रसीदसि तया नास्मै, कुतस्त्वत्कुच-**
**स्पर्द्धागर्द्धिषु तेषु तान् धृतवते दण्डान् प्रचण्डानपि।।**[२३]

अर्थात् - युद्धारम्भे सति अयं पटुराजा रिपुराजकुञ्जरघटाकुम्भस्थलेषु दण्डाञ्शरान्प्रासान्वा आचूडाग्रं पुङ्खाग्रं मर्यादीकृत्य यदमज्जयन्निचखान। ईदृशी तव

महतीसेवा अनेन नलेन क्रियते यत् तव प्रतिस्पर्धिनं नरेशं परिभावयति अतः नलं वृणीष्व। अर्थात् प्रतिस्पर्द्धिनं दण्डयन्तं प्रति मनः प्रसीदतीति भावः।

इत्थं नैषधीयचरितस्य परिशीलनेन ज्ञायते यत् तत्र राजनयविषयस्य विस्तृतं विवेचनं प्रसङ्गमनु यत्र तत्र सर्वत्र विराजते एव। अतः अत्र राज्ञः प्रासङ्गिकता, उत्पत्तिः, चत्वार उपायाः, कुटिलनीतिः इत्यादिविषयाः सुष्ठु प्रत्यपाद्यन्त।

## सन्दर्भाः


१. बार्हस्पत्यराज्यव्यवस्था.,पृ.५०
२. याज्ञवल्क्यस्मृतिः, १.३३४
३. नैषधीयचरितम्, १/६
४. मनु.,७-४.५
५. नैषधीयचरितं नारायणीटीका
६. नैषधीयचरितम्, १/१३
७. नैषधीयचरितम्, १.१९
८. कौटिल्य अर्थशास्त्रम्, २/२
९. महाभारते शान्तिपर्वणि,११९/१६
१०. नैषधीयचरितम्, ७.८१
११. नैषधीयचरितम्, ४.८१ नारायणटीका
१२. नैषधीयचरितम्, ४.८९
१३. नैषधीयचरितम्, १.१२८
१४. अग्निपुराणे, २४०.१
१५. अग्निपुराणे, २४०.८
१६. नैषधीयचरितम्, १.१३०
१७. नैषधीयचरितम्, १.१३१
१८. नैषधीयचरितम्, १.१३२
१९. नैषधीयचरितम्, १.१३३
२०. नैषधीयचरितम्, ५/१०३
२१. किरातार्जुनीयम्,१.३०

२२. किरातार्जुनीयम्, १/३० व्याख्यात्मक:
२३. नैषधीयचरितम्, १२/४०

## उपयुक्तग्रन्थसूचिः


१. बार्हस्पत्यराज्यव्यवस्था - डॉ.राघवेन्द्रवाजपेयी, चौखम्बा विद्याभवन, वाराणसी, १९६६

२. याज्ञवल्क्यस्मृतिः - डॉ.गङ्गासगरराय, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली-२०११

३. नैषधीयचरितम् - श्रीहर्षः, चौखम्बा सुरभारती प्रकाशन, वाराणसी-१९९८

४. मनुस्मृतिः - डॉ.उर्मिला रुस्तगी, जे.पी.पब्लिशिंग टाउस, दिल्ली - २००२

५. कौटिल्य अर्थशास्त्रम्, आचार्यविष्णुगुप्त - सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी-१९९१

६. महाभारतम् - श्री वेदव्यासः - (M.N.Dutt) परिमलपब्लिकेशन्स, दिल्ली-२००४

७. अग्निपुराणम् - श्री शिवप्रसाद्द्विवेदि, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली - २००४

८. किरातार्जुनीयम्-भारविः, चौखम्बा सुरभारती प्रकाशन, वाराणसी - २००८

९. नैषधीयचरितम् की शास्त्रीय मीमांसा - डॉ.रामबहादुरशुक्ला, ईस्टर बुक लिंकर्स, दिल्ली- २००५

ISSN: 2231-0452

# अधिकारिवादः
## (विवेकानन्दस्य नव्यवेदान्तानुसारम्)

*पलाश साँतरा*
*(शोधच्छात्रः, अद्वैतवेदान्तविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**प्रबन्धसारः**

शास्त्रेष्वधिकारिविचारोऽनुबन्धचतुष्टयेषु मुख्यरूपेण परिगण्यते। वैदिककालात् परं प्रवर्तितेषु शास्त्रेषु अधिकारिविचारोऽधिकगुरुत्वेनालोचितो वर्तते। दर्शनशास्त्रेषु साधनचतुष्टयसम्पन्नः प्रमाता इति अधिकारिणः लक्षणम्। परन्तु आधुनिकदर्शन-प्रचारकेष्वन्यतमः स्वामिविवेकानन्दः, तेन नव्यवेदान्ते किञ्चिद् भिन्नरूपेण अस्मिन् विषये विचारः प्रदर्शितः। तेषां मतानुसारं सर्वेषां हृदि स एकः परमात्मा विराजते। अतः कथं वा एकोऽन्यस्मात् न्यूनः, नीचो वा भवितुमर्हति ? अधिकारिभेदविचारस्तु समाजे ब्राह्मणश्रेण्या आधिपत्यविस्तारार्थं विहितः कश्चन प्रयासः। परन्तु अद्यतने आधुनिके युगे अयं नियमोऽसमीचिन इति विचार्य शास्त्राध्ययनाय सर्वेषामधिकारः अस्तीति मुक्तकण्ठेन उद्घोषितवान् स्वामिविवेकानन्दः। तस्य नव्यवेदान्तानुसारं, सामाजिकाः अवहेलितजनाः यदा शास्त्रोक्तानि तत्त्वानि ज्ञात्वा स्वजीवने प्रयोगं विधास्यन्ति तदानीमेव समाजस्याग्रगतिर्भविष्यति। सम्यग् ज्ञानेनैव दासमनोभावापन्नाः मानवाः मुक्तिं प्राप्तुं शक्नुवन्ति। अतः समग्रसमाजस्य कल्याणाय अधिकारिवादविचारः नूतनदृष्ट्या पर्यालोचनीयः। अतः स्वामिनः अशिक्षितजनानाम् अपराविद्यायाः शिक्षणेन साकं पराविद्यां प्राप्तुं मार्गं निश्चेतुं च देशे भिन्नाः कार्यपद्धतीः गृहीतवन्तः, येषां प्रारम्भः सर्वेषां शास्त्राध्ययने अधिकारप्रदानाज्जायते।

**भूमिका**

विवेकानन्दस्य नव्यवेदान्ते पारम्परिकवेदान्तशास्त्रे च केषुचिद्विषयेषु भेदः दृश्यते। तेषु आदौ अधिकारिवादप्रसङ्गः। विवेकानन्ददर्शने एवं दृश्यते यत् शास्त्राध्ययनाधिकारः

सर्वेषां कृते सर्वस्तरीयजनानां कृते उन्मुक्त:। वैदेशिकानां कृतेऽपि विवेकानन्दस्वामिन: समपथम् अनुसृतवन्त:। विवेकानन्ददर्शने विशिष्य शास्त्रज्ञानं सर्वेभ्य: जनेभ्य: उन्मुक्तं वर्तते।दीनदरिद्रशूद्रादय: सर्वेऽपि शास्त्राध्ययने अधिकारिण: इति तस्याभिप्राय:। ते जना: शास्त्रादिकमधीत्य ऐहिकजीवने तस्य ज्ञानस्य प्रयोगं विदधतु इति स्वामिन: अभिप्राय आसीत्। अस्मिन्स्थले पारम्परिकवेदान्तवादिना साकं तस्य महान्भेद: वर्तते। वेदान्तसारे उक्तलक्षणानुसारम्–

"अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थ: अस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुर:सरं नित्य-नैमित्तिक-प्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्त:, साधनचतुष्टयसम्पन्न: प्रमाता।"[१]

इत्येतादृशमधिकारिणं पारम्परिकवेदान्त: अङ्गीकरोति। वस्तुत: अस्य विचारस्य खण्डनं न कृत्वा किञ्चिद् भिन्नतया स्वविचारं प्रादर्शयद् विवेकानन्द:। तस्य अधिकारिविचारे भेद: नास्ति। अधिकारिविचारे स: जात्यादिभेदान् अतिक्रम्य गुणादिभेदान् स्वीकरोति।

**विवेकानन्दस्य अधिकारिविचार:**

पाश्चात्त्यदेशादागत्य स्वदेशे कस्मिंश्चिदालोचनासत्रे विवेकानन्द: भागम् ऊढवान्। तत्र तस्य शिष्य: पृष्टवान् यत् - कथं भवान् पाश्चात्त्येभ्य: अब्राह्मणेभ्य: मन्त्रदीक्षां दत्तवान्? इति। पाश्चात्त्यास्तु म्लेच्छा: यवनाश्च। मन्त्रदीक्षायां शास्त्राध्ययने च तेषामधिकार एव नास्ति।

विवेकानन्द: उक्तवान्, "मम सर्वे शिष्या: ब्राह्मणा:।" जानाम्यहमब्राह्मणानां प्रणवदीक्षायामधिकार: नास्ति। यद्यपि ब्राह्मणपुत्र: जन्मन: ब्राह्मण एव भवति, तथापि कर्मणा स: शूद्रोऽपि भवितुमर्हति। तथैव जन्मना शूद्रोऽपि कर्मणा ब्राह्मणत्वं प्राप्नोति।आचरणेन अब्राह्मणोऽपि ब्राह्मणो भवति। वस्तुत: मानवेषु गुणत्रयं समरूपेण विद्यते। मानुषस्य व्यवहार: सत्त्वरजस्तमोगुणानुसारमनुवर्तते। कदाचित् कस्यचित् गुणस्य आधिक्ये सति तस्य व्यवहारस्तद्गुणानुसारं भवति। तदा अन्ये गुणा: गौणा: भवन्ति। एवमेव सत्त्वगुणाधिक्ययुक्ता: ब्राह्मणा:, रजोगुणप्राधान्येन क्षत्रिया:, तमोगुणप्राधान्येन शूद्राश्च भवन्ति। अत: यदि निम्नवर्गीय: कोऽपि सत्त्वगुणयुक्तो भवति, तद्वदाचरणं करोति, तर्हि तस्य ब्राह्मणत्वे का हानि: ? व्यावहारिकजीवने

अपि अयं भेदः स्पष्टरूपेण दरीदृश्यते। समाजे ये केवलमनुग्रहलाभाय अन्येषां सेवादिकं कार्यं कुर्वन्ति ते शूद्राः, ये अर्थप्राप्त्यर्थं व्यवसायादिभिः स्वजीवनम् उत्सर्गीकुर्वन्ति ते वैश्याः, ये समाजे प्रचलिताः अव्यवस्थाः न सहन्ते, ये अन्यायकारिणां प्रतिहाराय निर्भयतया प्रतिवादादिकं कुर्वन्ति ते क्षात्रभावयुक्ताः। ये सर्वदा ज्ञानासक्ताः भूत्वा भगवति स्वात्मानं समर्पयन्ति ते ब्राह्मणत्वं प्राप्नुवन्ति। यथा- विश्वामित्रस्य ब्राह्मणत्वप्राप्तिः, परशुरामस्य क्षत्रियत्वप्राप्तिः इत्यादीनि उदाहरणानि प्रदत्तानि। मनुसंहितायामपि गुणप्राधान्येन विचारः दृश्यते -

**अनार्यता निष्ठुरता क्रूरता निष्क्रियात्मता।**
**पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम्।।**[२]

वात्सायनानुसारं सः ब्राह्मणो भवतु वा म्लेच्छः परन्तु यो यथा विहितधर्माणां प्रत्यक्षानुभूतिं कृतवान् स ऋषिः। अतः प्राचीनकाले जारजपुत्रो वशिष्ठः, धीवरपुत्रो व्यासः, दासीपुत्रो नारदश्च ऋषयः बभूवुः। वस्तुतः सत्यसाक्षात्कारादनन्तरं भेदभावः दूरीभवति। अतः प्रपञ्चे प्रत्येकमपि ऋषिः भवितुं शक्नोति। एवं कथनेन सम्यग् ज्ञायते यद् वेदे सर्वेषामधिकारो वर्तते।

**यथेमां वाचं कल्याणीमावादानि जनेष्यः।**
**ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय।।**[३]

वेदाध्ययने सर्वेषामधिकारो नास्तीति वेदे कुत्राप्येवं निर्देशो नोपलभ्यते । अयं विभेदस्तु परवर्तिनि समये पुराणादिसाहित्ये आगतः। तत्र पुराणेष्वेवं विचारो वर्तते यदस्याः शाखायाः अयमधिकारी स्यात्। पुनश्च केचन अंशाः सत्ययुगे अध्येतव्याः, अपरे केचन तु कलियुगे अध्येतव्या इति निर्देशो वर्तते। परन्तु अस्माकं वेदाः प्रमाणमतः पुराणादिसाहित्येषु प्रामाण्यं न दृढतरम्।

### शास्त्रीयपद्धत्या समालोचनम्

कस्मिंश्चित् प्रश्नोत्तरप्रसङ्गे स्वामिविवेकानन्दः अधिकारिवादप्रसङ्गे विस्ताररूपेण आलोचनां कृतवान्। तस्य मतानुसारं – पूर्वजान् प्रति मम श्रद्धायां सत्यामपि तेषां शिक्षापद्धतेः

समालोचने अहं दृढचित्तोऽस्मि। वैदिककालीनशिक्षापद्धत्यां जनैः निर्दिष्टः नियमः पालनीय आसीत् ;परं केन कारणेन नियमानां पालनं करणीयमिति क्वचिदपि न दृश्यते। अतः स्वामिनः मतानुसारमियं पद्धतिः सर्वथा दोषपूर्णा। तदर्थं तेषामुद्देश्यानां सिद्धिस्तु नाऽभवत् परन्तु जनानां मनस्सु व्यर्थनियमानां भारः स्थापितः।

उद्देश्यं विना नियमानां पालनं नोचितम्। सोद्देश्यं नियमानां पालनं नितान्तमपेक्षते, अन्यथा कार्येषु प्रवृत्तिरेव न जायते। अतः उच्यते -"**उद्देश्यमनुद्दिश्य न मन्दोऽपि प्रवर्तते**" इति। एतस्य दोषपूर्णनियमस्य समर्थने केचन इत्थं कथयन्ति यत् साधारणमनुष्याःशास्त्रेषु विद्यमानानि तत्त्वानि अवगन्तुं न पारयन्ति।

विवेकानन्दस्य मतानुसारं स्वार्थपराणां जनानां परिणाम एव अधिकारिवादः। तेषां कल्पना आसीत् यत् निम्नस्तरीयाः जनाः यदि शास्त्राणि पठिष्यन्ति तर्हि समाजे ते उच्चस्थाने स्थास्यन्ति। येन ब्राह्मणम्मन्यमानानां स्थानं विनश्यति इति। धर्मोपदेशकत्वेन यः सोऽपि विनश्यति। उत्तमशिक्षकेषु उच्चावच भेदाः भावनाश्च न भवन्ति इति स्वामिनः अभिप्रायः। मन्दमतिः कश्चन छात्रः यदि अध्ययने क्लेशमनुभवति, तर्हि तं शिक्षयितुं नूतनकौशलानां प्रयोगः करणीयः, मातृभाषासाहाय्येन सः छात्रः बोधनीयः। मनोविज्ञानानुसारं व्यक्तिभेदेन बुद्धिस्तरभेदोऽपि लक्ष्यते। प्रतिभावन्तः छात्राःये भवन्ति, तेषां परिवेशः, परिवारः संस्कारश्च समृद्धो भवति, अतः तेषां ग्रहणसामर्थ्यमपि विशिष्टं भवति। सर्वेषु छात्रेषु बौद्धिकस्तरेषु भिन्नतायां सत्यां विकासस्य सम्पूर्णसम्भावनां तु शिक्षाप्रदानकौशलेन समानां कर्तुं शक्यते। वैदिकऋषीणां मतमन्यथा मन्यमानाः सङ्कुचितभावनायां पतिताः ब्राह्मणाः शिक्षायाः संरक्षणं तेषामेव इति नियमनं कृतवन्तः। एवमधिकारिवादः मानवानामभिशापरूपेण जगति प्रतिष्ठितः। मातृभाषायां यदि अध्ययनं सम्भाव्यते तर्हि सर्वोऽपि मानवः ज्ञानग्रहणे समर्थो भवति। आदर्शशिक्षकः यथासामर्थ्यं सामान्यजनान् प्रेरणापुरस्सरं तेषां मातृभाषामाध्यमेन शिक्षयेत् तथैव च तेषु विद्यमानमन्धविश्वासादिकं दूरीकर्तुं प्रयतेत। अस्याः स्थितेः कारणानि सन्ति–

१) स्वार्थपरः मनुष्यः स्वस्वार्थसिद्ध्यर्थमन्यैः निम्नस्तरैः जनैः सह समानतां नेच्छति। अतः निम्नस्तरीयाणां ज्ञानवर्धनाय अवसरान् अपि न कल्पयति। येन समाजे तेषां स्थानमधः भवेदिति आशंक्याधिकारिभेदमवर्धयन्।

२) अधिकारिवादसिद्धान्त: समाजकल्याणाय अवरोधक इति मन्यमाना: जना अपि धर्मभयात् समाजोन्नतये अहितकरं नियममपि समर्थयन्ति।

अत: नियमस्यास्य परिवर्तनं नितान्तमपेक्ष्यते इति मत्वा स्वामिविवेकानन्द: स्वशिष्येभ्य: सतीर्थेभ्यश्च कृते च आदेशं दत्तवान् यत् सत्यस्य प्रचाराय शास्त्रं शास्त्रप्रणेतारमाचार्यमपि मा गणयन्तु इति। स्वामिना उक्तम् -

"This attempt at compromise proceeds from arrant downright cowardice. Be bold! My children should be brave, above all. Not the least compromise on any account. Preach the highest truths broadcast. Do not fear losing your respect or causing unhappy friction."[४]

**स्वामिन: कार्यपद्धतय:**

अधिकारवादनिवृत्तये तेन काश्चन कार्यपद्धतय: अवलम्बिता:। तेषां समग्रदर्शनम् अवहेलितजनानाम उद्धरणे निबद्धमस्ति। सामाजिकसाम्यताप्रतिपादनमेव तेषां मुख्यं लक्ष्यमासीत्। स:"The future of India" नाम्न्यां वक्तृतायामुक्तवान् -

"The solution is not by bringing down the higher but by raising the lower up to the level of the higher and that is the line of work that is found in all books."

Again,

"….the ideal at one end is the Brahmin and the ideal at the other end is the Chandala, and the whole work is to raise the Chandala up to the Brahmin."[५]

तस्य कार्यपन्थान: अधोलिखिता: सन्ति -

❖ स्वामिन: मतानुसारं प्रत्येकं देशस्य आत्मा एक: निर्दिष्टगुणविशिष्ट: भवति। अस्माकं देशस्य आत्मा तु धर्मे तिष्ठति। तेषां मतानुसारम् - "Religion is the

manifestation of the Divinity already in man."[६] अन्तर्निहितस्यास्य देवत्वस्य विकास: शिक्षया भवति, नान्य: पन्था:।अत आदौ तु साधारणजनाय धर्मज्ञानं दातव्यम्। विराट् ज्ञानराशित: वञ्चितानां कृते शास्त्रज्ञानस्य उन्मुखीकरणं प्रधानकार्यम्।

❖ अस्माकं देशे बहव: जना: निरक्षरा:। न केवलं धार्मिकज्ञानात् अपि तु सामान्येतिहास-भूगोल-विज्ञानादिभ्य: ज्ञानेभ्य: अपि दीर्घसमयात् वञ्चिता: सन्ति। अत: धार्मिकज्ञानेन साकं देशस्य इतिहास-संस्कृति-भौगोलिकादि ज्ञानं अपि दातव्यं भवति।

❖ ये खलु दरिद्रा: शिक्षाग्रहणे तेषां रुचिर्न भवति। देशस्य विभिन्नेषु प्रान्तेषु विद्यालयादिकं स्थापयित्वा शिक्षाप्रदानस्य व्यवस्थां क्रियते चेदपि ते नागच्छन्ति। अत: यदि छात्रा: नागच्छन्ति तर्हि छात्राणां समीपं गत्वा तेभ्य: शिक्षा दातव्या।

❖ पुस्तकादिपठने ते कदाचित् आग्रहीणो न भवन्ति अत: मानचित्रं, भूगोलकं, चित्रग्राहीणि इत्यादिसहायकेन वाचनं कारणीयं च तेषां राष्ट्रस्य इतिहासस्य भूक्षेत्रस्य शास्त्रस्य च ज्ञानं प्रदेयम्।

❖ ते यत्र कुत्रापि भवन्तु, गृहे, क्षेत्रादौ कृषिकार्यं कुर्वाणा वा भवन्तु, अथवा वृक्षच्छायासु विश्रान्तिं कुर्वाणा वा भवन्तु श्रवणकौशलाधारितं शिक्षाप्रदानं भवेत्। एवम्प्रकारेण तेषां ग्रहणसामर्थ्यानुसारम् अस्माकं शास्त्रोक्तगूढतत्त्वानि यानि एतावत् पर्यन्तं गुहाकन्दरेषु इतोऽपि ब्राह्मण्यश्रेण्यामन्तर्निहितानि सन्ति तेषामुन्मुक्तकरणं भवेत्।

❖ एतानि बृहत्कार्याणि तु प्राथमिकपर्याये अपेक्ष्यन्ते। एतद् बृहत्कार्यभारं विवेकानन्द: ये देशस्था शिक्षिता: त्यागिन: संन्यासिन: भगवत्प्राप्त्यर्थं स्वजीवनमुत्सर्गीकृतवन्त: तेषां कृते अर्पितवान्। एतदर्थं स: सतीर्थानां कृते इयं कार्यप्रणालीं निर्धार्य कार्ये प्रेरितवान्। वस्तुत: तस्य दर्शनस्य मुख्यमुद्देश्यमासीत् दरिद्रसेवा। श्रीरामकृष्णपरमहंसदेवस्य **शिवज्ञाने जीवसेवा**[७] इति आदर्शस्य परिपूर्तये स देशस्य अवहेलितदरिद्रजनानामुद्धाराय आजीवनं कार्ये रत: आसीत्। तस्य गुरु: श्रीरामकृष्णदेव: कदाचित्तमुक्तवान्– "नरेन्द्र ! न केवलमात्मन: मुक्ति: भवत: लक्ष्यं भवतु अपि तु – "**आत्मनो मोक्षाय जगद्धिताय च।**"[८]

अयमेव मार्गः स्वामिविवेकानन्देन अनुसृतः। तेषां दृढमतिः आसीत्, अशिक्षितजनानां शिक्षाप्रदानेन राष्ट्रस्योन्नतिर्भविष्यति। सुदीर्घकालात् नैके साम्राज्यवादिशक्तेः शासने स्थित्वा अस्माकं देशस्य आत्मशक्तेः स्तरं न्यूनं कृतवन्तः। अत्र सर्वे जनाः स्वात्मानं दासवत् चिन्तयन्ति। तेषामात्ममर्यादायाः बोधः सम्पूर्णरूपेण विनष्टः। अतः आदौ तेषामात्ममर्यादाबोधः जागरणीयः। अस्य माध्यमो भवति शिक्षा। अस्माकं कार्यं तु केवलं शिक्षाप्रदानम्, अनन्तरं ते स्वयमेव आत्ममुक्त्यर्थं प्रयत्नं विधास्यन्ति। अयमेव तेषां मार्गः –**उद्धरेदात्मनात्मनम्**। अर्थात् स्वस्य उद्धारः स्वयमेव कुर्यात्, न अन्ये केऽपि तत् कर्तुं शक्नुवन्ति। विवेकानन्दः विश्वसिति स्म यत् प्रपञ्चस्यास्य सर्वेऽपि जीवाः अवश्यं मुक्तिं प्राप्नुयुः। सर्वेषां जीवनचर्याः ज्ञातेन अज्ञातेन वा तन्मुक्तिमभिलक्ष्य धावन्तः सन्ति। अस्माकं कार्यं केवलं सत्यदर्शने तेषाम् आभ्यन्तरीणमायाया आवरणस्योन्मोचने सहायताकरणम्।

**उपसंहारः**

विवेकानन्दः व्यक्तिस्वातन्त्र्ये सर्वदा विश्वस्त आसीत्। स्वाधीनताप्रदाने एव प्रकृतोन्नतिर्भवति। सर्वे परमात्मस्वरूपा अतः जातिगुणादिभिः विचारैः जनानां भेदज्ञाने तथा तेषामज्ञानान्धकारं प्रति प्रेषणे सहायताकरणं तु पापकार्यम्। तेन उक्तम् –

"The goal is freedom, liberty. Liberty for the mind, for the body, for the spirit. All thing re always trying to get freedom."[९]

एवं प्रकारेण विवेकानन्ददर्शने सर्वेषां मुक्तिः तथा शास्त्रपठने अधिकारित्वेन सर्वेषां स्वीकारः तथा तेषां सामाजिकस्थितेः उन्नयने नैके अवसराः कल्पिताः वर्तन्ते। पारम्परिकवेदान्ततः भिन्नत्वे सति अयं मतवादः वेदोक्तस्य साम्यवादस्य भित्तिं दृढीकरोति तथा व्यावहारिकजीवने अयं वादः सम्पूर्णसमाजेन साकं देशस्य अपि तु समग्रप्रपञ्चस्य स्थितेः उन्नतिं विधास्यतीति शिवः।

## सन्दर्भाः

१. वेदान्तसारः

२. म. स्मृ. १०.५८

३. शुक्लयजुर्वेदः, मा. शा. अ. २६, म. २

४. The Evils of Adhikarivada, CWSV, Vol:V, Page – 264

५. CWSV, Vol:III, Page – 295

६. Ibid, Vol:IV, Page – 358

७. श्रीरामकृष्णकथामृतम्

८. श्रीरामकृष्णकथामृतम्

९. Karma Yoga, CWSV, Vol:I

## सन्दर्भग्रन्थाः


1. Budhananda Swami, ed. “The Complete Works of Swami Vivekananda”, Mayavati Memorial Edition. Thirteenth. VIII vols. Calcutta: Avaita Ashrama, July, 1970. English.
2. Harshnanda, Swami. “Karma Yoga Sutra Satakam” : Sri Ramkrishna Ashram, 1978. Sanskrit, English.
3. Rolland Romain, 'The Life of Vivekananda”. Trans. E.F. Malxolm Smith. 7th Impression. Calcutta: Avaita Ashrama, August 1970. English.
4. Tapasyananda, Swami. “The Nationalistic and Religious lectures of Swami Vivekananda”. Madras: Sri Ramakrishna Math, 1985. English.
5. Tapasyananda Swami, trans. “The Philosophical & Religious Lectures of Swami Vivekananda. Madras: Sri Ramakrishna Math, 1984. English.
6. “Uunderstanding Vivekananda”. Kolkata: Ramakrishna Mission Institute of Culture, September 2013. 798. English.
7. रूस्तगी, उर्मिला, मनुस्मृतिः, त्रयोदशः दिल्ली, जे.पी.पब्लिशिंग हाउस, २००५ संस्कृतम्
8. विवेकानन्द, स्वामी, कर्मयोग, प्रथम संस्करण, दिल्ली, दिव्यम् प्रकाशन, २०११ हिन्दी

# राष्ट्रियसंस्कृतविद्यापीठम्
**(मानितविश्वविद्यालयः)**
**तिरुपतिः - ५१७ ५०७ (आं.प्र.)**

क्रमाङ्कः__________ दिनाङ्कः________

## महस्विनीसदस्यतापत्रम्

अस्माकं ____________________________________ विश्वविद्यालयस्य/ महाविद्यालयस्य/ विद्यापीठस्य/संस्थानस्य पुस्तकालयाय विद्यापीठस्य शोधपत्रिकायाः **महस्विन्याः** ______________________________ वार्षिकं ग्राहकत्वमपेक्षितम्।

अहं ____________________________________ विद्यापीठशोधपत्रिकायाः **महस्विन्याः** ________ वर्षाणि व्यक्तिगतसदस्यः/संस्थागतसदस्यः भवितुमिच्छामि।

**महस्विन्याः** वार्षिकशुल्कं रू.२५५/- बैंकड्राफ्टद्वारा **कुलसचिवः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः-५१७५०७** इति नाम्ना प्रेषयामि।

बैंकड्राफ्टसंख्या ____________ बैंकनाम ______________________________

बैंकड्राफ्टतिथिः____________ *हस्ताक्षरम्*

नाम सङ्केतश्च __________________________________________________

✂- - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - -

### स्वीकृतिपत्रम्

प्रो/डॉ/श्री/श्रीमती ____________________________________ सकाशात् **महस्विन्याः** वार्षिक/एकाङ्क शुल्कं रू. _________ मुद्रारूपं/ड्राफ्ट सं.__________ दिनाङ्के __________ सधन्यवादं प्राप्तम्।

*हस्ताक्षरम्*